कर्म - कौमुदी

डॉ० बृजेशकुमारशुक्लः

NAG PUBLISHERS

नाग पब्लिशर्स

कर्म-कौमुदी

डॉ० बृजेशकुमारशुक्लः

नाग प्रकाशक

कर्म-कौमुदी

लेखकः
डॉ० बृजेशकुमारशुक्लः
उपाचार्यः संस्कृतप्राकृतभाषाविभागे
लखनऊ विश्वविद्यालये
लक्ष्मणपुरम् (उ०प्र०)

NAG PUBLISHERS
नाग पब्लिशर्स
११-ए (यू.ए.) जवाहर नगर, दिल्ली-११०००७

राष्ट्रिय संस्कृत संस्थान नई दिल्ली के वित्तीय सहयोग से प्रकाशित।

© नाग पब्लिशर्स

१. ११ए/यू.ए. (पोस्ट आफिस बिल्डिंग),
जवाहर नगर, दिल्ली-११०००७

२. जलालपुर माफी (चुनार-मिर्जापुर) यू.पी.

ISBN 81-7081-543-6

प्रथम संस्करण - २००१

मूल्य : 67.00

मुद्रक :

श्री सुरेन्द्र प्रताप द्वारा नाग प्रकाशक, जवाहर नगर, दिल्ली के लिए प्रकाशित तथा जी, प्रिन्ट प्रासेस ३०८/२, शहजादाबाग, दयाबस्ती, दिल्ली-११००३५ से मुद्रित तथा टाईप सेटिंग अमर प्रिंटिंग प्रेस, ८/२५ विजय नगर, दिल्ली-११०००७

उपोद्घातः

निखिलेऽपि भारतीयवाङ्मये वैदिकवाङ्मयस्य स्थानं प्रमुखतया स्वीक्रियते विद्वद्वरेण्यैः। न खलु वैदिकवाङ्मयस्य दर्शनक्षेत्रे, साहित्यक्षेत्रेऽथवाऽन्यस्मिन् कस्मिञ्चिच्च क्षेत्र एव महत्त्वं वरीवर्त्ति, अपितु तस्य यज्ञपरत्वात्कर्मक्षेत्रे तु महत्त्वं नितरां मन्यते। भाष्यकृत्सायणमतानुसारं चेद् विचार्यते तर्हि वेदस्य सर्वा ऋचो यज्ञकर्मणि प्रयुज्जमाना दरीदृश्यन्ते। अत एवैतत्तु सर्वथाऽभिधातुं शक्यं यद् वेदस्य महिमा कर्मकाण्डे वर्तततेराम्। प्रकारान्तरेण तर्क्यते चेत्तर्हि यज्ञस्यार्थोऽपि कर्मैव भवितुमर्हति। एतस्मादेव वेदसंहिता ब्राह्मणकल्पसूत्रादिषु स्मृतिपुराणादिषु च कर्मण एव महत्त्वं प्रत्यपादि वैदिकर्षिभिः। यथोक्तं यजुर्वेदे– **''कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः।''**

अखिला वसुन्धरा हि कर्मभूमिः पुंसाम्। न केवलमत्र मनुजा अपितु चराचरप्राणिनः सर्वेऽपि स्वकर्मनिरता दृश्यन्ते। अपि च ये कर्माणि परित्यज्य ज्ञानमार्गमनुसरन्ति तेषां कृतेऽपि कर्मणामावश्यकता भवत्येव कर्माभावे ज्ञानसिद्धेरसम्भवात्। सन्यासावस्थायामपि कर्मणां सम्यङ् न्यासोऽपेक्षितो भवति न च तत्परित्यागः। यथाऽभिहितम्–

''कर्मणां सम्यङ् न्यासं संन्यासं कवयो विदुः।''

चित्तवृत्तेर्निरोधत्वं योगलक्षणम वोचि पतञ्जलिना, किन्तु कर्मणां माहात्म्यस्य डिण्डिमनादकृद्गीताकारेण **''योगः कर्मसु कौशल''** मिति योगस्य परिभाषा नवीनैव व्यधायि, तस्मात्तस्य कर्मणः सुमहत्त्वं प्रख्यापितम्। **''ब्रह्म सत्यं जगन्मिथ्या''** **''ऋते ज्ञानान्न मुक्ति''** रिति वदन्तो वेदान्तवर्त्मानुयायिनोऽपि व्यावहारिकदशायां कर्मणां सत्तामङ्गीकुर्वन्त्येव। मीमांसादर्शनं तु कर्मकाण्डविधिं सम्यक्तया विवृणोत्येव। अष्टाङ्गयोगदर्श–

नपारङ्गतैः पण्डितैरपि कर्माभावत्वे सति यमनियमासनादीनामष्टाङ्गानां सिद्धिर्नाप्तुं शक्यते। एतस्मात्सर्वथा कर्मणि यतनीयमिति।

पुरुषार्थचतुष्ट्यसम्पादनेऽपि कर्मणामावश्यकता वर्तते यतो हि धर्मार्थकाममोक्षाणां सफला सिद्धिस्तावन्न दृग्गोचरीभवति यावन्न खलु कर्मणामुदयः स्यात्। परन्तु समेषां पुरुषार्थानां प्राप्तौ कर्माकर्मविवेकोऽवश्यं भवेत्। सामान्यो जनस्तु संसारस्य सर्वाणि कर्माणि कर्मबुद्ध्या गृह्णाति। सर्वाणि न पुरुषार्थलाभकराणि भवितुमर्हन्ति। अपितु विधिनिषेधत्वेन कर्माकर्मविचारपरम्परयाऽऽनीतानि शास्त्रद्वारेण विधिपरकाणि कर्माण्येव पुरुषार्थचतुष्ट्यसाधकानि भवन्ति, इतराणि निषेधमयानि कर्माणि पुरुषार्थाकर्षकाणि पापोपचयानि च सर्वथाऽनुपादेयानि वर्तन्ते कर्मकाण्डशास्त्रे तु विधिपराणां कर्मणां साङ्गोपाङ्गनिरूपणं विवृण्वते। यथा वेदे विधिवाक्यमुक्तम् **''अहरहः सन्ध्यामुपासीत''** इति वाक्यानुसारं सन्ध्यानामुपासनाकरणे को विधिः, कः समयः के मन्त्राः किं फलं चेति प्रश्नोत्तरे कर्मकाण्डशास्त्रमेवाऽत्र प्रभवति। केचिद् ब्रुवन्ति यत्सूक्ष्मकर्मणैव मुक्तिर्भवति न चाऽस्य कर्मकाण्डमयेन कर्मणा स्थूलत्वाल्लौकिकत्वाच्चाऽस्य कर्मण इति। न विद्वज्जनसेवितोऽयं मार्गः स्थूलत्वेन लौकिकत्वेनेव पथा गच्छतां सत्पुरुषाणां सूक्ष्मत्वाऽलौकिकत्वयोः सिद्धेः सम्भवात्। आत्मनः शुद्ध्यर्थं शरीरसंस्कारार्थं च स्थूलकर्मरूपतया कर्मकाण्डस्याऽऽवश्यकता सर्वैरेवाऽङ्गीक्रियते। मीमांसकेन कुमारिलभट्टेनाप्यभ्यधायि यद् यथा पक्षिणां गतिराकाशे न खल्वेकेन पक्षेण भवति तथैव ज्ञानकर्मभ्यामेव मनुजः शाश्वतीं गतिमाप्नोति–

उभाभ्यामेव पक्षाभ्यां खे यथा पक्षिणां गतिः।।
तथैव ज्ञानकर्मभ्यां प्राप्यते शाश्वती गतिः।।

ज्ञानप्राप्तिर्मोक्षप्राप्तिर्वा कर्माधीनैव वर्तते कर्मण्येवाऽधिकाराप्तेरत्र पुंसाम् उक्तं यथा श्रीमद्भगवद्गीतायाम्

कर्मण्येवाऽधिकारोऽस्ति मा फलेषु कदाचन।।

अत एव काम्यकर्मणां फलविपाको यदि न जायते तर्हि मनुष्यैः शोको न विधातव्यः फलेष्वनधिकारत्वात् फलदातृत्वाभावत्वाच्च तस्य! अस्यां कर्मभूमौ निवसद्भिर्द्विजातिभिः श्रौतस्मार्त्तानि कर्माणि सम्यक्तयानुष्ठेयानि। कर्मैव जीवनं खलु द्विजातीनाम्। ये मनुजाः कर्मकाण्डमयानि कर्माणि कारं कारं स्वजीवनं यापितवन्तस्तैरवश्यमेव पुरुषार्थचतुष्टयं प्रापीति न संशीतेरवसरोऽत्र। अपि च ये पाश्चात्यजीवन- सरणिमवलम्ब्य श्रौतस्मार्त्तेभ्यः कर्मभ्यः पराङ्मुखा वर्तन्ते ते तूत्पथगामिन आयुरारोग्यकान्तिरहिता रोगाक्षिप्ततया जीवनं व्यतीत्य घोरे तमसि निमज्जन्ति।

अस्मिन् वैज्ञानिके युगे काऽऽवश्यकता कर्मकाण्डस्येति विवक्षायाम-भिधातुं शक्यं यत्कर्मकाण्डमप्यवैज्ञानिकं नास्ति। विभिन्नपदार्थैः काष्ठौषधिभि-र्होमे कृते पर्यावरणं रमणीयतमं भवत्येव। ये पवित्रमन्त्राः कर्मकाण्डे पठ्यन्ते परीक्षणेन ज्ञायते यत् ते मन्त्राः कर्णविवरं प्रविश्य विकृतरोगादिदशां नाशयन्ति सन्नीतेः सन्मार्गस्य च प्रेरणां प्रयच्छन्ति। ब्रंह्मकूर्चादयः शरीरशोधनाय सम्प्रयुक्ता हानिकारकान् कीटान् ध्नन्ति। कर्मकाण्डेनाऽन्येऽपि वैज्ञानिकलाभाः परोक्षतयाऽपरोक्षतया वा द्रष्टुं शक्यन्तेऽत्र समासेनैव ते निगदिताः! सर्वतोभद्रमण्डलं कलशप्रतिष्ठापनं पृथ्वीनवग्रहादीनां पूजनं वृक्षपूजनं चेति सर्वाणि कर्माणि समष्टिप्रतीकानि सर्वजनैक्यमुपदिशन्ति। एतत्सर्वं समालोच्यैव ग्रन्थोऽयं मया प्रणीतः।

कर्मकौमुद्याख्येऽस्मिन् ग्रन्थे संक्षिप्ततया नित्यनैमित्तिककर्माणि, पूजाहोमकर्माणि, अनुष्ठान-शान्तिकर्माणि, संस्कारकर्माणि, गृह्यकर्माणि, पुराणपारायणव्रतादिकाम्यकर्माणि च प्रतिपादितानि वर्तन्ते। अत्र वणिता विषया विविधग्रन्थेभ्यः समाहृता समासेन साररूपत्वेन निबद्धाः। कर्मकाण्डस्या-नावश्यकविस्तरः क्वचिदत्र दूरीकृतः। एतस्मात् सर्वेऽपि जना एतद्ग्रन्थं पठित्वा सरलतया कर्मकाण्डमवगच्छेयुः। यतोहि संस्कृतभाषादर्शन-व्याकरणसाहित्यवेत्तारो वेदविद्यापारङ्गता अपि विद्वांसः कर्मकाण्डग्रन्थान् न स्प्रष्टुमभिलषन्ति लेशमात्रमपि कर्मकाण्डशास्त्रं न जानन्ति तेषां समेषां कृते

ग्रन्थोऽयमुपयोगी भवितुमर्हति! दैवदुर्विलसितं खल्वेतद् यदद्य संस्कृतभाषाऽपि ह्रासोन्मुखी सर्वकारोपेक्षतां समुपगता च न विकासमुपगच्छति! परन्तु कर्मकाण्डमया प्रायोगिकी व्यावहारिकी संस्कृताऽऽद्यापि वाञ्छनीया पदे पदेऽन्विष्यते। न कोऽपि हिन्दुजातीयः परिवारो भवेद्यस्मिन् विवाहादिसंस्कारेषु पुरोहितो नाहूतः। दैवज्ञपार्श्वे तु सर्वे गच्छन्त्येवेति दर्शं दर्शं युगेऽस्मिन् प्रायोगिकसंस्कृतस्याऽऽवश्यकता वर्तेतेतराम्। एतदखिलं मनसि निधाय ग्रन्थोऽयं विरचितो मया। आशासेऽहं यदयं ग्रन्थो विदुषां पुरोधसां द्विजानां च कृते प्रमोदं व्युत्पादयिष्यति तर्हि मे मनः परमां सन्तुष्टिं लप्स्यते। अपि च यानि स्खलितानि ग्रन्थेऽस्मिन् मानवप्रकृतिसुलभतया भवेयुस्तानि सुधीभिः सूचनीयानि परिमार्जितव्यानि चेत्यभिधाय विरमामि।

तिथिः– जयन्ती-पर्व २०५७ **विद्वच्चरणचञ्चरीकः**

डॉ. बृजेशकुमारशुक्लः
उपाचार्यः संस्कृतप्राकृतभाषाविभागे
लखनऊ विश्वविद्यालये लखनऊ

विषयानुक्रमणिका

विषयः	पृष्ठानि
नित्यनैमित्तिककर्माध्यायः	**१-३८**
१. मङ्गलाचरणम्	१
२. प्रातरुत्थानम्	१
३. स्नानविधिः	२
४. सन्ध्याप्रयोगः	२
५. पञ्चयज्ञप्रयोगः	६
६. तर्पणप्रयोगः	८
७. जपविधिः	११
८. शास्त्रसम्मतगोदानप्रयोगः	१२
९. तुलादानविधिः	१५
१०. शय्यादानविधिः	१८
११. छायादानविधिः	१९
१२. जन्मोत्सवविधानम्	२०
१३. रात्रिशयनविधिः	२२
१४. नान्दीमुखश्राद्धविधिः	२४
१५. पार्वणश्राद्धविधिः	२६
पूजाहोमकर्माध्यायः	**३९-७५**
१. वेदमन्त्रोच्चारणे स्वस्तिवाचनम्	३९
२. वेदमन्त्रोच्चारणे स्वस्तिवाचनमन्त्राः	३९

३. गणेशपूजनम् ४२

४. गौरीपूजनम् ४२

५. भूतोत्सारणं रक्षाबन्धनञ्च ४३

६. सर्वतोभद्रपीठे कलशस्थापनम् ४४

७. पुण्याहवाचनविधिः ४८

८. सर्वतोभद्रे मण्डलदेवतापूजनम् ५२

९. षोडशमातृकापूजनम् ५३

१०. चतुष्षष्टियोगिनीपूजनम् ५३

११. नवग्रहपूजनम् ५४

१२. अथाधिदेवतापूजनम् ५५

१३. प्रत्यधिदेवतापूजनम् ५५

१४. वसोर्धारापूजनम् ५६

१५. वाष्तोष्पतिदेवतापूजनम् ५६

१६. क्षेत्रपालपूजनम् ५६

१७. पञ्चलोकपालपूजनम् ५७

१८. दशदिक्पालपूजनम् ५८

१९. सर्वतोभद्रमण्डले संक्षेपेण देवतानां पूजनम् ५९

२०. अग्न्युत्तारणदेवप्राणप्रतिष्ठाविधिः ६०

२१. षोडशोपचारेण देवपूजनविधिः ६२

२२. देवतानां पञ्चोपचारेण पूजनम् ६८

२३. होमकर्मणि कुशकण्डिकाविधिः ६८

२४. कुण्डनिर्माणप्रकारः ७१

२५. मण्डपनिर्माणप्रकारः ७२

२६. होमविधिः ७३

२७. पूर्णाहुतिविधिः ७४
२८. बलिदानम् ७५

अनुष्ठानशान्तिकर्माध्यायः ७६-९४

१. रुद्राभिषेकविधिः ७६
२. महामृत्युञ्जयजपविधानम् ७९
३. दशांशतर्पणमार्जनविधिः ८०
४. नवचण्डीशतचण्डीविधानम् ८१
५. शतचण्डीविधानम् ८१
६. गायत्रीमन्त्रपुरश्चरणम् ८४
७. नवग्रहशान्तिः ८५
८. मूलगण्डान्तशान्तिः ८७
९. दुःस्वप्नशान्तिविधिः ९१
१०. वैधव्ययोगशान्तिविधिः ९२

संस्कारकर्माध्यायः ९५-१७१

१. संस्कारकर्मसु सामान्यनियमाः ९५
२. गर्भाधानसंस्कारः ९७
३. पुंसवनसंस्करः ९९
४. सीमन्तोन्नयनसंस्कारः १०१
५. जातकर्ममेधाजननसंस्कारः १०४
६. षष्ठीकर्मविधिः १०७
७. नामकरणसंस्कारः ११४
८. निष्क्रमणसंस्कारः ११८
९. अन्नप्राशनसंस्कारः ११९
१०. चौलकर्मसंस्कारः १२१

११. कर्णवेधसंस्कारः	१२४
१२. उपनयनसंस्कारः	१२६
१३. वेदारम्भसंस्कारः	१३३
१४. केशान्तसंस्कारः	१३५
१५. समावर्तनसंस्कारः	१३६
१६. विवाहसंस्कारः	१४२
१७. कन्याप्रदातृकर्तृकवरार्ध्यदानम्	१४४
१८. मधुपर्कविधिः	१४५
१९. मधुपर्कसम्बद्धगोदानम्	१४६
२०. विवाहेऽग्निस्थापनम्	१४७
२१. वरकन्ययोर्वस्त्रपरिधापनम्	१४८
२२. कन्यादानं गोत्रोच्चारमङ्गलञ्च	१५०
२३. राष्ट्रभृद् होमः	१५५
२४. जयाहोमः	१५६
२५. अभ्यातानहोमः	१५६
२६. अथाग्न्यादिपञ्चकहोमः	१५८
२७. लाजाहोमः	१५९
२८. सप्तपदीविधानम्	१६०
२९. सिन्दूरदानम्	१६४
३०. विवाहाङ्गभूतं चतुर्थीकर्म	१६५
३१. विवाहादावाशीर्वादश्लोकाः	१६८
३२. चौलादिसंस्कारत्रयाणामनुक्रमणिका	१७०
गृहकर्माध्यायः	**१७२-१७७**
१. भूमिपूजनशिलास्थापनविधिः	१७२

२. गृहप्रतिष्ठागृहप्रवेशविधिः १७४

३. पर्वपूजनविधिः १७७

पुराणपारायणव्रतादिकाम्यकर्माध्यायः १७८-१९२

१. श्रीमद्भागवतपारायणम् १७८

२. हरिवंशपुराणपारायणम् १८०

३. श्रीवाल्मीकिरामायणपारायणम् १८०

४. शिवपुराणपारायणम् १८२

५. दुर्गासप्तशतीपारायणम् १८२

६. गरुडपुराणपारायणम् १८२

७. देवीभागवतपारायणम् १८३

८. श्रीसत्यनारायणव्रतकथाविधिः १८३

९. एकादशीव्रतविधिः १८४

१०. प्रदोषव्रतकथाविधिः १८५

११. हरितालिकाव्रतकथाविधिः १८६

१२. ऋषिपञ्चमीव्रतकथाविधिः १८७

१३. गणेशचतुर्थीव्रतकथाविधिः १८८

१४. नवरात्रव्रतविधिः १८९

१५. जयन्तीव्रतविधिः १९०

१६. शिवरात्रिव्रतविधिः १९१

परिशिष्टम् १९३

।। इति विषयानुक्रमणिका।।

नित्यनैमित्तिककर्माध्याय:

श्रीमङ्गलाचरणम्

सुधाधारो भक्तेर्मुनिजनकृपाधारसरणि-
र्मुधाकारो व्याधेः प्रणतजनपापौघहरणः॥
शरण्योलोकानां कनककमलासारजलदः
श्रिया भूनीलाभ्यां सह जयतु पद्मावतिपतिः॥१॥

सुधाकुम्भैर्नित्यं कनकघटितैर्हस्तविधृतै
र्वधूभिर्देवानां स्नपितरमणो वेङ्कटगिरौ॥
सुरैर्माल्यैर्मूर्ध्नाऽर्चितचरणराजीवयुगलः
श्रिया पद्मावत्या सह विजयते वेङ्कटपतिः॥२॥

कर्मकाण्डतितीर्षूणां लोकानाञ्च पुरोधसाम्।
नानाग्रन्थान् समालोड्य क्रियते कर्मकौमुदी॥

अथ प्रातरुत्थानम्

सर्वप्रथमं ब्राह्मे मुहूर्त्ते[1] शय्यात उत्थाय स्वमनोरथं स्मृत्वा यस्या नासिकाया वायुर्निःसरेत्तेनैव पाणिना मस्तकं मुखं च प्रक्षाल्य स्वकरतलावलोकनमनेन मन्त्रेण कर्त्तव्यम् "**ॐ कराग्रे वसते लक्ष्मीः करमध्ये सरस्वती। करमूले स्थितो ब्रह्मा प्रभाते करदर्शनम्॥**" ततो देवतागुर्वादीनां प्रातः स्मरणं कर्त्तव्यम्।[2] ततः-"**ॐ समुद्रवसने देवि पर्वतस्तनमण्डले। विष्णुपत्नि। नमस्तुभ्यं पादस्पर्शं क्षमस्व मे॥**" इति

---

१. रात्रेः पश्चिमयामस्य मुहूर्त्तो यस्तृतीयकः।
ब्राह्म इति विज्ञेयो विहितः स प्रबोधने। (विष्णुपुराणे)
ब्राह्मे मुहूर्त्ते या निद्रा सा पुण्यक्षयकारिणी।
तां करोति द्विजो मोहात्पादकृच्छ्रेण शुद्ध्यति॥ (स्मृतिरत्नाकरे)

२. ब्राह्मे काले समुत्थाय गणेशादीन्स्मरेत्ततः।
प्रातः स्तोत्रं मङ्गलानि पठित्वा शौचमाचरेत्॥ (अङ्गिरास्मृतौ)

मन्त्रं पठित्वा प्रथमं दक्षिणहस्तेन भूमिं स्पृष्ट्वा श्वासानुसारेण च पृथिव्यां पादं दत्त्वाऽग्निश्रोत्रियगवादीनामवलोकनं प्रथमं कुर्यात् सुभगां वा स्त्रियं पश्येत्।[१]

ततो नित्यक्रियां कृत्वाऽनेन मन्त्रेण दन्तधावनमाचरेत्-"**ॐ आयुर्बलं यशो वर्चः प्रजाः पशुवसूनि च। ब्रह्मप्रज्ञां च मेधां च त्वं नो देहि वनस्पते॥**" दन्तधावने मौनमाचरेत्।[२]

अथ स्नानविधिः

गृहे शीतोदकेनोष्णोदकेन वा समयानुसारमिमं मन्त्रमुच्चार्य स्नानं कुर्यात् –"**ॐ गङ्गे च यमुने चैव गोदावरि सरस्वति! नर्मदे सिन्धु काबेरि जलेऽस्मिन् सन्निधिं कुरु। ॐ आपो नारा इति प्रोक्तास्ता एतस्यायनं पुनः। तस्मान्नारायणं देवं स्नानकाले स्मराम्यहम्॥**" अधोवस्त्रं धृत्वैव स्नानमाचरेत्, नग्नस्नाननिषेधः स्मृतिषु दृश्यते।[३] रुग्णावस्थायां स्नानमकृत्वा गायत्र्या दशबारं जलमभिमन्त्र्य तेन जलेन सर्वाङ्गप्रोक्षणं कुर्यात्।

अथ सन्ध्याप्रयोगः

तत्रादौ **प्रातः सन्ध्या**[४]:– स्नानं कृत्वा वस्त्रं[५] धृत्वाऽऽसने कुशादौ-पूर्वाभिमुखो भूत्वा तिलकं[६] भस्म वाऽनेन मन्त्रेण धारयेत् –**ॐ तिलकं तु महत्पुण्यं पवित्रं पापनाशनम्। आपदं हरते नित्यं लक्ष्मीस्तिष्ठति सर्वदा** ततः किञ्चिज्जलमादाय विष्णुं संस्मृत्याऽनेन मन्त्रेण जलं शिरसि सिञ्चेत्

---

१. श्रोत्रियं सुभगां गाञ्च अग्निमाग्निचितं तथा।
प्रातरुत्थाय यः पश्येदापद्भ्यः स प्रमुच्यते॥

२. पुरीषे मैथुने होमे प्रस्रावे दन्तधावने।
स्नानभोजजाप्येषु सदा मौनं समाचरेत्॥ (अत्रिस्मृतौ)

३. नान्नमद्यादेकवासो न नग्नः स्नानमाचरेत्॥ (मनुस्मृतौ)

४. उत्तमा तारकोपेता मध्यमा लुप्ततारका।
अधमा भास्करोपेता प्रातः सन्ध्या त्रिधा मतः॥

५. स्नात्वैवं वाससी धौते अक्लिन्ने परिधापयेत्।
अभावे धौतवस्त्रस्य पट्टक्षौमादिकानि च॥

६. ललाटे तिलकं कृत्वा सन्ध्याकर्म समाचरेत्।
अकृत्वा भालतिलकं तस्य कर्मनिरर्थकम्॥

"ॐ अपवित्रः पवित्रो वा सर्वावस्थां गतोऽपि वा। यः स्मरेत्पुण्डरीकाक्षं स बाह्याभ्यन्तरः शुचिः॥" तदनन्तरं मन्त्रेणाऽनेन दक्षिणहस्तस्य मध्यमाऽनामिकाभ्यां किञ्चिज्जलमासनोपरि क्षिपेत्– **ॐ पृथ्वि त्वया धृता लोका देवि त्वं विष्णुना धृता। त्वं च धारय मां देवि पवित्रं कुरु चासनम्॥"** ततस्त्रिभिमन्त्रैराचमनं[१] कुर्यात् –**ॐ नारायणाय नमः। ॐ माधवाय नमः। ॐ केशवाय नमः।** ततः **'ॐ हृषीकेशाय नमः'** इति मन्त्रेण करौ प्रक्षाल्य दक्षिणकर्णं संस्पृशेत्। ततः प्रणवव्या-हृतिसहितया गायत्र्या शिखाबन्धनं[२] कर्त्तव्यम्। ततः खस्पर्शः[३] कार्यः। **"ॐ विष्णुर्विष्णुर्विष्णुः"** इति स्मृत्वा **'ॐ वाग्वाक्, ॐ प्राणः प्राणः ॐ चक्षुश्चक्षुः ॐ श्रोत्रं श्रोत्रम्, ॐ नाभिः, ॐ हृदयम्, ॐ कण्ठः, ॐ ललाटम्, ॐ शिरः, ॐ शिखा, ॐ बाहुभ्याम्'** इति शरीराङ्गानि जलार्द्रदक्षिणपाणेर्मध्यमाऽनामिकाभ्यां स्पृशेत्। तदनन्तरं **'यशोबलम्'** कथयित्वा नमस्कारमुद्रा कार्या। ततः श्रीगणेशभैरवविष्णुदेवी इष्टदेवतां वा नमस्कृत्य दक्षिणकरे वामकरे च पवित्रीं कुशमयीं धृत्वा मन्त्रमिमं पठेत्–**"ॐ पवित्रस्थो वैष्णव्यौ सवितुर्व्वः प्रसवऽउत्पुनाम्यच्छिद्रेण पवित्रेण सूर्यस्य रश्मिभिः। तस्य ते पवित्रपते पवित्रपूतस्य यत्कामः पुनेतच्छकेयम्।"** पुनराचम्य प्राणायामं कुर्यात्। पवित्रीधारणात्पूर्वमेव कैश्चित्प्राणायामः कथितः।

तदनन्तरं दक्षिणहस्ते जलपुष्पाक्षतान् गृहीत्वा सङ्कल्पं कुर्यात् **"ॐ विष्णुर्विष्णुर्विष्णुस्तत्सदद्य श्रीविष्णोराज्ञया प्रवर्तमानस्याद्य श्रीब्रह्मणो द्वितीयपरार्द्धे श्रीश्वेतवाराहकल्पे सप्तमे वैवस्वतमन्वन्तरेऽष्टाविंशतितमे कलियुगे कलिप्रथमचरणे जम्बूद्वीपे भरतखण्डे आर्यावर्त्तैकदेशान्तरगते ब्रह्मावर्तैकदेशे पुण्यप्रदेशे भारते देशेऽमुकनगरे अमुकक्षेत्रे विक्रमसंवत्सरे अमुकसङ्ख्यके शालिवाहनशाके अमुकसङ्ख्यके अमुक सम्वत्सरे अमुकायने अमुक ऋतौ अमुक मासे अमुकपक्षे अमुकतिथौ अमुकवासरे**

---

१. क्रियां यः कुरुते मोहादनाचम्यैव नास्तिकः।
भवन्ति हि वृथा तस्य क्रियाः सर्वा न संशयः॥

२. स्नाने दाने जपे होमे सन्ध्यायां देवतार्चने।
शिखाग्रन्थिं विना कर्म न कुर्याद् वै कदाचन॥

३. त्रिः प्राश्यापो द्विरुन्मृज्य खान्यद्भिः समुपस्पृशेत्॥ (याज्ञवल्क्यस्मृतौ)

अमुक नक्षत्रे अमुकलग्नवेलायां शुभपुण्यतिथौ सकलशास्त्रश्रुतिस्मृति-पुराणोक्तफलप्राप्तिकामः अमुकगोत्रप्रजातः अमुक नाम शर्मा[१] अहं ममोपात्तदुरितक्षयपूर्वकब्रह्मवर्चसकामार्थं श्रीनारायणप्रीतये अमुक-देवताप्रीत्यर्थं वा अमुक कर्म करिष्ये॥''[२]

इति सङ्कल्पं कृत्वा भूमौ जलाक्षतपुष्पाणि क्षिपेत्। पुनराचमनं कृत्वा हस्ते आचमन्यां वा जलमादाय **''ॐ अघमर्षणसूक्तस्याऽघमर्षण ऋषिरनुष्टुप् छन्दो भाववृतो देवताऽश्वमेधावभृथे विनियोगः।''** इति पठित्वा जलं भूमौ क्षिपेत्। ततो मन्त्रमिमं पठेत्– **ॐ ऋतञ्च सत्यञ्चाभी-द्धात्तपसोऽध्यजायत संवत्सरोऽअजायत। अहोरात्राणि विदधद्-विश्वस्यमिषतो वशी। सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पयत्। दिवं च पृथिवीञ्चान्तरिक्षमथो स्वः॥''**

तत्पश्चात्प्रणवव्याहृतिसहितया गायत्र्या षडङ्गन्यासादिकं विधाय सावित्रीं ध्यात्वाऽऽवाहनं कुर्यात्– **''ब्रह्माणीं ब्रह्मदैवत्यां ब्रह्मलोक-निवासिनीम्। आवाहयाम्यहं देवीमायान्तीं सूर्यमण्डलात्। आगच्छ वरदे देवि त्र्यक्षरे ब्रह्मवादिनि। गायत्रिच्छन्दसां मातर्ब्रह्मयोने नमोऽस्तु ते॥''**

ततः प्राणायामं कुर्वन्मन्त्रमिमं पठेत्– **''ॐ भूः ॐ भुवः ॐ स्वः ॐ महः ॐ जनः ॐ तपः ॐ सत्यं ॐ तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहिधियो यो नः प्रचोदयात् ॐ आपो ज्योती रसोऽमृतं ब्रह्म भूर्भुवः स्वरोम्॥''** एवं पूरक[३] प्राणायामे विष्णुं नाभौ ध्यायेत् कुम्भके[४] हृत्पद्मे ब्रह्माणं रेचके[५] च ललाटे शिवं ध्यायेत्। ततः **'सूर्यश्चमेति ब्रह्मा ऋषिः प्रकृतिश्छन्दः सूर्यो देवताऽपामुपस्पर्शने विनियोगः॥''** इति पठित्वा विनियोगं कुर्यात्। तदनन्तरं करे चुलुके जलमादाय **''ॐ सूर्यश्च मा मन्युश्च मन्युपतयश्च मन्युकृतेभ्यः पापेभ्यो रक्षन्ताम्, यद्रात्र्या पापमकार्षं**

---

१. क्षत्रियो वर्माऽहं वैश्यो गुप्तोऽहं शूद्रश्च दासोऽहमिति वदेत्।
२. एतावद्विधिः सर्वत्र कर्मकाण्डे योज्यः।
३. नीलपङ्कजविख्यातमानीय नाभिमध्यतः। महात्मानं चतुर्बाहुं सकेयूरं हरिं स्मरेत्॥
४. हृत्पद्मे कुम्भके ध्यायेद् ब्रह्माणं पङ्कजासनम्। रक्तेन्दीवरवर्णाभं चतुर्वक्त्रं पितामहम्॥
५. रेचके शङ्करं ध्यायेल्ललाटस्थं त्रिशूलिनम्। शुद्धस्फटिकसङ्काशं संसारार्णवतारकम्॥

मनसा वाचा हस्ताभ्यां पद्भ्यामुदरेण शिश्ना रात्रिस्तदवलुम्पतुयत्किञ्चिद्दुरितं मयि इदमहमापोऽमृतं योनौ सूर्ये ज्योतिषिजुहोमि॥'' इति त्रिवृदाचमनं कुर्यात् ततस्तूष्णीं करं प्रक्षालयेत्।

''**ॐ आपोहिष्ठेत्यादिमन्त्रस्य सिन्धुद्वीप ऋषिरनुष्टुप् छन्दः आपोदेवता सौत्रामण्यवभृथे विनियोगः।** इति विनियोगं कृत्वा वामहस्ते जलमादाय तन्युब्जेन दक्षिणहस्तेनाऽऽच्छाद्य ''**ॐ द्रुपदादिवमुमुचानः स्विन्नः स्नातो मलादिव। पूतं पवित्रेणेवाज्यमापः शुन्धन्तु मैनसः।''** इति त्रिवारं पठित्वा जलं तच्छिरसि क्षिपेत्।

पूर्वपठिताऽघमर्षणसूक्तस्य विनियोगं कृत्वा पुनश्च जलमादाय अघमर्षणसूक्तं पठित्वा वामनासायां क्षिप्त्वा दक्षिणनासया पापपुरुषरूपं तज्जलं निरस्याऽनालोक्यैव वामभागे भूमौ निपातयेत्।

''**ॐ अन्तश्चरसीति तिरश्चीन ऋषिरनुष्टुप् छन्दः आपो देवता अपामुपस्पर्शने विनियोगः॥''** इति विनियोगं कृत्वा चुलुके जलं गृहीत्वा ''**ॐ अन्तश्चरसि भूतेषु गुहायां विश्वतोमुखः। त्वं यज्ञस्त्वं वषट्कार आपो ज्योती रसोऽमृतम्।''** इति कृत्वाऽऽचामेत्।

ततः सूर्याभिमुखो भूत्वा जलाक्षतपुष्पगन्धाद्यादाय गायत्रीं पठित्वा वारत्रयमर्घ्यं दद्यात्। अर्घ्यं दत्त्वाऽर्घ्योदकेन नेत्रश्रोत्रस्पर्शनञ्च कुर्यात्।

तदन्तरमुत्थाय भूम्यलग्नगुल्फतलभागो वा भूम्यलग्नचरणार्धभागो वा स्वस्तिकाकारपाणिः सूर्याभिमुखं सूर्योपस्थानं कुर्यात् तद्विनियोगः– **ॐ उद्वयमित्यस्य मन्त्रस्य प्रस्कण्व ऋषिरनुष्टुप् छन्दः सूर्यो देवता सूर्योपस्थाने विनियोगः। ॐ चित्रमित्यस्य कौत्स ऋषिः त्रिष्टुप् छन्दः सूर्यो देवता सूर्योपस्थाने विनियोगः। ॐ तच्चक्षुरिति दध्यङ्ङाथर्वण ऋषिरक्षरातीतपुर उष्णिक् छन्दः सूर्योदेवता सूर्योपस्थाने विनियोगः॥''** इति कृत्वा मन्त्रमिमं पठेत्–''**ॐ उद्वयं तमसस्परिस्वः पश्यन्त उत्तरम्, देवं देवत्रा सूर्यमगन्म ज्योतिरुत्तमम्। ॐ उदुत्यं जातवेदसं देवं वहन्ति केतवः दृशे विश्वाय सूर्यम्। ॐ चित्रं देवानामुदगादनीकं चक्षुर्मित्रस्य वरुणस्याग्ने आप्राद्यावा पृथिवी अन्तरिक्षथ्ंसूर्य आत्मा जगतस्तस्थुषश्च। ॐ तच्चक्षुर्देवहितं पुरस्ताच्छुक्रमुच्चरत् पश्येम शरदः शतं जीवेम**

शरदः शतᳯ श्रृणुयाम शरदः शतं प्रब्रवाम शरदः शतमदीनाः स्याम शरदः शतं भूयश्च शरदः शतात्॥''

ततो यथाशक्ति मन्त्रं गायत्र्या जपेत्। सूर्यप्रणामं कृत्वा सन्ध्या-विसर्जनमनेनमन्त्रेण कुर्यात् –''**ॐ उत्तरे शिखरे देवि भूम्यां पर्वतमूर्द्धनि। ब्राह्मणेभ्योऽभ्यनुज्ञाता गच्छ देवि यथासुखम्।**'' इत्यनेन सन्ध्यां विसर्जयेत्।

मध्याह्ने[१] सन्ध्यामुदङ्मुखो भूत्वाऽऽचरेत्। तत्राऽपामुपस्पर्शने भिन्नो मन्त्रः प्रयोक्तव्यः॥ तन्मन्त्रः कथ्यते विनियोगश्च–

''**ॐ आपः पुनन्त्वितिविष्णुर्ऋषिरनुष्टुप् छन्द आपो देवताऽपामुपस्पर्शने विनियोगः॥**'' इति विनियोगं कृत्वा पूर्ववच्चुलुके जलमादाय ''**ॐ आपः पुनन्तु पृथिवीं पृथिवीं पूता पुनातु माम्, पुनन्तु ब्रह्मणस्पतिर्ब्रह्मपूता पुनातु माम्, यदुच्छिष्टमभोज्यं च यद्वा दुश्चरितं मम सर्वं पुनन्तु मामापोऽसतांच प्रतिग्रहᳯ स्वाहा॥**'' त्रिवृदाचम्य तूष्णीं करं क्षालयेत्। शेषविधिः प्रातःसन्ध्यावत्कार्यः।

सायं[२] सन्ध्यांपश्चिमाभिमुखो भूत्वा कुर्यात्। सर्वविधिस्तत्र प्रातःसन्ध्यावद् विधेयः। मध्याह्ने त्वूर्ध्वबाहुरुपस्थानं कुर्यात्। सायङ्काले मुकुलिताकारौ करौ विधायोपस्थानं कर्त्तव्यम्।[३]

इति सन्ध्याविधिः

अथ पञ्चयज्ञप्रयोगः

देवभूतपितृब्रह्ममनुष्याणामनुक्रमात्पञ्चयज्ञा भवन्ति, ते वलिवैश्व-देवरूपेणापि प्रसिद्धाः सन्ति। सर्वप्रथमं स्नात्वाऽऽचमनादिकञ्च कृत्वा ''**ॐ अद्येत्यादि देशकालौ सङ्कीर्त्य मे गृहे पञ्च[४] सूनाजनितपापक्षयार्थं**

---

१. अध्यर्धयामादासायं सन्ध्या माध्याह्निकीष्यते॥

२. उत्तमा भास्करोपेता मध्यमा लुप्तभास्करा।
अधमा तारकोपेता सायं सन्ध्या त्रिधा मता॥

३. प्रातस्तु स्वस्तिकाकारौ मध्याह्ने तूर्ध्वबाहुकौ।
सायं मुकुलिताकारौ उपस्थाने करौ स्मृतौ॥

४. पञ्चसूना गृहस्थस्य चुल्ली पेषण्युपस्करी।
कण्डनी चोदकुम्भी च तासां पापस्य शान्तये॥

श्रीपरमेश्वरप्रीत्यर्थं च पञ्चयज्ञात्मकं वैश्वदेवकर्माऽहं करिष्ये'' इति सङ्कल्पं कुर्यात्।

देवयज्ञः – ततोऽग्निं स्वदक्षिणभागे प्रतिष्ठाप्य सम्पूज्य **'ॐ मुखं यः सर्वदेवानां हव्यभुक् कव्यभुक् तथा। पितृणाञ्च नमस्तस्मै विष्णवे पावकात्मने॥'** इति पठित्वा जलेन पर्युक्ष्य दक्षिणजानुनिपातनं कृत्त्वा वामहस्तेन हृदयं संस्पृशन् प्रज्वलितेऽग्नौ तदभावे जले दद्याद् आहुतीः। तन्मन्त्राः – **ॐ ब्रह्मणे स्वाहा इदं ब्रह्मणे इदं न मम॥ ॐ प्रजापतये स्वाहा इदं० ॐ गृह्याभ्यः स्वाहा इदं॥ ॐ काश्यपाय स्वाहा इदं० ॐ अनुमतये स्वाहा इदं० ॐ विश्वेभ्योदेवेभ्यः स्वाहा इदं० ॐ अग्नये स्विष्टकृते स्वाहा इदं०** इति देवयज्ञः॥

भूतयज्ञः – हुतशेषान्नेन प्राक्संस्थं बलित्रयं दद्यात्, तन्मन्त्राः॥ **ॐ पर्ज्जन्याय नमः। ॐ अद्भ्यो नमः। ॐ पृथिव्यै नमः॥** ततोऽग्नेः पश्चाज्जलेन बलिहरणमण्डलं प्रकल्प्य दिक्क्रमेणाग्राङ्कितमन्त्रैर्बलिहरणं कुर्यात्। **'ॐ धात्रे नमः।' 'ॐ विधात्रे नमः'** इति मन्त्राभ्यां दक्षिणोत्तरयोर्दद्यात्। **'ॐ वायवे नमः'** इति पूर्वे। **'ॐ वायवे नम'** इति दक्षिणे। **'ॐ वायवे नमः'** इति पश्चिमे। **'ॐ वायवे नमः'** इत्युत्तरे। **'प्राच्यै नमः'** इति पूर्वे। **'ॐ अवाच्यै नमः'** इति दक्षिणे। **'ॐ प्रतीच्यै नमः'** इति पश्चिमे। **'ॐ उदीच्यै नमः'** इति उत्तरे। ततो दत्तानां बलित्रयाणां मध्ये प्राक् संस्थम् – **ॐ ब्रह्मणे नमः। ॐ अन्तरिक्षाय नमः। ॐ सूर्याय नमः।** ततो ब्रह्मादीनां बलित्रयाणामुत्तरे बलिहरणमेभिर्मन्त्रैर्विदध्यात् – **ॐ विश्वेभ्यो देवेभ्यो नमः। ॐ विश्वेभ्योभूतेभ्यो नमः ॐ उषसे नमः। ॐ भूतानां पतये नमः।** एवं भूतयज्ञो भवति। ततो देवानां नैवेद्यं निवेदयेत् – **''ॐ प्राणाय स्वाहा। ॐ अपानाय स्वाहा। ॐ व्यानाय स्वाहा। ॐ समानाय स्वाहा। ॐ उदानाय स्वाहा।''** इति मन्त्रैः॥

पितृयज्ञः – अपसव्यो भूत्वा दक्षिणाभिमुखः पातितवामजानुर्ब्रह्मादि-बलित्रयस्य दक्षिणे भागे **'ॐ पितृभ्यः स्वधा नमः'** इति मन्त्रेणैकबलिं समर्पयेत्। इति पितृयज्ञः ॥

मनुष्ययज्ञः– अतिथिभोजनमेव मनुष्ययज्ञः कथ्यते। अतिथेरभावे ग्रासचतुष्ट्यं ग्रासमेकं वोत्तराभिमुखो भूत्वा '**ॐ हन्त ते सनकादिमनुष्येभ्यो नमः**' इति पठित्वा भूमौ निपातयेत्। भिक्षा[1] दानमपि मनुष्ययज्ञत्वेन प्रकल्प्यम्।

ततो गोभ्यो ग्रासं दद्यादनेन मन्त्रेण– "**ॐ सौरभेय्यः सर्वहिता पवित्राः पुण्यराशयः। प्रतिगृह्णन्तु मे ग्रासं गावस्त्रैलोक्यमातरः। इदं गोभ्यो नमः॥**" ततोऽपसव्यं दक्षिणाभिमुखो गृहाद्वहिर्गृहाट्टालिकायां वा वायसेभ्यो बलि दद्यात्– "**ॐ ऐन्द्रवरुण वायव्याः सौम्या वै नैर्ऋतास्तथा। वायसाः प्रतिगृह्णन्तु भूमौ दत्तमिमं बलिम्। इदं वायसेभ्यो नमः॥**" ततः श्वभ्यां बलिमाहरेत्– "**ॐ द्वौ श्वानौ श्यामशबलौ वैवस्वत-कुलोद्भवौ। ताभ्यामन्नं प्रदास्यामि स्यातामेतावहिंसकौ। इदं श्वभ्यां नमः॥**"

ब्रह्मयज्ञ[2]:– 'एभिश्चतुभिर्यज्ञैर्वैश्वदेवाख्येन कर्मणा च ब्रह्मस्वरूपी श्रीपरमेश्वरः प्रीयतामिति पठित्वा साञ्जलिर्विष्णुं ध्यायेत्। एष एव ब्रह्मयज्ञः। ततोऽनेन मन्त्रेण विसर्जनं कुर्यात्– "**ॐ गच्छ गच्छ सुरश्रेष्ठ स्थाने परमेश्वर। यत्र ब्रह्मादयो देवास्तत्र गच्छ हुताशन॥**" पूर्वप्रत्तं सर्वबलिं गवादिभ्योऽर्पयेत्॥ **इति पञ्चयज्ञविधिः॥**

अथ तर्पणप्रयोगः

आचमनं कृत्वा पूर्वाभिमुख उपविष्टो यज्ञोपवीतं धृत्वा देशकालौ सङ्कीर्त्य "**ममोपात्तसकलदुरितक्षयाय ब्रह्मावाप्तौ देवर्षिमनुष्यपितॄणां तर्पणमहं करिष्ये।**" इति सङ्कल्पं कुर्यात्। ततस्ताम्रपात्रे श्वेतगन्धयवाक्षतश्वेत-पुष्पाणि दुग्धतुलसीदलसहितानि तथा प्रादेशमात्रप्रमाणान् प्रागग्रान् त्रीन् कुशान् स्थापयित्वा तर्पणार्थे जलपूरणमनेन मन्त्रेण कुर्यात्– "**ॐ आगच्छन्तु महाभागा विश्वेदेवा महाबलाः ये तर्पणेऽत्र विहिताः सावधाना भवन्तु ते।**" इति कृत्वाऽऽवाहनं पात्रान्तरे देवतीर्थे[3] प्रतिमन्त्रमक्षतमिश्रजलाञ्जलिं दद्यात्– "**ॐ ब्रह्मा तृप्यताम्। ॐ विष्णुस्तृप्यताम्। ॐ रुद्रस्तृप्यताम्।**

---

१. नित्यमग्निं परिचरेद्भिक्षां दद्याच्च नित्यदा। वाग्यतो दन्तकाष्ठञ्च नित्यमेव समाचरेत्।

२. यश्च श्रुतिजपः प्रोक्तो ब्रह्मयज्ञस्तु स स्मृतः॥

३. कनिष्ठदेशिन्यङ्गुष्ठमूलान्यग्रङ्करस्य च। प्रजापतिपितृब्रह्मदेवतीर्थान्यनुक्रमात्॥

ॐ देवास्तृप्यन्ताम्। ॐ छन्दाथ्ंसि तृप्यन्ताम्। ॐ वेदास्तृ०। ॐ ऋषयस्तृ०। ॐ पुराणाचार्यास्तृ०। ॐ गन्धर्वास्तृ०। ॐ इतराचा र्यास्तृ। ॐ संवत्सराः सावयवास्तृ०। ॐ देव्यस्तृ०। ॐ अप्सरसस्तृ०। ॐ देवानुगास्तृ०। ॐ नागास्तृ०। ॐ सागरास्तृ०। ॐ पर्वतास्तृ०। ॐ सरितस्तृ०। ॐ मनुष्यास्तृ०। ॐ यक्षास्तृ०। ॐ रक्षाथ्ंसि तृ०। ॐ पिशाचास्तृ०। ॐ सुपर्णास्तृ०। ॐ भूतादयस्तृ०। ॐ पशवस्तृ०। ॐ वनस्पतयस्तृ०। ॐ ओषधयस्तृ०। ॐ भूतग्रामश्चतुर्विधस्तृप्यताम्॥''

तत उत्तराभिमुखोभूत्वा निवीती[१] **''ॐ भूर्भुवः स्वः सनकादयः सप्त मनुष्या इहागच्छन्त्विह तिष्ठन्तु गृह्णन्त्वेताञ्जलाञ्जलीन्''** इति पठित्वा उत्तराग्रान् कुशान् दक्षिणपाणेः कनिष्ठिकामूलप्रदेशे धृत्वा प्रजापतितीर्थेन यवमिश्रौ द्वौ द्वावञ्जली कुशमध्यतो दद्यात्– **''ॐ सनकस्तृप्यताम्। ॐ सनन्दनस्तृ०। ॐ सनातनस्तृ०। ॐ कपिलस्तृ०। ॐ आसुरिस्तृ०। ॐ वोढुस्त०। ॐ पञ्चशिखस्तृ०॥''**

ततो दक्षिणाभिमुखः पातितवामजानुरपसव्यं विधाय **''ॐ भूर्भुवः स्वः कव्यवाडनलादयः सप्तदिव्य पितर इहागच्छन्त्विह तिष्ठन्तु गृह्ण-न्त्वेताञ्जलाञ्जलीन्''** इति पठित्वाऽऽवाहनं विधाय तानेव कुशान् दक्षिणाग्र-मूलान्द्विगुणीकृत्य तेषां मध्यं वामहस्तस्याङ्गुष्ठतर्जनीमध्ये कृत्वा मूलाग्राणि पितृतीर्थेन कृष्णतिल[२]मिश्रांस्त्रीस्त्रीञ्जलाञ्जलीन् दद्यात्। तन्मन्त्राः– **''ॐ कव्यवाडनलास्तृप्यन्ताम्। ॐ अर्यमणस्तृ०। ॐ अग्निष्वात्ताः पितरस्तृप्यन्ताम्। ॐ सोमपाः पितरस्तृ०। ॐ बर्हिषदः पितरस्तृ०॥''**

ततो **''ॐ भूर्भुवः स्वश्चतुर्दश यमा इहागच्छन्त्विह तिष्ठन्तु गृह्णन्त्वेताञ्जलाञ्जलीन्''** इत्यावाह्य पितृवत्तेषां तर्पणं कर्त्तव्यम्। तन्मन्त्रः **''ॐ यमाय नमः। ॐ धर्मराजाय नमः। ॐ मृत्यवे नमः। ॐ अन्तकाय नमः। ॐ वैवस्वताय नमः। ॐ कालाय नमः। ॐ सर्वभूतक्षयाय**

---

१. कण्ठावलम्बितं चैव ब्रह्मसूत्रं यदा भवेत्। तन्निवीतमितिख्यातं शस्तं कर्मणि मानुषे॥

२. सप्तम्यां रविवारे च गृहे जन्मदिने तथा। निशासन्ध्यासु पुत्रार्थी न कुर्यात्तिलतर्पणम्॥
तीर्थे तीर्थे विशेषेषु गङ्गायां प्रेतपक्षके। निषिद्धेऽपि दिने कुर्यात्तर्पणं तिलमिश्रितम्॥
बिना रुप्यसुवर्णेन विना ताम्रतिलैस्तथा। विना दर्भैश्च मन्त्रैश्च पितृणां नोपतिष्ठते॥

नमः। ॐ औदुम्बराय नमः। ॐ दध्नाय नमः। ॐ नीलाय नमः। ॐ परमेष्ठिने नमः। ॐ वृकोदराय नमः। ॐ चित्राय नमः। ॐ चित्रगुप्ताय नमः॥'' एतैर्मन्त्रैस्त्रींस्त्रीन् जलाञ्जलीन् दद्यात्।

जीवितपितृक एतावदेव तर्पणं कुर्यात्। मृतपितृकः पितृपितामह-प्रपितामहेभ्यो जलाञ्जलिं त्रिवारं दद्यात्। ततो मातृपितामहीप्रपितामहीभ्यो दद्यात् त्रिवारं जलाञ्जलिम्। ततो मातामहप्रमातामहवृद्धप्रमातामहेभ्य एकैकं जलाञ्जलिं दद्यात्। एतत्सर्वं नामगोत्रोच्चारणपूर्वकं कार्यम्। ततो भार्यापुत्रकन्या भ्रातृपितृव्यादयो ये ये मृतास्तेभ्योऽपि जलाञ्जलिमेकैकंदद्यात्।

ततस्त्रिभिर्मन्त्रैस्त्रिजलाञ्जलिं दद्यात्– **''ॐ येऽ बान्धवा बान्धवा ये येऽन्यजन्मनि बान्धवाः। ते सर्वे तृप्तिमायान्तु येऽस्मत्तोयाभि-काङ्क्षिणः॥ ॐ आब्रह्मस्तम्बपर्यन्तं देवर्षिपितृमानवाः। तृप्यन्तु पितरः सर्वे मातृमाता- महादयः॥ ॐ अतीतकुलकोटीनां सप्तद्वीपनिवासिनाम्। आब्रह्मभुवनां- ल्लोकानिदमस्तु तिलोदकम्॥''**

तदन्तरं **''ॐ अग्निदग्धाश्च ये जीवा येऽप्यदग्धा कुले मम। भूमौ दत्तेन तृप्यन्तु तृप्ता यान्तु परां गतिम्॥''** इति मन्त्रेण पृथिव्यामेक-मञ्जलिं निपातयेत्। ततः **''ॐ ये के चाऽस्मकुले जाता अपुत्रा गोत्रिणो मृताः। ते गृह्णन्तु मया दत्तवस्त्रनिष्पीडनोदकम्।''** इति पठित्वा स्नानवस्त्रं चतुर्गुणं विधाय भूमौ वामभागे निष्पीडयेत्। एतदनन्तरं केचनाऽपसव्यं विधाय भीष्मपितामहायाऽनेनमन्त्रेण त्रिबारमञ्जलिं ददति– **''ॐ वैयाघ्रपदगोत्राय साङ्कृतिप्रवराय च। अपुत्राय ददाम्येतज्जलं भीष्माय वर्मणे॥''** इति॥

ततः सव्येन शुद्धोदकेनाचम्य पुनरपसव्यं दर्भान्त्यजेत्– **'' ॐ येषां पिता न वा भ्राता न पुत्रो नान्यगोत्रिणः। ते सर्वे तृप्तिमायान्तु मयोत्सृष्टैः कुशैः सदा॥''** इति दर्भानुत्तरतः परित्यजेत्। पुनः सव्येनाचम्य सूर्यायाऽनेन मन्त्रेणाऽर्घ्यं दद्यात्– **''ॐ नमो विवस्वते ब्रह्मन् भास्वते विष्णुतेजसे। जगत्सवित्रे शुचये नमस्ते कर्मदायिने॥''**

ततोऽनेन मन्त्रेणाऽक्षतान् क्षिप्त्वा विसर्जनं कुर्यात्– **ॐ देवागातु-विदोगातुव्वित्वागातुमित। मनसस्प्यत इमं देवयज्ञꣳ स्वाहा व्वातेधाः।**

॥ इति पितृतर्पणप्रयोगः ॥

अथ जप-विधिः

कृतनित्यक्रियः विहितसन्ध्योपासनकर्मा साधक एकान्तेपद्मासने-नोपविश्य कृततिलको बद्धशिखः धृतोपवीत आचमनं कृत्वा प्राणायामं विधाय देशकालौ सङ्कीर्त्य '**अमुकदेवप्रसादात्सद्यः सुखैश्वर्यारोग्यप्राप्तये-ऽमुकसङ्ख्याकममुकमन्त्रस्य जपं करिष्ये।**'' इति सङ्कल्पं कुर्यात्। ततो मन्त्रदेवतामावाह्य सम्पूज्य भूतशुद्धिसङ्कल्पं कृत्वाऽनेन मन्त्रेण भूत[१] शुद्धिं कुर्यात् – '' **ॐ भूतशृङ्गाटाच्छिरः सुषुम्नापथेन जीवशिवं परमपदशिवे योजयामि स्वाहा।। ॐ यं लिङ्गशरीरं शोषय स्वाहा। ॐ रं सङ्कोच शरीरं दह दह स्वाहा। ॐ परमशिव सुषुम्नापथेन मूलशृङ्गाटमुल्ल-सोल्लसज्ज्वल ज्वल प्रज्वल सोऽहं हंसः स्वाहा।।** इति मन्त्रमेकबारं जप्त्वा स्वशरीरं कल्मषरहितं देवताराधनयोग्यं भावयेत्।''

तत आसनस्योपरि स्थित्वाऽऽसनस्याऽधस्तान्मृदमादाय शिरसि योज येत्।[२] ततो मन्त्रस्य षडङ्गादिन्यासं विधाय मन्त्रदेवतां ध्यायन् मालां कर[३] मालां वा वस्त्रेणाऽऽच्छाद्य मालायाः सुमेरुमनुल्लङ्ध्य जपं कुर्यात्। जपात्पूर्वं मालायाः पूजनमनेन मन्त्रेण कुर्यात्– **ॐ ह्रीं माले माले महामाये सर्वशक्ति-स्वरुपिणि चतुर्वर्गस्त्वयि न्यस्तस्तस्मान्मे सिद्धिदा भव। ॐ गं अविघ्नं कुरु माले त्वं सर्वकार्येषु सर्वदा।।** इति सम्प्रार्थ्य दक्षिणहस्ते मालां गृहीत्वाऽनेन मन्त्रेण देवस्य दक्षिणकरे जपं निवेदयेत्– ''**ॐ गुह्यातिगुह्यगोप्ता त्वं गृहाणाऽस्मत्कृतं जपं। सिद्धिर्भवतु मे देव त्वत्प्रसादात्त्वयि स्थितिः।**'' **तत ॐ अनेन यथासङ्ख्यककृताऽमुकमन्त्र–जपेन प्रणतजनानुकम्पी श्री अमुकदेवः प्रीयताम् न मम। ततः क्षमायाचनां कुर्यात्– ''ॐ यदक्षरं पदं भ्रष्टं मात्राहीनञ्च यद् भवेत्। तत् सर्वं क्षम्यतां देव प्रसीद परमेश्वर।।''**

।। इतिजपविधिः।।

---

१. भूतशुद्धिं विनायेन क्रियते यज्जपादिकम्। तत्सर्वंनिष्फलं प्रोक्तं तस्मात्तां पूर्वमाचरेत्।

२. तस्मिन् स्थाने जपं कृत्वा शक्रो हरति तज्जपम्। तन्मृदा लक्ष्म कुर्वीत ललाटे तिलकाकृति।।

३. अनामिकामूलमारभ्य कनिष्ठिकादित एव च। तर्जनीमध्यपर्यन्तमष्टपर्वसु सञ्जपेत्।।

अथ शास्त्रसम्मतगोदान[१] प्रयोग:

सर्व प्रथमं यजमान आसने पूर्वाभिमुखो भूत्वोपविश्य दानविध्यनुसारेण आचमनादिकं स्वस्तिवाचनं[२] विधाय देशकालौ सङ्कीर्त्य **"ममात्मना सह एकविंशतिपुरुषोद्धारपूर्वकं श्रीपरमेश्वरप्रीत्यर्थं शास्त्रीयं गोदानमहं करिष्ये।"** इति सङ्कल्पं कुर्यात् ततो गणपत्यादीन् पूजयित्वा सपत्नीक ब्राह्मणवरणं पूजनं च कृत्वा सुशीला[३]दिलक्षणोपेतां[४] सर्वाङ्गीं धेनुं प्रोक्षयेन्मन्त्रेणाऽनेन– **"ॐ इरावती धेनुमती हि भूत ᳭ सूयवासिनी मनवेदसश्या। व्यस्कभ्नारोदसी विष्णवे ते दधार्थं पृथिवीमभितो मयूखै:।।"** ततो मन्त्रेणाऽनेनाऽऽवाहनं कुर्यात् – **ॐ माता रुद्राणां दुहिता वसूनां स्वसादित्यानाममृतस्य नाभि: प्रणुवोचं चिकितुषे जनाय मा गामनागामदितिं वधिष्ट॥"**

ततो मन्त्रैरेतैर्गवाङ्गेषु देवान् कल्पयित्वा गन्धपुष्पाक्षतै: पूजयेत्– **ॐ शृङ्गमूलयोर्ब्रह्मविष्णुभ्यां नम: ब्रह्मविष्णू आवाहयामि पूजयामि॥ १ ॥ ॐ शृङ्गाग्रे सर्वतीर्थेभ्यो नम: सर्वतीर्थानावाहयामि पूजयामि॥ २ ॥ ॐ शिरोमध्ये महादेवाय नम: महादेवम् आ.पू.॥ ३ ॥ ॐ ललाटाग्रे गौर्यै नम: गौरीमा.पू.॥ ४ ॥ ॐ नासावंशे षण्मुखाय नम: षण्मुखमा.पू.॥ ५ ॥ ॐ कर्णयोरश्विभ्यां नम: अश्विनौ आ.पू.॥ ६ ॥ ॐ नेत्रयो: शशिभास्कराभ्यां नम: शशिभास्करौ आ.पू.॥ ७ ॥ ॐ दन्तेषु सर्ववायवे नम: सर्ववायुमा.पू.॥ ८ ॥ ॐजिह्वायां वरुणाय नम: वरुणमा.पू.॥ ९ ॥ ॐ हुंकारे सरस्वत्यै नम: सरस्वतीमा.पू.॥ १० ॥ ॐ कपोलयोर्मासपक्षाभ्यां नम: मासपक्षौ आ.पू.॥ ११ ॥ ॐ ओष्ठाधरयो: सन्ध्याभ्यां नम: सन्ध्ये आ.पू.॥ १२ ॥ ॐ ग्रीवायामिन्द्राय नम: इन्द्रमा.पू.॥ १३ ॥ ॐ उरसि साध्येभ्यो नम: साध्यानावा.पू.॥**

---

१. व्यतिपाते च सङ्क्रान्तौ ग्रहणे ग्रहदौष्ट्यके। असूत्क्रमे विवाहे च रात्रौ गोदानमिष्यते।।
त्रीणि तुल्यप्रदानानि त्रीणि तुल्यफलानि च। सर्वकामदुघा नूनं गाव: पृथ्वी सरस्वती।।

२. स्वस्तिवाचनमग्रे वक्ष्यते।

३. सुशीलां लक्षणवतीं युवतीं वत्ससंयुताम्। बहुदुग्धवतीं स्निग्धां धेनुं दद्याद्विचक्षणे।

४. अङ्गहीना न दातव्या गौ: कदापि शुभार्थिना।शृङ्गहीना दन्तहीना वर्जनीया प्रयत्नत:।।

१४ ॥ ॐ जङ्घयोर्धर्माय नमः धर्ममा.पू.॥ १५ ॥ ॐ खुरमध्ये गन्धर्वेभ्यो नमः गन्धर्वानावा.पू.॥ १६ ॥ ॐ खुराग्रेषु पन्नगेभ्यो नमः पन्नगानावा.पू.॥ १७ ॥ ॐ खुरमध्येऽप्सरोगणेभ्यो नमः अप्सरोगणानावा. पू.॥ १८ ॥ ॐ पृष्ठे एकादशरुद्रेभ्यो नमः एकादशरुद्रानावा.पू.॥ १९ ॥ ॐ सर्वसन्धिषु वसुभ्यो नमः वसूनावा.पू.॥ २० ॥ ॐ श्रोणीतटे पितृभ्यो नमः पितृनावा.पू.॥ २१ ॥ ॐ पुच्छे सोमाय नमः सोममा.पू. ॥ २२ ॥ ॐ अधोगात्रेषु द्वादशादित्येभ्यो नमः द्वादशादित्याना. पू.॥ २३ ॥ ॐ केशेषु सूर्यरश्मिभ्यो नमः सूर्यरश्मीनावा.पू.॥ २४ ॥ ॐ गोमूत्रे गङ्गायै नमः गङ्गामा.पू.॥ २५॥ ॐ गोमये यमुनायै नमः यमुनामा. पू.॥ २६ ॥ ॐ क्षीरे सरस्वत्यै नमः सरस्वतीमा.पू.॥ २७ ॥ ॐ दध्नि नर्मदायै नमः नर्मदामा.पू.॥ २८ ॥ ॐ घृते वह्नये नमः वह्निमा.पू.॥ २९ ॥ ॐ रोमसु त्रयस्त्रिंशत्कोटिदेवेभ्यो नमः त्रयस्त्रिंश- त्कोटिदेवानावा. पू.॥ ३० ॥ ॐ उदरे पृथिव्यै नमः पृथिवीमा.पू.॥ ३१ ॥ ॐ स्तनेषु चतुर्भ्यः समुद्रेभ्यो नमः चतुः समुद्रानावा.पू.॥ ३२ ॥ ॐ सर्ववपुषि कामधेनवे नमः कामधेनुमा.पू.॥ ३३ ॥

ततो धेनुं षोडशोपचारेण पूजयित्वा सव्यं भूत्वा पूर्वाभिमुखो यजमानो यवाम्बुकुशैर्युक्तं गोपुच्छं दक्षिणकरे निधाय पुच्छस्याऽधः प्रदेशे जलपात्रं संस्थाप्य देवर्षिमनुष्यपितृयमानां तर्पणं कुर्यात्। अत्र तर्पणविधौ कथितमन्त्रैः **''ॐ चित्रगुप्ताय नमः''** पर्यन्तं तर्पणं कर्त्तव्यम्। ततो गोपुच्छाग्रं किञ्चिन्निष्पीड्य जलं भूमौ मन्त्रेणाऽनेन क्षिपेत् –

ॐ मातृ पक्षाश्च ये केचिद् ये केचित्पितृपक्षकाः। गुरुश्वशुर-बन्धूनां ये कुलेषु समुद्भवाः। ये मे कुले लुप्तपिण्डाः पुत्रदारविवर्जिताः। क्रियालोपगता ये च जात्यन्धाः पङ्गवस्तथा। विरूपा आमगर्भाश्च ज्ञाताज्ञातकुले मम॥ ते सर्वे तृप्तिमायान्तु गोपुच्छोदकतर्पणैः॥ ॐ आब्रह्मस्तम्बपर्यन्तं देवर्षिपितृमानवाः। तृप्यन्तु सर्वदा सर्वे गोपुच्छोदकतर्पणैः॥

ततो वत्ससहितां सालङ्कारां गां रज्जुनिर्मुक्तां कृत्वा प्राङ्मुखीं स्थापयित्वा दाता पुच्छदेशे पूर्वाभिमुखस्तिष्ठेत् सपात्रो विप्रस्तत्रैव दक्षिणतः

उत्तराभिमुखः स्थित्वा दातुर्हस्ते कुशाक्षतजलं निधाय सङ्कल्पं कारयेत्– **"ॐ तत् सदद्य श्रीविष्णोराज्ञयाऽस्यां पृथिव्यां जम्बूद्वीपे भारतवर्षे कुमारिकाखण्डे आर्यावर्तैकदेशे पुण्यप्रदेशेऽमुकक्षेत्रे श्रीगङ्गाया अमुकदिग्विभागे ॐ ब्रह्मणोऽह्निद्वितीयपरार्द्धे श्रीश्वेतवाराह-कल्पेऽमुकनाम्नि संवत्सरेऽमुकायनेऽमुकऋतौ अमुकमासेऽमुकपक्षे-ऽमुकतिथौ अमुकवारेऽमुकनक्षत्रेऽमुकयोगेऽमुककरणेऽमुकराशिस्थिते चन्द्रेऽमुकराशिस्थे सूर्येऽमुकराशिस्थिते वृहस्पतौ शेषेषु ग्रहेषु यथायथा स्थानसंस्थितेषु एवं गुणविशिष्टायां शुभवेलायां ज्ञाताज्ञाताऽनेकजन्मा-र्जितपापक्षयार्थं श्रुतिस्मृतिपुराणोक्तफललाभाय चतुर्वर्गादिनिर्वाञ्छित-सिद्धये गोरोमसङ्ख्यकदिव्यवर्षावच्छिन्नस्वर्गलोकस्थितिकामः पितॄणां निरतिशयानन्दब्रह्मलोकावाप्तये च श्रीपरमेश्वरप्रीतये सुपूजितामिमां सालङ्कारां सवत्सां गां रूद्रदैवताममुकगोत्रायाऽमुकशर्मणे ब्राह्मणाय तुभ्यमहं सम्प्रददे।"**

इति सङ्कल्प्य ब्राह्मणहस्तोपरि कुशाक्षतजलं दत्त्वा **"ॐ द्यौस्त्वा ददातु पृथिवी त्वा गृह्णातु"** इत्युच्चार्य दाता गोपुच्छं ब्राह्मणहस्ते निदधातु। ततो यजमानो हस्ते सतुलसीदलदक्षिणामादाय **"ॐ अद्य कृतैतद्-गोदानकर्मणः साङ्गतासिद्धये सतुलसीदलं हिरण्यमिदमग्निदैवतममुक-गोत्रायाऽमुकशर्मणे ब्राह्मणाय तुभ्यमहं सम्प्रददे।"** इत्युच्चार्य दद्यात्।

ततः सपत्नीको यजमानो बान्धवैः सह गोप्रदक्षिणाचतुष्टयं कुर्यात् पठेच्च मन्त्रमिमम्– **"ॐ यानि कानि च पापानि जन्मान्तरकृतानि च। तानि नाशय धेनो त्वं प्रदक्षिणपदे पदे।"** इति प्रदक्षिणां कृत्वा करौ बद्धवा प्रार्थयेत्।– **"ॐ गावो ममाग्रतः सन्तु गावो मे सन्तु पृष्ठतः। गावो मे हृदये सन्तु गवां मध्ये वसाम्यहम्। गावः स्वर्गस्य सोपानं गावो धन्याः सवाहनाः॥ सर्वे देवास्तनौ यस्याः सा धेनुर्वरदाऽस्तु मे॥"**

तदनन्तरं गोदक्षिकर्णे मन्त्रमिमं जपेत्–**"ॐ ह्रीं नमो भगवत्यै ब्रह्ममात्रे विष्णुभगिन्यै रुद्रदेवतायै सर्वपापप्रमोचिन्यै॥"** ततो ब्राह्मणो गोपुच्छान्वितजलेन यजमानशिरसि **"आपो हिष्ठा"** मन्त्रैर्निषिच्य तिलका-शीर्वादादिकर्म कुर्यात्। यजमानः गां विसर्ज्य किञ्चिदनुगच्छेन्मन्त्रं च पठेत्–

"ॐ घृतेन द्यावापृथिवीव्युन्धि सुप्रपाणं भवत्वघ्न्याभ्यः॥" ततो भानवेऽर्घ्यं दत्वा क्षमायाचनां च कृत्वा गोपुच्छोदकतर्पणजलादिकमश्वत्थमूले शुद्धोदकतडागे वा निक्षिपेत्।

॥ इति गोदानविधिः॥

अथ तुला[१]दानविधिः

प्रथमं तावद् यजमानः कृतनित्यक्रियः शुद्धे धौते वस्त्रे परिधाया-ऽऽसने पूर्वाभिमुखो भूत्वोपविश्याऽऽचमनादिकं च कृत्वा हस्तेऽक्षतपुष्पाण्यादाय स्वस्तिवाचनं कुर्यात्। ततो देशकालो सङ्कीर्त्य **"सर्वारिष्टशान्तिपूर्वक-सर्वसुखावाप्तये श्रीमहामृत्युञ्जयदेवताप्रीत्यर्थम् अमुक काले पर्वणिवाऽमुक- द्रव्यैस्तुलापुरुषदानमहं करिष्ये।"** इति सङ्कल्पं ब्रूयात्। ततस्तत्राद्यौ **"निर्वि- घ्नतासिद्ध्यर्थं श्रीगणेशादीन् पूजयिष्ये"** इति सङ्कल्प्य तानपि पूजयेत्। तदनन्तरं यजमानप्रमाणभूतं स्त[२]म्भमेकमारोप्य दक्षिणोत्तरतुलां बद्ध्वा रक्तवस्त्रं परिवेष्ट्य तुलादण्डे देवानां सुवर्णरजतताम्रमयीनां प्रतिमानां चतुर्विंशतिप्रतिमाः दक्षिणत आरभ्य उद्गता बद्ध्वा दण्डस्य मध्ये च विष्णुप्रतिमां धातुमयीं बद्ध्वाऽ[३]ग्न्युत्तारणपूर्वकं सम्पूज्य कूटयोरुभयोर्विष्णुमनन्तं च फलकयोरु- भयोश्च पृथिवीं पूजयेत्।

"ततस्तोलनीयद्रव्याधिदेवताभ्यो नमः" इति गन्धाक्षतैः सम्पूज्य **"ॐ सस्तम्भायै तुलायै नमः"** इत्युच्चार्य पूजयेत्तुलां यथाविधि। चतुर्विंशति-प्रतिमासु जलसंस्थाश्चतुर्विंशति देवता आवाहयेत्, तन्मन्त्राः –

"ॐ ईशानाय नमः ईशानमावाहयामि पूजयामि॥१॥ ॐ शशिने नमः शशिनमावाहयामि पू.॥२॥ ॐ मरुताय नमः मरुतमावा पू.॥३॥ ॐ रुद्राय नमः रुद्रमावा.पू.॥४॥ ॐ सूर्याय नमः सूर्यमावा.

---

१. ग्रस्ते सूर्ये तथा चन्द्रे देवयात्रासरित्तटे। लक्षहोमे विशेषेणात्मानं सन्तोलयेन्नृप॥
भूमिकम्पे तथोल्कायां निर्घातोत्पातदर्शने। दुर्ग्रहग्रहपीडायामात्मानं तोलयेत्तथा॥
आत्मानं तोलयेद् यस्तु तृणैर्वापि कथञ्चन। त्रैलोक्यं तोलितं तेन सर्वकामार्थसिद्धये॥

२. पलाशखदिराश्वत्थदेवदारुशमीमयम्। स्तम्भमेकं प्रकुर्वीत यजमानप्रमाणतः॥

३. अग्न्युत्तारणविधिरग्रे वक्ष्यते।

पू.॥५॥ ॐ विश्वकर्मणे नमः विश्वकर्माणमावा.पू.॥६॥ ॐ गुरवे नमः गुरुमा.पू.॥७॥ अङ्गिरोऽग्निभ्यो नमः अङ्गिरोऽग्नीनावाहयामि पू.॥८॥ ॐ प्रजापतये नमः प्रजापतिमावा.पू.॥९॥ ॐ विश्वेभ्यो देवेभ्यो नमः विश्वान् देवान् आवाहयामि पूजयामि॥१०॥ ॐ धात्रे नमः धातारमावा.पू.॥११॥ ॐ पर्जन्यशम्भुभ्यां नमः पर्जन्यशम्भू आवाहयामि, पू.॥१२॥ ॐ पितृभ्यो नमः पितृनावा.पू.॥१३॥ ॐ सौम्याय नमः सौम्यम् आवा.पू.॥१४॥ॐ धर्माय नमः धर्ममा.पू.॥१५॥ ॐ अमरराजाय नमः अमरराजमा.पू.॥१६॥ ॐ अश्विभ्यां नमः अश्विनौ आ.पू.॥१७॥ ॐ जलेशाय नमः जलेशमा.पू.॥१८॥ ॐ मित्रावरुणाभ्यां नमः मित्रावरुणौ आ.पू.॥१९॥ ॐ मरुद्गणेभ्यो नमः मरुद्गणानावा.पू.॥२०॥ ॐ धनेशाय नमः धनेशमावाहयामि पू.॥२१॥ ॐ विष्णवे नमः विष्णुमावाहयामि पू.॥२२॥

एवं पूजयित्वा यजमानः पुष्पाञ्जलिं गृहीत्वा तुलां त्रिःप्रदक्षिणीकृत्य प्राङ्मुख उपविश्य प्रार्थयेत्–

"ॐ नमस्ते सर्वदेवानां शक्तिस्त्वं सत्यमाश्रिता॥ साक्षिभूता जगद्धात्री निर्मिता विश्वयोनिना॥ एकतः सर्वसत्यानि तथावृतशतानि च। धर्माधर्मकृतां मध्ये स्थापिताऽसि जगद्हिते॥ त्वं तुले सर्वभूतानां प्रमाणमिह कीर्त्तिता॥ मां तोलयन्ती संसारादुद्धरस्व नमोऽस्तु ते॥ योऽसौ तत्त्वाधिपो देवः पुरुषः पञ्चविंशकः॥ स एषोऽधिष्ठितो देवि त्वयि तस्मान्नमो नमः॥ सिद्धिरस्तु क्रियारम्भे वृद्धिरस्तु धनागमे॥ पुष्टिरस्तु शरीरे मे शान्तिरस्तु गृहे मम नमो नमस्ते गोविन्द तुलापुरुषसञ्ज्ञक। हरे तारयसे यस्मात्तस्माच्छान्तिं प्रयच्छ मे॥

इति मन्त्रानुच्चार्य पुष्पाञ्जलिं तुलोपरि क्षिपेत् पुनस्तुलायाः प्रदक्षिणात्रयं कृत्वा वामहस्ते हेमादिनिर्मितां धर्मराजप्रतिमां दक्षिणहस्ते च सुवर्णादिधातु-निर्मितां सूर्यप्रतिमामादाय स्वयं यजमान उत्तर[1] फलके आरोहयेत्। तत आचार्यो दक्षिणफलके तोलनीयद्रव्यमारोपयेत्। सप्तधान्यमनेन मन्त्रेणा–

१. दक्षिणे विन्यसेद् द्रव्यमात्मानं चोत्तरे न्यसेत्॥

ऽऽरोपयेत्– **''ॐ व्रीहश्यच मे यवाश्च मे माषाश्च मे तिलाश्च मे मुद्गाश्च मे खल्वाश्च मे प्रियङ्गवश्च मेऽणवश्च म श्यामाकाश्च मे नीवाराश्च मे मसूराश्च मे यज्ञेन कल्पन्ताम्।''**

ततो रत्नमृत्तिकौषधिधातवश्चाऽनेन मन्त्रेण स्थापयेत्– **''ॐ अश्मा च मे मृत्तिका च मे गिरयश्च मे पर्वताश्च मे वनस्पतयश्च मे हिरण्यं च मे श्यामं च मे लोहं च मे सीसं मे त्रपु च मे यज्ञेन कल्पन्ताम्।''**

अभीष्टप्राप्त्यर्थं तुलायां यथाशक्ति गुडसितालवणवस्त्रादि क्षिपेत्। तदनन्तरं यजमानस्तुलामध्यदण्डस्थितविष्णोर्मुखं पश्यन्मन्त्रौ पठेत्– **''ॐ नमस्ते सर्वभूतानां साक्षिभूते सनातनि। पितामहेन देवि त्वं निर्मिता परमेष्ठिना॥ त्वया धृतं जगत्सर्वं सह स्थावरजङ्गमम्। सर्वभूतात्मभूतस्थे नमस्ते विश्वधारिणि॥''**

इत्यात्मानं गोदोहनकालमात्रं तोलयित्वा ततस्तुलामवतीर्य तोलितद्रव्ये गन्धपुष्पाक्षतै: सह तुलसीदलं निक्षिप्य हस्ते कुशजलतिलाक्षतान्यादाय देशकालौ सङ्कीर्त्य **''ममैश्वर्यक्षेमविजयायुरारोग्यावाप्तये इमान्यात्मसम-सन्तोलितसप्तधान्यादिद्रव्याणि स्वस्वदैवतानि अमुकाऽमुकगोत्रेभ्यो ब्राह्मणेभ्यो दातुमहमुत्सृजे।''**

ततो दक्षिणां प्रतिष्ठाख्यां दद्यात्– **''ॐ अद्य कृतैतद्धृतसप्त-धान्यादि तुलापुरुषदानकर्मण: प्रतिष्ठार्थं हिरण्यमग्निदैवतं अमुकाऽमुक-गोत्रेभ्यो ब्राह्मणेभ्यो दातुमहमुत्सृजे।''** ततो भूयसीदक्षिणाऽपि दातव्या। एतदनन्तरं भगवन्तं विष्णुं मन्त्रैरेभि: प्रणमेत् –

''ॐ नमो ब्रह्मण्यदेवाय गोब्राह्मणहिताय च। जगद्हिताय कृष्णाय गोविन्दाय नमो नम:॥ यच्चापराह्णे मध्याह्ने सायाह्ने च तथा निशि। कायेन मनसा वाचा कृतं पापजानता॥ जानता वा हृषीकेश पुण्डरीकाक्ष माधव॥ नामत्रयोच्चारणान्मे पापं यातु सहस्रधा। यद्बाल्ये यच्च कौमारे यौवने वार्धकेऽपि वा। अन्यजन्मकृतं पापमिह जन्मकृतं च यत्॥ तत्सर्वं नश्यतु क्षिप्रं पुण्यं भवतु चाक्षयम्॥ देवता ऋषयो नागा गन्धर्वाश्चाप्सरोगणा:। हृष्टा पुष्टा इहागत्य शान्तिं कुर्वन्तु मे सदा॥''

तोलितद्रव्याणि ब्राह्मणेभ्यस्त्वरितं दत्त्वा गृहाद् विसर्जयेत् यजमानः शरीरे धृतवस्त्राणि त्यक्त्वा तद् वस्त्राणि नापिताय दत्त्वा शुद्धनववासांसि धारयित्वा हवनब्राह्मणभोजनादिकं कर्म कारयेत्।

॥ इति तुलादानविधिः ॥

अथ शय्यादानविधिः

दाता प्रथमं तावन्नित्यकर्म विधायऽऽचमनादिकं च कृत्वा **"शय्यादानकर्माऽहं करिष्ये** इति सङ्कल्पं कुर्यात्। ततो सुपात्रं ब्राह्मणं वृणुयात्।

"ॐ विष्णुस्वरूपिणे ब्राह्मणाय नमः" इति मन्त्रेण ब्राह्मणस्य चरणौ प्रक्षाल्य पवित्रीरहितपाणिना तिलकं ब्राह्मणस्य मस्तके कुर्यात्– **"ॐ नमो ब्रह्मण्यदेवाय गोब्राह्मणहिताय च। जगद्धिताय कृष्णाय गोविन्दाय नमो नमः॥"** ततो देशकालौ सङ्कीर्त्य **"अमुकगोत्रोऽमुकशर्माऽहं श्रीपरमेश्वराज्ञया सकलशास्त्रश्रुतिस्मृतिपुराणोक्तफलप्राप्तिकामोऽमुककर्मणि अमुकगोत्रम्, अमुक शर्माणं ब्राह्मणं वरणद्रव्यैस्त्वामहं वृणे।"** ततो ब्राह्मणो **वृतोऽस्मीति** ब्रूयात्।

ततः परिच्छदादिवस्त्रैरलङ्कृतायां सोपधानायां शय्यायां शिरो[१] भागे विष्णुप्रतिमां निधाय षोडशोपचारैः पञ्चोपचारैर्वा पूजयेत्। ततोऽक्षतान् गृहीत्वा **"ॐ शय्यायै नमः। ॐ शय्यायै नमः। ॐ शय्यायै नमः।** इति मन्त्रैस्त्रिबारमक्षतान् क्षिपेत्। ततः कुशजलाक्षतं गृहीत्वा **"ॐ अद्य सोपकरणं अमुककर्मणि एतच्छय्यादानं ददानि।"** इति कृत्वा ब्राह्मणकरे जलं दद्यात्। **"ॐ ददस्वे"**ति ब्राह्मणो वदेत्। ततो देशकालौ सङ्कीर्त्य **"मम समस्तपापक्षयपूर्वकविष्णुलोकप्राप्तिकामनया सालङ्कारामिमां शय्यां नारायणप्रतिमासहितां विष्णुदैवताय अमुकगोत्राय अमुकशर्मणे सुपूजिताय सपत्नीकाय ब्राह्मणाय तुभ्यमहं सम्प्रददे न मम।"** इति पठित्वा ब्राह्मणहस्ते साक्षतकुशजलं क्षिपेत्। ततो दक्षिणां दत्त्वा शय्यां प्रार्थयेत्–

---

१. शय्या पूर्वशिरस्का च सर्वस्मिन् शुभकर्मणि।
विवाहे दक्षिणे ज्ञेया मृते चोत्तरसंस्थिता॥

ॐ यथा न कृष्णशयनं शून्यं सागरजातया।

तथा शय्या ममाप्यस्त्वशून्या जन्मनि जन्मनि।। ततः सपत्नीकाय ब्राह्मणाय मिष्ठान्नं फलं ताम्बूलादिकं च दत्त्वा वस्त्रालङ्कारकं च परिधाप्य ब्राह्मणं दक्षिणाङ्गुष्ठेन गृहीत्वा शय्यायामुपवेशयेत्। घृतेन ब्राह्मणस्य दक्षिणजानुं मर्दयेत्। ततो ब्राह्मणशय्याप्रदक्षिणापुरस्सरं प्रार्थनां कृत्वा यजमानः ब्राह्मणं विसर्जयेत्। सा शय्या त्वरितमेव दात्तव्या।

॥ इति शय्यादानम् ॥

अथ छायादानविधिः

दाता यजमानो देशकालादिकं स्मृत्वा ''**अमुकगोत्रोत्पन्नोऽमुकशर्माहं श्रीमहाकालमृत्युञ्जयदेवताप्रीत्यर्थं सकलारिष्टाऽकालमृत्युरोगग्रहशान्त्यर्थं छायापात्रदानमहं करिष्ये।**'' इति सङ्कल्प्याऽनुष्ठाने महामृत्युञ्जयं शिवं सम्पूज्य कास्यपात्रे द्वे आदायैकस्मिन्तैलमपरस्मिंश्च गोघृतं पूरयेत्। ततो द्वे पात्रे तिलानामुपरि संस्थापयेत्। ततः सपत्नीको यजमानः स्वमुखं प्रथमं तैलपात्रेऽवलोकयेदनेनमन्त्रेण– ''**ॐ शन्नो देविरभिष्टय आपो भवन्तु पीतये। शं योरभिस्रवन्तु नः।**'' मुखमवलोक्य पात्रे किञ्चिद् दक्षिणाद्रव्यं क्षिप्त्वा नापिताय पात्रं दद्यात्। द्वितीयं पात्रमादाय घृते स्वकीयं मुखं दृष्ट्वा मन्त्रमिमं पठेत्– ''**ॐ आज्यं सुराणामाहारमाज्यं पापहरं परम्। आज्यमध्ये मुखं दृष्ट्वा सर्वपापैः प्रमुच्यते।। घृतं नाशयते व्याधिं घृतं च हरते रुजम्। घृतं तेजोऽधिकरणं घृतमायुः प्रवर्द्धते।।**''

इत्यनेन मुखं दृष्ट्वा हिरण्यं द्रव्यं वा पात्रे प्रक्षिपेत्। ततः ''**ॐ घृतच्छायापात्राय नमः।**'' गन्धपुष्पादिभिस्तत्पात्रं पूजयेत्। देशकालौ सङ्कीर्त्य ''**अमुकदेवप्रीतिपूर्वकं सोपकरणच्छायापात्रदानं करिष्ये।**'' इति पठित्वा ब्राह्मणकरे जलाक्षतपुष्पाणि क्षिपेत्।

ततो देशकालौ सङ्कीर्त्य ''**अमुकगोत्रोत्पन्नोऽहं प्रसिद्धश्चामुक-नामधेयशर्मा सपत्नीकोऽहं परिवारेण सह दीर्घायुरारोग्यसौभाग्यप्राप्तये सर्वपापोपशमनानन्तरजन्मराशेः सकाशान्नामराशेः सकाशाद्वा जन्मलग्ना-द्वर्षलग्नाद्गोचराद्वा ये ग्रहाश्चतुर्थाष्टमद्वादशाद्यनिष्टस्थानगतास्तैः सूचितं**

सूचयिष्यमाणञ्च यत्सर्वारिष्टं तद्विनाशाय ग्रहाणां चोत्तमफलप्राप्त्यर्थं कांस्यपात्रोपहितं घृतविन्दुकणिकासमसङ्ख्यावच्छिन्ननैरुज्यचिरञ्जीवित्वकामैतत्स्वशरीरच्छायावलोकितघृतपूर्णं कांस्यपात्रं रत्नद्रव्यादियुतं सुपूजितं श्रीमहाकालमृत्युञ्जयदेवताप्रीत्यर्थं चन्द्रप्रजापतिजीवदैवतं यथानामगोत्राय ब्राह्मणाय दातुमहमुत्सृजे।'' इति पठित्वा दक्षिणासहितं तद्घृतपात्रं ब्राह्मणाय दत्त्वा प्रार्थनां कुर्यात् -

''ॐ यानि कानि च पापानि मया सर्वं कृतानि च। छायापात्रप्रदानेन तानि नश्यन्तु मे सदा॥ यत्कृतं मे स्वकायेन मनसा वचसा त्वघम्। तत्सर्वं नाशमायातु छायापात्रप्रदानतः॥'' इत्युच्चार्य सूर्यं दृष्ट्वा मनसाऽनेन मन्त्रेण प्रार्थयेत् – **''ॐ दानेनाऽनेन मा सन्तु सर्वे रोगादयो मम। आयुरारोग्यमैश्वर्यं प्रददातु दिवाकरः॥''** एवं कृत्वा ब्राह्मणाय छायापात्रं दत्त्वा यथाविधि विसर्जयेत्।

॥ इति छायादानविधिः ॥

अथ जन्मोत्सवविधानम्

जन्मदिवसे[1] स्त्रीपुत्रादिसहितो यजमानो ब्राह्मे मुहूर्त्त उत्थाय तिलतण्डुलचूर्णमिश्रितगङ्गाजलेन शीतो[2]दकेन च स्नात्वा नित्यक्रियां कृत्वा नवाभरणवासोभिः शरीरमलङ्कृत्य गृहे शुभासने पूर्वाभिमुख उपविश्य स्वदक्षिणतः पत्नीं तस्या दक्षिणतो बालकं चोपवेश्य पवित्रीं धृत्वाऽऽचमनादिकं च कृत्वा दक्षिणकरे पुष्पजलाक्षतमादाय देशकालौ सङ्कीर्त्य **''मम शिशोर्दीर्घायुःश्रीतेजोवृद्धिद्वारा श्रीपरमेश्वरप्रीत्यर्थमद्य दिने जन्मवर्धापनाख्यं कर्म करिष्ये॥'' ''तन्निर्विघ्नतार्थं श्रीगणेशादिपूजनं करिष्ये।''** तदनन्तरं यज्ञीयकाष्ठपीठे पंक्तिरूपेणैकविंशत्यक्षतपुञ्जेषु देवतानामधोलिखितमन्त्रैरावाहनं कुर्यात् -

---

१. खण्डनं नखकेशानां मैथुनाध्वगमौ तथा।
आमिषं कलहं हिंसा वर्षवृद्धौ विवजयेत्॥

२. मृते जन्मनि सङ्क्रान्तौ श्राद्धे जन्मदिने तथा।
अस्पृश्यस्पर्शने चैव न स्नायादुष्णवारिणा॥

"ॐ श्रीगणपतये नमः श्री गणपतिमावाहयामि॥१॥ ॐ कुलदेवतायै नमः कुलदेवतामा.॥२॥ ॐ प्रजापतये नमः प्रजापतिमा.॥३॥ ॐ विष्णवे नमः श्रीविष्णुमा.॥४॥ ॐ महेश्वराम नमः महेश्वरमा.॥५॥ ॐ इष्टदेव्यै नमः इष्टदेवीमा.॥६॥ ॐ सूर्याय नमः सूर्यमा.॥७॥ ॐ जन्मनक्षत्राय नमः जन्मनक्षत्रमा.॥८॥ ॐ षष्ठीदेव्यै नमः षष्ठीदेवीमा.॥९॥ ॐ मार्कण्डेयाय नमः मार्कण्डेयमा.॥१०॥ ॐ अश्वत्थाम्ने नमः अश्वत्थामानमा.॥११॥ ॐ बलये नमः बलिमा.॥१२॥ ॐ व्यासाय नमः व्यासमा.॥१३॥ ॐ विभीषणाय नमः विभीषणमा.॥१४॥ ॐ कृपाचार्याय नमः कृपाचार्यमा.॥१५॥ ॐ परशुरामाय नमः परशुराममा.॥१६॥ ॐ बलभद्राय नमः बलभद्रमा.॥१७॥ ॐ हनुमते नमः हनुमन्तमा.॥१८॥ ॐ स्थानदेवतायै नमः स्थान देवतामा.॥१९॥ ॐ वास्तुदेवतायै नमः वास्तुदेवतामा.॥२०॥ ॐ क्षेत्रपालाय नमः क्षेत्रपालमा.॥२१॥

इति देवतानामावाहनं कृत्वा **"ॐ आवो देवा स ईमहे यामं प्रयत्यध्वरे। आवो देवा स आशिषो यज्ञियासो हवामहे ॐ भूर्भुवः स्वः श्रीगणपत्याद्यावाहितदेवताः सुप्रतिष्ठिता वरदा भवन्तु।"** इत्युच्चार्याऽक्षतं क्षिपेत्॥ ततो देवतानामेतेषां पञ्चोपचारेण पूजनं कृत्वा षष्ठीदेव्यै दधिभक्तनैवेद्यं निवेद्य प्रार्थनां कुर्यात् – **"ॐ जय देवि जगन्मातर्जगदानन्दकरिणि। प्रसीद मम कल्याणि महाषष्ठि नमोऽस्तु ते॥"**

ततोऽग्निमाम्रपलाशखदिरसमिद्भिः समाधाय पूजितदेवतानां प्रणवाद्यैः स्वाहान्तैश्चतुर्थ्यन्तनामभिस्तिलैः पञ्चखाद्यैः पायसैर्वा हवनं कुर्यात्। पुरुषसूक्तमन्त्रै रात्रिसूक्तमन्त्रैश्च जुहुयात्। ततः पायसेन **"ॐ सर्वेभ्यो देवेभ्यो नमः बलिं समर्पयामि।"** इति कथयित्वा बलिं पलाशपत्रे निदध्यात्। ततो गन्धकुङ्कुमैर्बालकमस्तके तिलकं कारयित्वा मन्त्रैरेतैरक्षतपुष्पाणि बालकस्योपरि क्षिपेत् आशिषं च दद्यात् – **"ॐ मार्कण्डेयाय मुनये नमस्ते महदायुषे। चिरञ्जीवी यथा त्वं भो भविष्यामि तथा मुने॥ रूपवान् वित्तवानायुः श्रिया युक्तं शिशुं कुरु। चिरञ्जीवी यथा त्वं**

भो मुनीनां प्रवरो द्विज॥ कुरुष्व मुनिशार्दूल! मच्छिशुं चिरजीविनम्॥ त्रैलोक्ये यानि भूतानि स्थावराणि चराणि च। ब्रह्मविष्णुशिवैः सार्द्धं रक्षां कुर्वन्तु तानि ते॥ अश्वत्थामा बलिर्व्यासो हनुमांश्च विभीषणः। कृपः परशुरामश्च सप्तैते चिरजीविनः॥ सप्तैतांश्च स्मरेन्नित्यं मार्कण्डेयमथाष्टमम्॥ जीवेद्वर्षशतं साग्रमपमृत्युविवर्जितः॥ ॐ श्रीर्वर्चस्वमायुष्यमारोग्यमाविधात्पवमानं महीयते। धनं धान्यं पशुं बहुपुत्रलाभं शतसंवत्सरं दीर्घमायुः॥

ततो बालकस्तिलगुडमिश्रितं दुग्धं पिबेत्। तन्मन्त्रः – **"ॐ सगुडं तिलसम्मिश्रमञ्जल्यर्धमितं पयः। मार्कण्डेयाद्वरं लब्ध्वा पिबाम्यायुर्विवृद्धये॥"** इति पयः पानं कृत्वा मातापितृगुर्वाचार्यादीन् प्रणम्याऽऽशीर्वादं गृह्णीयात्। ततो दानपारितोषिकादिकं दत्त्वा विप्रमित्र- परिवारजनेभ्यो भोजनं दद्यात्। **इति जन्मदिनोत्सवविधानम्॥**

अथ रात्रिशयनविधिः

सायङ्काले सन्ध्यादिकार्यं कृत्वा प्रागुदङ्मु[1] खं दीपं[2] प्रज्वाल्य मन्त्रं पठेत् – **"ॐ शुभं करोतु कल्याणमारोग्यं सुखसम्पदः। मम बुद्धिप्रकाशाय सन्ध्यादीप नमोऽस्तु ते॥** ततः पश्चाल्लघ्वाहारं कृत्वा शास्त्रीयग्रन्थावलोकनं पुराणादिपठनमावश्यकं किञ्चित्कार्यं वा कर्त्तव्यं प्रथमे यामे। ततः शयनात् प्राग्दन्तमञ्जनादिना दन्तशुद्धिं विधायाऽऽवश्यकीं क्रियाञ्च कृत्वा शुद्धो भूत्वा जलपूर्णपात्रं शय्याया अधस्ताच्छिरोभागे निधाय मन्त्रमिमं पठेत् – **"ॐ आरात्रिपार्थिवꣳरजः पितुरप्रायि धामभिः दिवा सदाꣳसि वृहतीवितिष्ठ स आत्वेष वर्तते तमः उषस्तच्चित्रमाभरास्मभ्यं व्वाजिनीवति। येन तोकञ्च तनयञ्च धामहे॥ ॐ तिस्रो भार्याः कफल्लस्य दाहिनी मोहिनीसती। तासां स्मरणमात्रेण चौरो गच्छति**

---

१. आयुर्दः प्राङ्मुखो दीपो धनदः स्यादुदङ्मुखः।
प्रत्यङ्मुखो दुःखदोऽसौ हानिदो दक्षिणामुखः॥

२. दीपनिर्वापणात्पुंसः कूष्माण्डच्छेदनात्स्त्रियः।
अचिरेणैव कालेन वंशनाशो भवेद् ध्रुवम्॥

निष्फलः॥ ॐ अगस्तिर्माधवश्चैव मुचुकुन्दो महाबलः। कपिलो मुनिरास्तीकः पञ्चैते सुखशायिनः॥ ॐ नमो नन्दीश्वराय॥ ॐ रात्रि देवतायै नमः॥ ॐ नारायणाय नमः॥'' इति देवतानां स्मरणं कृत्वेष्टदेवतां वा नमस्कृत्य सुशय्यायां प्राच्यां याम्यायां[१] वा शिरः कृत्वा पवित्रो भूत्वाऽनार्द्र-करपादोऽनग्नोऽतैलाभ्यक्तशिराः स्वपेत्[२] निद्राकाले न मुखमवगुण्ठयेत् ताम्बूलं च रात्रौ त्यजेत्॥

॥ इति रात्रिशयनविधिः ॥

अथ श्राद्धविधिः

स्नात्वाऽऽचमनादिकं च कृत्वा देशकालौ सङ्कीर्त्य ''**मम समस्त-पितॄणामसद्गतीनां सद्गतिप्राप्तिपूर्वकाऽक्षयतृप्तिहेतवे सद्गतीनां च श्रीविष्णुलोकप्राप्तये पिण्डदानादिपुरस्सरममुकश्राद्धमहं करिष्ये।**'' इति सङ्कल्पं कृत्वा श्राद्धं कुर्यात्। मृतकान् पितॄनुद्दिश्य श्रद्धया यद्भोज्यं दीयते शास्त्रविधिना, तदेवश्राद्धं भवति–

प्रेतं पितॄंश्च निर्दिश्य भोज्यं यत्प्रियमात्मनः।
श्रद्धया दीयते यत्र तच्छ्राद्धं परिकीर्त्तितम्॥

श्राद्धस्य कतिपये भेदाः सन्ति। किन्त्वत्र चत्वारो भेदा एवोच्यन्ते–

१. पार्वणश्राद्धम्।[३]

२. एकोद्दिष्टश्राद्धम्।[४]

---

१. प्राच्यां दिशि शिरः शस्तं याम्यायामथवा नृप।
सदैव स्वपतः पुंसो विपरीतं तु रोगदम्॥ (वि.पु.)

२. शून्यालये श्मशाने च एकवृक्षे चतुष्पथे। महादेवगृहे वापि मातृवेश्मनि न स्वपेत्॥
न यक्षनागायतने स्कन्दस्यायतने तथा। कूलच्छायासु च तथा शर्करालोष्ठपांसुषु॥
न स्वपेच्च तथा भूमौ विना दीक्षां कदाचन। धान्यगोधनविप्राणां गुरूणां च तथोपरि॥

३. अमावस्यां यत्क्रियते तत्पार्वणमिति स्मृतम्। क्रियते वा पर्वणि यत्तत्पार्वणमिति स्थितिः॥

४. एकोद्दिष्टं तु कर्त्तव्यं पित्रोश्चैव मृतेऽहनि।
सपिण्डीकरणादूर्ध्वमेकोद्दिष्टं विधीयते।
अपुत्राणां च सर्वेषामपत्नीनां तथैव च॥

३. तीर्थश्राद्धम्।[१]

४. नान्दीमुखश्राद्धम्।[२]

अथ नान्दीमुखश्राद्धविधिः

एकस्मिन् पलाशपत्रावलिमध्ये चतुःस्थानेषु प्रदक्षिणक्रमेण सरलान् कुशान् आस्तीर्य तदुपरि सव्यं[३] विधाय **'नान्दीमुखश्राद्धमहं करिष्ये'** इति देशकालौ सङ्कीर्त्य सङ्कल्पं कुर्यात्। दक्षिणकरस्थलमङ्गुष्ठद्वारेण मन्त्रेणाऽनेन पत्रावलिस्थितकुशोपरि क्षिपेत्– **"ॐ सत्यवसुसञ्ज्ञका विश्वदेवा नान्दीमुखाः भूर्भुवः स्वः इदं वः पाद्यं पादावनेजनं पादप्रक्षालनं वृद्धिः॥"** एवमेव द्वितीयकुशोपरि जलं दद्यात्– **"ॐ मातृपितामहि-प्रपितामह्यः नान्दीमुख्यः भूर्भुवः स्वः इदं वः पाद्यं पादावनेजनं पादप्रक्षालनं वृद्धिः।** तथा तृतीय कुशोपरि **"ॐ पितृपितामहप्रपितामहा नान्दीमुखाः भूर्भुवः स्वः इदं वः पाद्यं पादावनेजनं पादप्रक्षालनं वृद्धिः।"** इत्युच्चार्य जलं क्षिपेत्। ततश्चतुर्थकुशोपरि **"ॐ मातामहप्रमाता-महवृद्धप्रमातामहाः सपत्नीका नान्दीमुखाः भूर्भुवः स्वः इदं वः पाद्यं पादावनेजनं पादप्रक्षालनं वृद्धिः।** इति मन्त्रेण जलं दद्यात्।

ततः विश्वेदेवादीनामासनार्थं तच्चतुर्षु स्थानेषु पूर्वपठितमन्त्रान् **'भूर्भुवः स्वः'** पर्यन्तमुच्चार्य **"इमे आसने वो नमो नमः"** इति पठित्वा आसनरूपं कुशं स्थापयेत्। तदनन्तरं चतुर्षु स्थानेषु पूर्वोक्तानेव मन्त्रान् **'भूर्भुवः स्वः'** पर्यन्तं पठित्वा **"इदं गन्धाद्यर्चनं स्वाहा सम्पद्यतां वृद्धिः।** इत्युच्चार्य गन्धाक्षतपुष्पैः पूजनं कुर्यात्।

---

१. तीर्थमुद्दिश्य यच्छ्राद्धं तीर्थश्राद्धं तदुच्यते।

२. नान्दीश्राद्धं पिता कुर्यादाद्ये पाणिग्रहे पुनः।
अत ऊर्ध्वं प्रकुर्वीत स्वयमेव तु नान्दिकम्॥
पित्रोस्तु जीवितोः कुर्यात्पुनः पाणिग्रहं यदा।
पितुर्नान्दीमुखश्राद्धं नोक्तं तस्य मनीषिणः॥

३. अनस्मद् बृद्धशब्दानामरूपाणामगोत्रिणाम्।
अनाम्नामतिलाद्यैश्च नान्दीश्राद्धं च सव्यवत्॥

तत्पश्चात् तच्चतुर्षु स्थानेषु पूर्वोक्तान् मन्त्रानेव **'भूर्भुवः स्वः'** पर्यन्तं पठित्वा **''इदं युग्मब्राह्मणभोजनपर्याप्तमामान्ननिष्क्रयभूतं द्रव्यममृतरूपेण स्वाहा सम्पद्यतां वृद्धिः''** इत्युच्चार्य दक्षिणां दद्यात्। ततः पूर्वोक्तचतुर्षु स्थानेषु दुग्धमिश्रितजलं दक्षिणहस्ते गृहीत्वाऽङ्गुष्ठद्वारेण क्षिपेत् –

''ॐ सत्यवसुसञ्ज्ञका विश्वेदेवा नान्दीमुखाः प्रीयन्ताम्। ॐ मातृपितामहप्रपितामह्यः नान्दीमुख्यः प्रीयन्ताम् ॐ पितृपितामह-प्रपितामहा नान्दीमुखाः प्रीयन्ताम्। ॐ मातामहप्रमातामहवृद्धप्रमातामहाः सपत्नीका नान्दीमुखाः प्रीयन्ताम्।''

ततश्चतुर्षु स्थानेषु **''ॐ शिवा आपः सन्तु''** इति पठित्वा दक्षिणहस्ताङ्गुष्ठभागेन जलं दद्यात्। **''ॐ सौमनस्यमस्तु''** इत्युच्चार्य पुष्पाणि दद्यात्। **''ॐ अक्षतं चाऽरिष्टं चाऽस्तु।''** इत्यनेनाऽक्षतान् दद्यात्।

तत्पश्चादञ्जलौ जलं संस्थाप्य ''ॐ अघोराः पितरः सन्तु'' इत्युच्चार्य चतुर्षु स्थानेषु पूर्वाग्रां जलधारामंगुष्ठद्वारा दद्यात्।

ततो यजमानो बद्धाञ्जलिर्भूत्वा – **''ॐ गोत्रं नो वर्द्धतां दातारो नोऽभिवर्धन्ताम्, वेदाः सन्ततिरेव च। श्रद्धा च नो मा व्यगमद् बहुदेयत्वं च नोऽस्तु। अन्नं च नो बहु भवेदतिथींश्च लभेमहि। याचितारश्च नः सन्तु मा च याचिष्म कञ्चन। एताः सत्या आशिषः सन्तु''** इति पठित्वा प्रार्थनां कुर्यात्। **''सन्त्वेताः सत्या आशिष''** इति ब्राह्मणा वदेयुः।

ततो मन्त्रमिममुच्चार्य नान्दीमुखेभ्यो मातृपित्रादिभ्यो दक्षिणां दद्यात्– **''ॐ मातृपित्रादयो नान्दीमुखाः भूर्भुवः स्वः कृतैतन्नान्दीश्राद्धस्य फलप्रतिष्ठासिद्ध्यर्थं द्राक्षाऽऽमलकयवमूलनिष्क्रयिणीं दक्षिणां दातुमहमुत्सृजे।''** यदि द्राक्षाऽऽमलकयवादयो भवेयुस्तर्हि दक्षिणास्थाने द्राक्षाऽऽमलकयवादीन् समर्पयेत्।

तदनन्तरं यवसिद्धार्थकफलदूर्वाजलकुशचन्दनपुष्पयुतमर्घपात्रं दक्षिणहस्ते गृहीत्वा **''ॐ उपास्म गायता नर पवमानायेन्दवे। अभिदेवा इयक्षते। ॐ इडामग्ने पुरुदꣳसꣳ सनिङ्गोः शश्वत्तमꣳ हवमानाय**

साध। स्यान्नः सूनुस्तनयो विजावाऽग्ने सा ते सुमतिर्भूत्वस्मे।'' अनेन मन्त्रेण चतुर्षु स्थानेषु दद्यादर्ध्यम्।

ततो हस्ते पुष्पाण्यादाय प्रार्थयेत्– ''ॐ माता पितामही चैव तथैव प्रपितामही। पिता पितामहश्चैव तथैव प्रपितामहः। मातामहस्तत्पिता च प्रमातामहकादयः। एते भवन्तु सुप्रीताः प्रयच्छन्तु च मङ्गलम्।''

ततो यजमानहस्ते जलमादाय ''अनेन नान्दीश्राद्धं सम्पन्नम्'' इत्युक्त्वा भूमौ जलं क्षिपेत्। ब्राह्मणाश्च ''सुसम्पन्नं नान्दीश्राद्धम्'' इति वदेयुः।

तत्पश्चात् ''ॐ वाजे वाजे वत वाजिनो नो धनेषु विप्रा अमृता ऋतज्ञाः। अस्य मध्वः पिबत मादयध्वं तृप्ता यात पथिभिर्देवयानैः॥ आ मा वाजस्य प्रसवो जगम्यादेमे द्यावापृथिवी विश्वरूपे। आ मा गन्तां पितरो मातरा चामा सोमोऽमृतत्वेन गम्यात्। ॐ विश्वे देवाः प्रीयन्ताम्।'' इत्युक्त्वा विसर्जनं कुर्यात्।

तदनन्तरं तां पत्रावलिं चतुर्षु भागेषु परिवेष्ट्य रक्तसूत्रेण सम्बद्धय च षोडशमातृकासमीपे मण्डपे तां पत्रावलिं स्थापयेत्।

॥ इति नान्दीश्राद्धविधिः ॥

अथ पार्वण[१] श्राद्धम्

सर्वप्रथमं श्राद्धकर्ता स्नात्वा शुक्लवाससी परिधाय श्राद्धभूमिमागत्य दक्षिणाभिमुख उपविश्य ॐ अपवित्रः पवित्रो इत्यनेन मन्त्रेण पवित्रोभूत्वा–सव्येनाचमेत्॥ ॐ अपवित्रः पवित्रो वा सर्वावस्थांगतोऽपिवा। यः स्मरेत् पुण्डरीकाक्षं स बाह्याभ्यन्तरः शुचिः। पवित्रीधारणम्। ततः सङ्कल्पं कुर्य्यात्॥

अथ सङ्कल्पः ॥ ॐ तत्सदद्यैतस्य ब्रह्मणोऽह्नि द्वितीयपरार्द्धे श्रीश्वेतवाराहकल्पे वैवस्वतमन्वन्तरे अष्टाविंशतितमे कलियुगे कलि

---

१. एकमुद्दिश्य यच्छ्राद्धमेकोद्दिष्टं प्रचक्षते। त्रीनुद्दिश्य तु यत्तद्धि पार्वणं मुनयो विदुः॥

प्रथमचरणे जम्बूद्वीपे भरतखण्डे आर्यावर्तैकदेशे पुण्यक्षेत्रे अमुक नाम सम्वत्सरे श्रीसूर्य्ये अमुकायने अमुकऋतौ अमुकमासे अमुकपक्षे अमुकतिथौ अमुकवासरे श्रुतिस्मृतिपुराणोक्तशुभपुण्यफलप्राप्तिकाम: पित्रादित्रयमातामहादित्रयश्राद्धसम्बन्धिनां पुरुरवार्द्रवसुनाम्नां विश्वेषान्देवानां ततोऽपसव्यं अमुकगोत्राणां अस्मत्पितृपितामहप्रपितामहानां अमुकामुकाशर्म्मणां वसुरूद्रादित्यस्वरूपाणां सपत्नीकानां अमुकामुकामुकशर्म्मणां अग्निवरुणप्रजापतिस्वरूपाणां सपत्नीकानां, सव्यं अमुकगोत्रोऽमुकशर्मा पितृतृप्तिकामोऽहं विश्वेदेवपूर्वकं पार्वणं[१] श्राद्धं करिष्ये।

यवाक्षतान् गृहीत्वा विश्वेदेवान् आवाहयेत्। अस्मत् पित्रादित्रय मातामहादित्रयश्राद्धसम्बन्धिनां पुरूरवार्द्रवसुनाम्नां विश्वेदेवान् आवाहयिष्ये। **ॐ आगच्छन्तु महाभागा विश्वेदेवा महाबला:। ये यत्र योजिता: श्राद्धे सावधाना भवन्तु ते॥**

तुलसीपूगीफलकुशगंधपुष्पयवाक्षतान् गृहीत्वा विश्वेदेवान्निमन्त्रयेत्। **अस्मत्पित्रादित्रयमातामहादित्रयश्राद्धसम्बन्धिनां पुरूरवार्द्रवसुनाम्नां विश्वेषान्देवानां स्थाने अद्य कर्तव्ये श्राद्धे भवन्तो मया निमन्त्रिता: आमन्त्रिता:स्म:॥** एवं द्वितीयमपि।

ततोहस्तद्वयं संपुटीकरणम्। **ॐ अक्रोधनै: शौचपरै: सततं ब्रह्मचारिभि:॥ भवितव्यं भवद्भिश्च मया च श्राद्धकर्मणि। सर्वायास विनिर्मुक्तै: कामक्रोधविवर्जितै:। भवितव्यं भवद्भिश्च मया च श्राद्धकर्मणि॥**

ततोऽपसव्यं तिलाक्षतान् गृहीत्वा पितृब्राह्मणान् आवाहयेत्। **ॐ अमुकगोत्रान् अस्मत्पितृपितामहप्रपितामहान् अमुकामुकामुकशर्मणोवसु-**

---

१. तमिस्रपक्षे नवमी पुण्या भाद्रपदे हि सा।
चत्वार: पार्वणा: कार्या: पितृपक्षे मनीषिभि:।
एकोद्दिष्टं यतेर्नास्ति त्रिदण्डग्रहणादिह।
सपिण्डीकरणाभावात्पार्वणं तस्य सर्वदा॥

रूद्रादित्यस्वरूपान् सपत्नीकान् आवाहयिष्ये। उशन्तस्त्वनिधीमहे उशंतः समिधीमहि। उशन्नुशत आवाहपितृन् हविषेअत्तवे।

अमुकगोत्रान् अस्मन्मातामहप्रमातामहवृद्धप्रमातामहान् अमुकामुकामुकशर्मणोऽग्नि वरुणप्रजापतिस्वरूपान् सपत्नीकान् आवाहयिष्ये॥

पितृब्राह्मणान्निमन्त्रयेत् तिलाक्षतपूगीफलतुलसीपुष्पगंधकुशतांबूलानि गृहीत्वा ॐ आयान्तु नः पितरः सोम्यासोऽग्निष्वात्तः पथिभिर्देवयानैः अस्मिन् यज्ञस्वधयामदन्तोऽधि ब्रुवन्तु तेऽवन्त्वस्मान्। अमुकगोत्राणां अस्मत् पितृपितामहप्रपितामहानाममुकामुकामुकशर्मणां वसुरुद्रादित्यस्व-रूपाणां सपत्नीकानां अद्यकर्त्तव्यश्राद्धे भवन्तो मया निमन्त्रिता आमन्त्रिताः स्मः॥ततो हस्तद्वयं सम्पुटीकृत्य 'अक्रोधनैः' इति मन्त्रं पठेत्।

एवं मातामहब्राह्मणान्निमन्त्रयेत् अमुक गोत्राणां अस्मन्मातामह-प्रमातामहवृद्धप्रमातामहानां अमुकामुकामुकशर्मणां अग्निवरुणप्रजापति-स्वरूपाणां सपत्नीकानां अद्य कर्त्तव्ये श्राद्धे भवन्तो मया निमन्त्रिताः आमन्त्रिताःस्मः।

ततः सव्यीभूय पादप्रक्षालनं कुर्यात्-विश्वेदेवा ब्राह्मणा आगताः सुस्वागतम्पादप्रक्षालनं वै। नमोऽस्त्वनन्ताय सहस्त्रमूर्तये सहस्त्रपादाक्षि-शिरोरुबाहवे। सहस्त्रनाम्ने पुरुषाय शाश्वते सहस्त्रकोटियुगधारिणे नमः। नमः कमलनाभाय नमस्ते जलशायिने[१] नमस्ते केशवानंत वासुदेव नमोऽस्तु ते।

ततः साक्षतगन्धपुष्पकुशयवतिलार्घ्यपात्रमादाय। ॐ सहस्त्रशीर्षा पुरुषः सहस्त्राक्षः सहस्त्रपात्। सभूमिꣳसर्वत्तस्पृत्वात्यतिष्ठद्दशाङ्गुलम्। अस्मत् पित्रादित्रयमातामहादित्रयश्राद्ध-सम्बन्धिनो विश्वेदेवा एषपादार्घ्यः प्रीयन्तां वो नमः॥

---

१. पवित्रदर्भसङ्ख्याः–सप्तभिर्दर्भपिञ्जूलैः कुर्यात् ब्राह्मणपवित्रकम्।
पञ्चभिः क्षत्रियस्यैव चतुर्भिस्तु तथा विशः॥द्वाभ्यां शूद्रस्य विहितमन्तराणां तथैव च॥

ततोऽपसव्यम्– **आगतं वः सुस्वागतम् पितृब्राह्मणानां पादप्रक्षालनम्। यत्फलं कपिलादाने कार्तिक्यां ज्येष्ठपुष्करे। तत्फलं पाण्डवश्रेष्ठ विप्राणां पादशौचने॥ विप्रपादोदकक्लिन्ना यावत्तिष्ठति मेदिनी। तावत्पुष्करपात्रेषु पिबन्ति पितरो जलम्॥**

एवम् मातामहब्राह्मणानां पादप्रक्षालनं कुर्यात्।

पुनः अर्घ्यपूर्णपात्रं पूजयेत्। **तिलाक्षतगन्धपुष्पकुशजलार्घपात्रमादाय अमुकगोत्राः अस्मत्पितृपितामहप्रपितामहाः अमुकामुकशर्माणो वसुरुद्रादित्यस्वरूपा सपत्नीकाः एष पादार्घ त्रेधा विभज्य युष्मभ्यं स्वधा॥**

अमुकगोत्राः अस्मन्मातामहप्रमातामहवृद्धप्रमातामहाः अमुकामुकशर्माणो अग्निवरुणप्रजापतिस्वरूपाः सपत्नीकाः एष पादार्घस्त्रेधा विभज्य युष्मभ्यं स्वधा॥

सब्यम् आचमनम्[१]॥ **विश्वेदेवा इदमासनमास्यताम् आस्ये॥** अपसब्यम्॥ **पितृ ब्राह्मणाः इदमासनमास्यताम् आस्ये॥ मातामहब्राह्मणा इदमासनमास्यताम् आस्ये।** सब्यं आचमन्॥ गृहदीप- प्रज्वालनम्॥ कुशेन आत्मासनम्॥ कर्मपात्रस्य आसनं स्ववामे कर्मपात्रस्थापनम्॥

पात्रे पवित्रीकरणम्– **पवित्रेस्थो वैष्णव्यौ सवितुर्वः प्रसव उत्पुनाम्यच्छिद्रेण पवित्रेण सूर्यस्य रश्मिभिः तस्य ते पवित्रपते पवित्र पूतस्य यत्कामः पुनेतच्छकेयम्॥**

ततो जलप्रक्षेपः– **यवोऽसि यवयास्मद्द्वेषो यवयारातीदिवे त्वा अन्तरिक्षाय त्वा पृथिव्यैत्वा सुन्धतां लोकाः पितृषदनाः पितृषदनमसि॥** तिलप्रक्षेपः- **तिलोऽसि सोमदैवत्यो गोसवो देवनिर्मितः। प्रयत्नमद्भिः प्रकृतास्वधया पितृल्लोकान् प्रीणीहि न स्वाहा॥** तुलसीचन्दनाक्षतपुष्पञ्च कर्मपात्रे प्रक्षेपः॥

---

१. सपवित्रेण हस्तेन कुर्यादाचमनक्रियाम्। (मार्कण्डेय)
सपवित्रः सदर्भो वा कर्माङ्गे पितृकर्मणि।
अशून्य तु करं कृत्वा सर्वत्राचमनं चरेत्॥ (कात्यायनः)

कर्मपात्रजलेन कुशैः[१] सर्वत्र सेचनम्। ॐ अपवित्रः पवित्रो वा सर्वावस्थां गतोऽपि वा। यः स्मरेत् पुण्डरीकाक्षं स बाह्याभ्यन्तरः शुचिः॥

हस्तौ संयोज्य पठेत्। सप्तव्याधा दशार्णेषु मृगाः कालञ्जरे गिरौ। चक्रवाका सरद्द्वीपे हंसा सरसि मानसे। तेऽपि जाता कुरूक्षेत्रे ब्राह्मणाः वेदपारगाः। प्रस्थितादीर्घमध्वानं यूयं किमवसीदथ। पञ्चक्रोशं गयाक्षेत्रं क्रोशमेकं गयाशिरः। यत्र यत्र स्मरिष्यामि पितृणां दत्तमक्षयम्। श्राद्धारम्भे गयां ध्यात्वा ध्यात्वा देवं गदाधरम्। स्वान् पितॄन्मनसा ध्यात्वा ततः श्राद्धं समारभेत्॥

अपसब्य[२] दिग्बंधनम्, तिलाक्षतद्विगुणकुशैश्च कुर्यात्॥ अग्निष्वात्ता पितृगणाः प्राचीरक्षन्तु मे दिशम्। इति प्राच्याम्॥ तथा वर्हिषदः पान्तु याम्यां ये पितरः स्थिता इति याम्याम्॥ प्रतीचीमाज्यपास्तद्वत् इत्यनेन प्रतीच्याम्॥ उदीचीमपि सोमपाः। इत्यनेनोदीच्याम्॥ अधोर्ध्वमपि कोणेषु हविष्मन्तश्च सर्वतः॥ रक्षो भूतपिशाचेभ्यस्तथैवासुरदोषतः। सर्वतश्चाधिपस्तेषां यमो रक्षां करोतु मे॥ तिला रक्षन्तु ह्यसुरान् दर्भा रक्षन्तु राक्षसान्। पङ्क्तिर्वैश्रोत्रियोरक्षेदतिथिः सर्वरक्षकः॥ नमो नमस्ते गोविन्द पुराण पुरुषोत्तम। इदं श्राद्धं हृषीकेश रक्षतां सर्वतोदिशम्॥

सब्यम्। नीवीबंधनम् दक्षिणकटौ त्रिभिः कुशतिलैश्च कुर्य्यात्। त्वं वनेभ्यस्त्वामोषधीभ्यस्त्वं नृणां नृपते जायते शुचिः॥ देवताभ्यः पितृभ्यश्च महायोगीभ्य एव च। नमः स्वधायै स्वाहायै नित्यमेव नमो नमः। इति त्रिर्जपेत्॥

अपसव्यम्, सङ्कल्पं कुर्यात्। ॐ तत्सद्येहेत्यादि अमुकगोत्राणां अस्मत्पितृपितामहप्रपितामहानाममुकशर्मणां वसुरूद्रादित्यस्वरूपाणां सपत्नीकानां अमुकगोत्राणां अस्मन्मातामहप्रमातामहवृद्धप्रमातामहानां

---

१. कुशमूले स्थितो ब्रह्मा कुशमध्ये तु केशवः।
कुशाग्रे शङ्करं विद्यात्सर्वे देवाः समन्ततः॥

२. प्राचीनावीतिना सर्वमपसव्यमतन्द्रिणा।
पित्र्यमानिधनात्कार्यं विधिवद्दर्भपाणिना। (मनुः)

अमुकामुकामुकशर्मणां सपत्नीकानां पुरूरवार्द्रपूर्वकं अमुकतिथि-विहितपार्वणश्राद्धमहं करिष्ये, कुरूष्व।। सब्यं, दृष्टिनिपातादेर्दोषोत्पाद-कादीनां पवित्रितास्तु कुशोदकेन अभ्युक्ष्य पाकं प्रोक्ष्य॥

पुनः हस्तार्घदानम्। तिस्रो द्रोणिकाः स्थापयित्वा। कुशयवजलतुलसी प्रक्षेपः एकस्यां। द्वयोस्तिलजलकुशप्रक्षेपः॥

देवपात्रं वामकरे गृहीत्वा दक्षिणेन करेण मुद्रयित्वा देवपात्रं **सुसम्पन्नं सुसम्पन्नं** एवं वदेत्। **सहस्त्रशीर्षे**तिपूजनम्। **नमो नारायणायादिव्याआपः पयससंबभूवुर्याअंतरिक्ष उत्पार्थिवीर्या हिरण्यवर्णा यज्ञियास्तान् आपः शिव सशंस्योना सुहवोभवन्तुपित्रादित्रयमातामहादित्रयश्राद्धसम्बन्धिनां विश्वेदेवा एषहस्तार्घः प्रीयन्ताम्वो नमः अर्घेपुनः प्रत्यर्धमस्तु** किंचिज्जलं दद्यात्॥ अपसव्यम्। पितृपात्रार्घं **सुसम्पन्नं सुसम्पन्नं** वदेत्। **ॐ नमोनारायणेति** पठित्वा **सहस्त्रशीर्षेति** सम्पूज्य, **अमुकगोत्राः अस्मत्पितृपितामहाप्रपितामहाः अमुकामुकामुकशर्माणः एषहस्तार्घस्त्रेधा विभज्ययुष्मभ्यं स्वधा नमः अर्घे पुनः प्रत्यर्घमस्तु** किञ्चिज्जल दद्यात्॥

एवं मातामहपात्रं **सुसम्पन्नं सुसम्पन्नं** वदेत् **या दिव्या आपः पयसा सम्बभूबुर्य्या अन्तरिक्षाउत्पार्थिवीर्याहिरण्यवर्णायज्ञियास्तान आपः शिवाः सशंस्योनाः सुहवा भवन्तु। सहस्त्रशीर्षेति** संपूज्य**अस्मन्मातामह प्रमातामह, वृद्धप्रमातामहा अमुकामुकामुकशर्माणः एष हस्तार्घस्त्रेधावि-भज्य युष्मभ्यंस्वधानमः अर्घे पुनः प्रत्यर्घमस्तु** किञ्चिज्जलं दद्यात्॥

प्रथमपात्रे **सशं श्रावोनसमवनीय शुन्धतां लोकाः पितृषदनाः पितृषदनमसि पितृभ्यः स्थानमसि** इति मंत्रेण पात्रं न्युब्जं कृत्वा तदुपरि-कुशत्रयनिधानम्॥

सव्यम्। पूजनं कुर्य्यात् गन्धादिदानं तुलसीचन्दनाक्षततांबूलपूगीफल धूपदीपनैवेद्यवस्त्रयज्ञोपवीतदक्षिणा दद्यात्। **अस्मत्पित्रादित्रयमातामहादित्रय श्राद्धसम्बन्धिनोविश्वेदेवाः इदमयथाकृतमर्चनं विश्वेदेवाः प्रीयन्तांवो नमः।।**

अपसव्यम्॥ पूजनं कुर्य्यात् गंधादिदानं **अमुकगोत्रा अस्मत् पितृपितामहप्रपितामहा अमुकामुकाशर्मणो वसुरुद्रादित्यस्वरूपाः**

सपत्नीकाः अमुकगोत्रा अस्मन्मातामहप्रमातामहवृद्धप्रमातामहा अमुकामुकामुकशर्माणः अग्निवरुणप्रजापतिस्वरूपाः सत्नीकाः यथाकृतमर्चनषोढा विभज्य युष्मभ्यं स्वधा नमः॥

सव्याचमनं अग्नौकरणं **यथासायुधो विष्णुस्त्रैलोक्यं परिरक्षति। एवं मंडलभस्मैतत् सर्वभूतानि रक्षतु** एव भस्मना मण्डलं कृत्वा एकं पात्रं स्थापयेत्॥

अपसव्यम्॥ भस्मना मण्डलद्वयं कृत्वा पात्रद्वयं स्थापयेत्। तिस्रो द्रोणकाः सजलाः पात्राग्रे स्थापनीया एकां द्रोणिकां सजलां समुद्धृत्य॥

सव्यम्॥ घृताक्तमन्नमुद्धृत्यशर्कराघृतं प्रक्षिप्य विष्णवे नैवेद्यं दद्यात्। **नाभ्याआसीदन्तरिक्षᳬं शीर्ष्णोद्यौः समवर्तत पद्म्यांभूमिर्दिशः श्रोत्रांत्तथा-लोकान् अकल्पयन्॥**

विश्वेदेवा ब्राह्मणः अग्नौकरणं[1] करिष्ये। ॐ कुरूष्व॥

अपसव्यम्॥ **पितृब्राह्मणा अग्नौकरणं करिष्ये। ॐ कुरूष्व। मातामहब्राह्मणा अग्नौ करणं करिष्ये। ॐ पृथिवीं ते पात्रं द्यौःपिधानं ब्राह्मणस्य मुखे अमृते अमृतं जुहोमि स्वाहा इदम्विष्णुर्विचक्रमे त्रेधानिदधे पदम्। समूढमस्यपाᳬं सुरे, स्वाहा हव्यᳬंरक्ष इदमन्नम् इदमापः इदमाज्यम् इदमैक्ष्वं इदमुपकरणम् एतत्सर्वं हव्यम्** अङ्गुष्ठयवान् विकीर्य॥

सङ्कल्पः। **अस्मत् पित्रादित्रयमातामहादित्रयश्राद्धसम्बन्धिनः पुरूरवनाम्नो विश्वेदेवा इदमन्नघृताद्युपस्करसहितमुपनीतमुपनेष्यमानं कुशवटब्राह्मणभोजनतृप्तिपर्य्यन्तं विश्वेदेवाः प्रीयन्तां वो नमः॥**

अपसव्यम् पितृपङ्क्तौ। **पृथिवी ते पात्रं द्यौरपिधानं ब्राह्मणस्य मुखे अमृते अमृतं जुहोमि स्वाहा। इदं विष्णुर्विचक्रमेत्रेधानिदधेपदम्**

---

१. अग्नौकरणंहोमं तु कुर्यादप्स्विति यन्मतम्।
स यदाऽपां समीपे स्याच्छ्राद्धे ज्ञेयो विधिस्तदा॥ (कात्यायनः)
अप्सु चैव कुशस्तम्बेऽग्निं कात्यायनोऽब्रवीत्।
रजते च सुवर्णे च नित्यं वसति पावकः॥ (शङ्खः)

समूढमस्यपाथंसुरे स्वाहा विष्णोः कव्यथंरक्ष इदमन्नम् इदमापः इदमाज्यम् इदमैक्ष्वं इदमुपकरणम् एतत्सर्वं कव्यं अङ्गुष्ठावगाहनं तिलान् विकीर्य॥ एवम् मातामहपङ्क्तौ कुर्यात्।

सङ्कल्पः॥ **अमुकगोत्रा अस्मत् पितृपितामहप्रपितामहा अमुकामुकामुकशर्माणो वसुरूद्रादित्यस्वरूपाः सपत्नीकाः अस्मन्माता-महप्रमातामहवृद्ध प्रमातामहा अमुकामुकामुकशर्माणः अग्निवरुणप्रजा-पतिस्वरूपाः सपत्नीकाः इदमन्नं यथौपस्करसहितं षोढा विभज्य युष्मभ्यं स्वधा नमः॥**

सव्यम्। आपोशानदानम्। **विश्वेदेवा ब्राह्मणा अमृतं जुषामः॥** अपसव्यम् **पितृब्राह्मणा अमृतं जुषध्वम् जुषामः मातामहब्राह्मणा अमृतं जुषध्वम्, जुषामः॥**

सव्यम् गायत्रीस्मरणम्॥ अपसव्यम् विकरासनम् नैऋत्यकोणे दद्यात्॥ **असंस्कृतप्रणीतानां त्यागीनां कुलयोषिताम्। उच्छिष्टभागधेयानां दर्भेषु विकरासनम्। अग्निदग्धाश्च ये जीवाः येऽप्यदग्धा कुले मम। भूमौ दत्तेन तृप्यन्तु तृप्ता यान्तु परां गतिम्।** कुशांस्त्यक्त्वा हस्तौ चरणौ प्रक्षालयेत्॥

सव्यम्। आचमनम्। चुलुकदानम्। **विश्वेदेवा ब्राह्मणा इदं वश्चुलुकम्॥**

अपसव्यम्। **पितृब्राह्मणा इदं वश्चुलुकम्। मातामहब्राह्मणा इदं वश्चुलुकम्॥**

मधुमतीगायत्रीजपः **ॐ मधुव्वाता ऋतायते मधु क्षरंति सिन्धवः। माध्वीर्नः सन्त्वोषधीः। मधुनक्तमुतोषसोमधुमत्पार्थिवथंरजः मधुद्यौरस्तु नः पिता। मधुमान्नो वनस्पतिर्मधुमां अस्तुसूर्यः माध्वीर्गावोभवन्तु नः। विश्वेदेवा ब्राह्मणा मधुमधुतृप्तास्थ तृप्तास्मः॥**

अपसव्यम्॥ **पितृ ब्राह्मणा मधुमधुतृप्तास्थ मातामहब्राह्मणा मधुमधुतृप्तास्थ, तृप्ताःस्मः।** ततः पिण्डार्थं वेदिका कार्या। मन्त्रेणाऽनेन वेदीसेचनं कुर्यात्। अयोध्या मथुरा माया काशी काञ्ची अवन्तिका। पुरी द्वारावती ज्ञेया सप्तैता मोक्षदायिकाः॥

उल्मुकधारणम्। ये रूपाणि प्रति मुञ्चमाना असुराः संतः स्वधया चरन्ति परापुरो निपुरो ये भरत्यग्निष्टां लोकात्प्रणुदो व्यस्मत्।

अथपिण्डासनम्[१] वामजानूभूमौनिधाय अमुकगोत्र अस्मत्पिता अमुकशर्मन् वसुस्वरूप सपत्नीकएतत्तेनथ्ठंस्वधा। इयंभूमिर्गयाइदमुदकं फल्गूतीर्थस्य पुष्कराचमनम् इदं पित्रे॥

अमुकगोत्र अस्मत्पितामह अमुकशर्मन् रूद्रस्वरूपः सपत्नीकः एतत्तेनथ्ठंस्वधा इयं भूमिर्गया इदमुदकं फल्गूतीर्थस्य पुष्कराचमनम् इदं पितामहाय।

अमुकगोत्र अस्मत्प्रपितामह अमुकशर्मन् आदित्यस्वरूपः सपत्नीकः एतत्तेन थ्ठं स्वधा इयं भूमिर्गया इदमुदकं फल्गूतीर्थस्य पुष्कराचमनम् इदं प्रपितामहाय॥

अमुकगोत्र अस्मन्मातामह अमुकशर्मन् अग्निस्वरूप सपत्नीक एतत्तेनथ्ठंस्वधा इयं भूमिर्गया इदमुदकं फल्गूतीर्थस्य पुष्कराचमनम्, इदं मातामहाय॥ अमुकगोत्र अस्मत्प्रमातामह अमुकशर्मन् वरुणस्वरूप सपत्नीक एतत्तेनथ्ठंस्वधा इयं भूमिर्गया इदमुदकं फल्गूतीर्थस्य पुष्कराचमनम्, इदं प्रमातामहाय॥

अम्मुकगोत्र अस्मद्बृद्धप्रमातामह अमुकशर्मन् प्रजापतिस्वरूप-सपत्नीक एतत्तेनथ्ठंस्वधा इयं भूमिर्गया इदमुदकं फल्गूतीर्थस्य पुष्करा-चमनम् इदं वृद्धप्रमातामहाय॥

मूलपितृभ्यो नमः मूलमातामहेभ्यो नमः। पिण्डाग्रे[२] दर्भमूलेन करं प्रोक्षयेत्॥

शेषभागभुजस्तृप्यन्तु। कुशांस्त्यक्त्वा हस्तौ चरणौ प्रक्षालयेत्॥

---

१. सव्यं जानुं निपात्यैव भूमौ पिण्डान् प्रयत्नतः।
निर्वपेत् पितृतीर्थेन स्वधाकारमुदाहरन्॥ (षट्त्रिंशन्मते)

२. उत्तानेन तु हस्तेन निर्वपेत् दक्षिणामुखः॥ (ब्रह्माण्डपुराणे)
आर्द्रामलकमात्रास्तु पिण्डान् कुर्वीत पार्वणे।
एकोद्दिष्टे विल्वमात्रं पिण्डमेकं तु कारयेत्॥ (मरीचि)

सव्यम्। आचमनम् अक्षतान् गृहीत्वा॥ अपसव्यम्। दक्षिणाभिमुख: **अत्रपितरो मादयध्वं यथाभागमावृषा** इषत पठित्वा॥ स्वयम् उत्तराभिमुख: श्वासनियमनम्, **कुबेराय नम:॥**

अपसव्यम्, दक्षिणाभिमुख:। **अमी मदन्त पितरो यथाभागमा-वृषाइषत।** इत्यक्षतान् पिण्डोपरि निक्षिपेत्॥ अथ पिंडप्रत्यवनेजनम्, वामजानु भूमौ निधाय। **अमुकगोत्र अस्मत्पित: अमुकशर्मन् वसुस्वरूप सपत्नीक पिण्ड प्रत्यवनेनिक्ष्व॥**

अमुकगोत्र अस्मपितामह अमुकशर्मन् रूद्रस्वरूप सपत्नीक पिण्डं प्रत्यवनेनिक्ष्व॥

अमुकगोत्र अस्मत्प्रपितामह अमुकशर्मन् आदित्यस्वरूप सपत्नीक पिण्डं प्रत्यवनेनिक्ष्व॥

अमुकगोत्र अस्मन्मातामह अमुकशर्मन् अग्निस्वरूप सपत्नीक पिण्डं प्रत्यवनेनिक्ष्व॥

अमुकगोत्र अस्मत्प्रमातामह अमुकशर्मन् वरुणस्वरूप सपत्नीक पिण्डं प्रत्यवनेनिक्ष्व॥

अमुकगोत्र अस्मद्वृद्धप्रमातामह अमुकशर्मन् प्रजापतिस्वरूप सपत्नीक पण्डिं प्रत्यवनेनिक्ष्व।

नीबीं विसृज्य पिण्डाग्रे॥ अथ षडञ्जलिकरणम्॥ अथ सूत्रदानम्। **नमो व: पितरो रसाय नमो व: पितरो शोषाय। नमो व: पितरो जीवाय। नमो व: पितर: स्वधायै नमो व: पितरो घोराय नमो व: पितरो मन्यवे नमो व: पितर: पितरो नमो वो गृहान्न: पितरो दत्तसतो व: पितरो देष्मैतद्व: पितरो वास आधत्त। एतद्व: मातामहवास:॥**

ऊर्जकरणम्। **उर्जं वहंतीरमृतं घृतं पय: कोलालं परिस्त्रुतम्। स्वधास्थतर्पयत् मे पितृन् स्वधास्थतर्षयत मे मातामहान्।**

अथ पिण्डपूजनम्। **पितृभ्य: स्वधायिभ्य: स्वधा नम: पितामहेभ्य: स्वधायिभ्य: स्वधा नम: प्रपितामहेभ्य: स्वधायिभ्य: स्वधा नम: अक्षन्**

पितरोमीमदन्तपितरोतीतृपन्त पितरः पितरश्शुंधध्वम्। तुलसीचन्दनपुष्प-धूपदीपनेवैद्यतांबूलपूगीफलयज्ञोपवीतवासांसि दक्षिणां च दद्यात्॥

सङ्कल्पं कुर्य्यात्। अमुकगोत्रा अस्मत् पितृपितामहप्रपितामह, अमुकामुकामुकशर्माणो वसुरूद्रादित्यस्वरूपाः सपत्नीकाः अमुकगोत्रा अस्मन्मातामहप्रमातामहवृद्धप्रमातामहाः अमुकामुकामुकशर्माणः अग्निवरूणप्रजापतिस्वरूपाः सपत्नीका अत्र धूपदीपनैवेद्यतांबूल पूगीफलयज्ञोपवीतवासांसि षोढा विभज्य युष्मभ्यं स्वधानमः॥ सव्यम्। आचमनम्। कुशजलेन विश्वेदेवाः सुप्रोक्षितमस्तु भूमिं प्रोक्ष्य शिवाआपः सन्तु सौमनस्यमस्तु यवाक्षतं चरिष्टं चास्तु॥

अपसव्यम्। पितृब्राह्मणमातामहब्राह्मण सुप्रोक्षितमस्तु भूमिं प्रोक्ष्य शिवाआपः सन्तु सौमनस्यमस्तु तिलाक्षतं चारिष्टं चास्तु॥

सव्यम्। मूर्द्धाभिषेकः। अस्मत्कुले दीर्घमायुरस्तु शांतिरस्तु पुष्टिरस्तु वृद्धिरस्तु यच्छ्रेयं तदस्तु यत्पापंरोगं तत्प्रणश्यतु भूमौंद्विपदे चतुष्पदेभ्यः शान्तिः श्रीर्भवतु॥

अपसव्यम्। अक्षयोदकदानम् चुलुकेन जलकुशौ गृहीत्वा। अमुकगोत्रस्य अस्मपितुः अमुकशर्मणः वसुस्वरूपस्य एतत् सर्वं यद्दत्तं तदक्षयमस्तु, अक्षीयतु॥

अमुकगोत्रस्य अस्मत्पितामहस्य अमुकशर्मणः रूद्रस्वरूपस्य एतत्सर्वं यद्दत्तं तदक्षयमस्तु अक्षीयतु॥

अमुकगोत्रस्य अस्मत्प्रपितामहस्य अमुकशर्मणः आदित्य-स्वरूपस्य एतत्सर्वं यद्दत्तं तदक्षयमस्तु अक्षीयतु॥

अमुकगोत्रस्य अस्मन्मातामहस्य अमुकशर्मणोऽग्निस्वरूपस्य एतत्सर्वंयद्दत्तंतदक्षयमस्तु अक्षीयतु॥

अमुकगोत्रस्य अस्मत्प्रमातामहस्य अमुकशर्मणः वरुणस्वरूपस्य एतत्सर्वं यद्दत्तं तदक्षयमस्तु अक्षीयतु॥

अमुकगोत्रस्य अस्मद्वृद्धप्रमातामहस्य अमुकशर्मण: प्रजापतिस्वरूपस्य एतत्सर्वंयद्दत्तंतदक्षयमस्तु अक्षीयतु अघोरा: पितरा: सन्तु अघोरा: मातामहास्सन्तु॥

सव्यम् आशीर्ग्रहणम्। गोत्रं नो वर्द्धतां वर्द्धन्तु दातारो वर्द्धन्तु वेदा: वर्द्धन्तां वर्द्धन्तु सन्ततिर्वर्द्धन्तां वर्द्धतु श्रद्धाचामी माव्यगमत् मागात् बहुदेयं चास्तु तथास्तु अन्नं च भवेत् भवतु अतिथींश्च लभेमहि लभध्वं याचितारश्च न: सन्तु मा च याचिष्म कञ्चन मा याचेथा: एता एवाशिष: सन्तु आयुष्मान्धनवान् पुत्रवान् भव॥

अथ तिलककरणम्। यं यं कामयते कामं तत्तत् प्राप्नोति निश्चितम्। दीर्घायुत्वाय बलाय वर्चसे सुप्रजांस्त्वायाथो जीवशरद: शतम्॥

अपसव्यम् न्यव्जपात्रोपरि कुशान् पिण्डसमीपे प्रक्षिपेत्॥ एकस्यां द्रोणिकायां जलं गृहीत्वा वामजान्ववाच्य। अमुकगोत्रेभ्य: अस्मपितृपितामह प्रपितामहेभ्य: अमुकामुकामुकशर्मभ्य: स्वधोच्यतां अस्तु स्वधा नम: अमुकगोत्रेभ्य: अस्मन्मातामहप्रमातामहवृद्धप्रमातामहेभ्य: अमुकामुका-मुकशर्मभ्य: स्वधोच्यतां अस्तु स्वधा नम:॥ अर्धपात्रोत्तानं कृत्वा कुशाग्राणि कराभ्यां चालयेत्। मे पितॄणां स्वर्गे वासोऽस्तु मे मातामहानां स्वर्गे वासोऽस्तु॥ सव्यम् दक्षिणादानम्। सङ्कल्प:। ॐ अद्याऽस्म-त्पित्रादित्रयमातामहादित्रयश्राद्धसम्बन्धिनां पुरूरव आर्द्रवसुसंज्ञकानां विश्वेदेवानां कृतैतत्पार्वणश्राद्धप्रतिष्ठार्थमिदं हिरण्यमग्निदैवतं यथानामगोत्राय ब्राह्मणाय दक्षिणात्वेन दातुमहमुत्सृजे॥

अपसव्यम्। ॐ अद्यामुकगोत्राणां अस्मत्पितृपितामहप्रपितामहानां अमुकामुकामुकशर्मणां वसुरूद्रादित्यस्वरूपाणां अमुकगोत्राणां अस्मन्मातामहप्रमातामहवृद्धप्रमातामहानाम् अमुकामुकामुकशर्मणां अग्नि- वरुणप्रजापतिस्वरूपाणां सपत्नीकानां कृतैत्पार्वणश्राद्धप्रतिष्ठा सिद्धयर्थं रजतं तन्निष्क्रयं द्रव्यं यथापरिमितंषोढा विभज्य युष्मभ्यं अस्यविधेर्न्यूनातिरिक्तं यत्कृतंतसुकृतमस्तु यन्न कृतं तद्विष्णो: प्रसादात् ब्राह्मणवचनात् सर्वविधे: परिपूर्णमस्तु॥

सव्यम्। तुलसी शिरसि स्थापयेत्।। अपसव्यम् पिण्डविसर्जनम् मध्याद्यन्तक्रमेण॥

सव्यम्। दक्षिणावृतवेद्याः कुशानाकृष्यवेदीसेचनम् कुशेन शङ्खचक्र-ऋतूंश्च लिखेत्। चन्दनाक्षतैः **शंखचक्राभ्यां नमः हिमशिशिरवसन्तग्रीष्म-वर्षाशरद्।। गयायां पितृरूपेण स्वयमेव जनार्दनः इति दृष्ट्वा पुण्डरीकाक्षं मुच्यते च ऋणत्रयात्। वसन्तादिषड्ऋतुभ्यो नमः शमीपत्रप्रमाणेन-पिण्डंदद्यात् गयाशिरे। उद्धरेत्सप्तगोत्राणि कुलमेकोत्तरशतम्।।** अपसव्यम्, पत्रावली सपिण्डचतुष्पत्रं दक्षिणस्कन्धे कृत्वापुनर्वामस्कंधे नमस्कारान् कृत्वा सव्यमाघ्रायअपसव्यं वेद्यांस्थापयेत् मे पितृणां स्वर्गस्वस्थानवासः। **अत्र वर्द्धयते नित्यं दाता च प्रतिवर्द्धयेत्। यस्यार्थे कल्पितः श्राद्धस्तस्य तृप्तिमनंतकम्।।**

पितृब्राह्मणान्विसर्जयेत्। **वाजेवाजेवतव्वाजिना धनेषु विप्रा अमृता ऋतज्ञाः अस्यमद्ध्वं पिबतमादयध्वन्तृप्ता यात पथिभिर्देवयानैः।।** सव्यम् विश्वेदेवान्विसर्जयेत्। **देवागातु विदोगातुं वित्वागातु मित्त सस्वत इमं देवयज्ञथंस्वाहा वातेधाः।** अपसव्यम् कर्मपात्रं जलेन **आमावाजस्य** पठित्वा प्रदक्षिणीकरणम् **आमावाजस्य प्रसवो जगम्यादेमे द्यावापृथिवी विश्वरूपे आमागंता पितराचाम सोमोअमृतत्वेन गम्यात्॥** दीपं विसर्जयेत् तदुपरि अक्षतप्रक्षेपः॥ सव्यम् आचमनम्। **कर्मसाक्षिणे सूर्याय नमः॥** पुष्पाञ्जलिं दद्यात्॥ ततस्तर्पणं कुर्यात्[१]॥

॥ इति पार्वणश्राद्धः ॥

।। इति कर्मकौमुद्यां नित्यनैमित्तिककर्माध्यायः।।

---

१. तीर्थे तिथिविशेषे च गयायां प्रेतपक्षके।
निषिद्धेऽपि दिने कुर्यात् तर्पणं तिलमिश्रितम्॥
स्नात्वा तीरं समागत्य उपविश्य कुशासने।
सन्तर्पयेत् पितॄन् सर्वान् स्नात्वा वस्त्रं च धारयेत्॥

पूजाहोमकर्माध्यायः

अथ वेदमन्त्रोच्चारणे स्वस्तिवाचनम्

सर्वप्रथमं यजमानो नित्यक्रियां कृत्वा पूर्ववदासने कुशमये कम्बले वोपविश्य स्वदक्षिणतो भार्या[१] माङ्गलिकवस्त्रोपेतां चोपवेश्य तत आचार्येण दम्पत्योरुत्तरीयवस्त्रस्यान्ते **"ॐ शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम्। प्रसन्नवदनंध्यायेत् सर्वविघ्नोपशान्तये॥"** इति पठित्वा सपुङ्गीफलाक्षत-ग्रन्थिबन्धनं कर्त्तव्यम्। यजमानः सपत्नीकः पूर्वाभिमुखो भूत्वाऽऽचार्यश्चोद-ङ्मुख उपविश्य पूर्वकथितमन्त्रैराचमनं[२] प्राणायामं[३] च विधाय शिखाबन्धनं कृत्वा पवित्रीकरणं पवित्रीधारणं[४] च पूर्वोक्तमन्त्रैः कुर्यात्। ततो ललाटे तिलकं कुङ्कुमादिभिः[५] कृत्वा हस्तेऽक्षतपुष्पादिकं गृहीत्वा सर्वे मिलित्वैव स्वस्तिवाचनं कुर्युः। अथवाऽऽचार्यब्राह्मणा एव स्वस्तिकमन्त्रान् पठेयुः। वस्त्रादिना मण्डपादिकं कृत्वा पूजाहोममाचरेन्नान्तरिक्षे॥[६]

स्वस्तिवाचनमन्त्राः

हरिः ॐ आ नो भद्राः क्रतवो यन्तु विश्वतोऽदब्धासोऽअपरी तासऽउदि्भदः।

---

१. सर्वेषु शुभकार्येषु पत्नी दक्षिणतः शुभा।
अभिषेके विप्रपादक्षालने चैव वामतः॥

२. गोकर्णाकृतिहस्तेन माषमात्रं जलं पिबेत्।
आचमनं च तत्प्रोक्तं सर्वकर्मसु पावनम्॥

३. नित्ये देवार्चने होमे सन्ध्यायां श्राद्धकर्मणि।
स्नाने दाने तथा ध्याने प्राणायामास्त्रयः स्मृतः॥

४. अनन्तगर्भितं साग्रं कौशं द्विदलमेव च।
प्रादेशमात्रे विज्ञेयं पवित्रं यत्र कुत्रचित्॥

५. तिलकं कुङ्कुमेनैव सदा मङ्गलकर्मणि।
कारयित्वा सुमतिमान्न श्वेतचन्दनं मृदा॥

६. उपर्याच्छादनं यत्र नास्ति तत्रान्तरिक्षता। अनाच्छादितभूर्यत्र त्वन्तरिक्षं तदिष्यते॥

देवा नो यथा सदमिद्वृधेऽअसन्नप्प्रायुवो रक्षितारो दिवे दिवे॥१॥ देवानां भद्रा सुमतिर्ऋजूयतां देवानाꣳ रातिरभि नो निवर्त्तताम्। देवानाꣳसख्यमुपसेदिमाव्वयं देवा नऽआयुः प्प्रतिरन्तु जीवसे॥२॥ तान् पूर्व्वया निविदा हूमहे व्वयं भगं मित्रमदितिं दक्षमस्त्रिधम्। अर्य्यमणं व्वरुणꣳ. सोममश्विना सरस्वती नः सुभगा मयस्करत्॥३॥ तन्नो व्वातो मयोभुव्वातु भेषजं तन्माता पृथिवी तत्पिता द्यौः तद्ग्रावाणः सोमसुतो मयोभुवस्तदश्विना शृणुतं धिष्ण्या युवम्॥४॥ तमीशानं जगतस्तस्थुष- स्पतिं धियं जिन्वमवसे हूमहे व्वयम्॥ पूषा नो यथा व्वेदसामसद्वृधे रक्षिता पायुरदब्धः स्वस्तये॥५॥ स्वस्ति नऽइन्द्रो व्वृद्धश्रवाः स्वस्ति नः पूषा व्विश्ववेदाः। स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः स्वस्ति नो वृहस्पतिर्दधातु॥६॥ पयः पृथिव्यां पय ओषधीषु पयो दिव्यन्तरिक्षे पयोधाः। पयस्वतीः प्रदिशः सन्तु मह्यम्॥७॥ विष्णोर-राटमसि व्विष्णोः श्नप्त्रेस्थो व्विष्णोः स्यूरसि विष्णोर्ध्रुवोसि वैष्णवमसि व्विष्णवे त्वा॥८॥ अग्निर्देवता व्वातो देवता सूर्यो देवता चन्द्रमा देवता व्वसवो देवता रुद्रा देवतादित्या देवता मरुतो देवता व्विश्वेदेवा देवता व्वृहस्पतिदे वतेन्द्रो देवता वरुणो देवता॥९॥ द्यौः शान्ति-रन्तरिक्षꣳ. शान्तिः पृथिवी शान्तिरापः शान्तिरोषधयः शान्तिः। व्वनस्पतयः शान्तिर्विश्वेदेवाः शान्तिर्ब्रह्म शान्तिः सर्व्वꣳ शान्तिः शान्तिरेव शान्तिः सा मा शान्तिरेधि॥१०॥ पृषदश्वा मरुतः पृश्निमातरः शुभं य्यावानो व्विदथेषु जग्मयः। अग्निर्जिह्वा मनवः सूरचक्षसो व्विश्वे नो देवाऽवसागमन्निह॥११॥ भद्द्रं कर्ण्णेभिः शृणुयाम देवा भद्द्रं पश्येमाक्षिभिर्य्यजत्राः। स्थिरैरङ्गैस्तुष्टुवाꣳ सस्तनूभिर्व्वशेमहि देवहितं यदायुः॥१२॥ शतमिन्नु शरदोऽअन्ति देवा यत्रा नश्चक्क्रा जरसं तनूनाम्। पुत्रासो यत्र पितरो भवन्ति मा नो मद्ध्या रीरिषतायुर्ग्गन्तोः॥१३॥ अदितिर्द्यौरदितिरन्तरिक्षमदितिर्म्माता स पिता स पुत्रः॥ व्विश्वे देवाऽअदितिः पञ्चजनाऽअदितिर्जातमदि-तिर्ज्जनित्वम्॥१४॥ यतो यतः समीहसे ततो नोऽअभयं कुरु। शन्नः कुरुप्प्रजाभ्योऽअभयं न पशुब्भ्यः॥१६॥ ॐ गणानां त्वा गणपतिꣳ

हवामहे प्रियाणां त्वा प्रियपतिर्ठ. हवामहे निधीनां त्वा निधिपतिर्ठ. हवामहे व्वसो मम॥ आहमजानि गर्ब्भद्धमा त्वमजासि गर्ब्भद्धम्॥१७॥ हरिरोम्॥ सुशान्तिर्भवतु।

ततो हस्ते पुनः पुष्पाक्षतदूर्वादिकमादाय बद्ध्वाञ्जलिं मङ्गलपद्यानि पठेत्- ''ॐ सुमुखश्चैकदन्तश्च कपिलो गजकर्णकः। लम्बोदरश्च विकटो विघ्ननाशो विनायकः॥१॥ धूम्रकेतुर्गणाध्यक्षो भालचन्द्रो गजाननः॥ द्वादशैतानि नामानि यः पठेच्छृणुयादपि॥२॥ विद्यारम्भे विवाहे च प्रवेशे निर्गमे तथा। सङ्ग्रामे सङ्कटे चैव विघ्नस्तस्य न जायते॥३॥ शुक्लाम्बरधरं देवं शशिवर्णं चतुर्भुजम्॥ प्रसन्नवदनं ध्यायेत् सर्वविघ्नोपशान्तये॥४॥ अभीप्सितार्थसिद्ध्यर्थं पूजितो यः सुरासुरैः॥ सर्वविघ्नहरस्तस्मै गणाधिपतये नमः॥५॥ सर्वमङ्गलमाङ्गल्ये शिवे सर्वार्थसाधके॥ शरणे त्र्यम्बके! गौरि! नारायणि! नमोऽस्तु॥६॥ सर्वदा सर्वकार्येषु नास्ति तेषाममङ्गलम्॥ येषां हृदिस्थो भगवान् मङ्गलायतनं हरिः॥७॥ तदेव लग्नं सुदिनं तदेव ताराबलं चन्द्रबलं तदेव॥ विद्याबलं देवबलं तदेव लक्ष्मीपते तेऽङ्घ्रियुगं स्मरामि॥८॥ लाभस्तेषां जयस्तेषां कुतस्तेषां पराजयः॥ येषामिन्दीवरश्यामो हृदयस्थो जनार्दनः॥९॥ यत्र योगेश्वरः कृष्णो यत्र पार्थो धनुर्धरः॥ तत्र श्रीर्विजयो भूतिर्ध्रुवा नीतिर्मतिर्मम॥१०॥ अनन्याश्चिन्तयन्तो मां ये जनाः पर्युपासते॥ तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहम्॥११॥ स्मृते सकलकल्याणं भाजनं यत्र जायते॥ पुरुषं तमजं नित्यं व्रजामि शरणं हरिम्॥१२॥ सर्वेष्वारम्भकार्येषु त्रयस्त्रिभुवनेश्वराः॥ देवा दिशन्तु नः सिद्धिं ब्रह्मे-शानजनार्दनाः॥१३॥ विश्वेशं माधवं ढुण्ढिं दण्डपाणिं च भैरवम्॥ वन्दे काशीं गुहां गङ्गां भवानीं मणिकर्णिकाम्॥१४॥ वक्रतुण्ड महाकाय कोटिसूर्यसमप्रभ॥ विर्विघ्नं कुरु मे देव सर्वकार्येषु सर्वदा॥१५॥ विनायकं गुरुं भानुं ब्रह्मविष्णुमहेश्वरान्॥ सरस्वतीं प्रणम्यादौ सर्वकार्यार्थसिद्धये॥१६॥ ॐ श्रीमन्महागणाधिपतये नमः॥ ॐ लक्ष्मीनारायणाभ्यां नमः॥ ॐ उमामहेश्वराभ्यां नमः॥ ॐ वाणी हिरण्यगर्भाभ्यां नमः॥ ॐ शचीपुरन्दराभ्यां नमः॥ ॐ मातृपितृचरण-कमलेभ्यो नमः॥ ॐ श्रीगुरुभ्यो नमः॥ ॐ इष्टदेवताभ्यो नमः॥ ॐ

कुलदेवताभ्यो नमः॥ ॐ ग्रामदेवताभ्यो नमः॥ ॐ स्थानदेवताभ्यो नमः॥ ॐ वास्तुदेवताभ्यो नमः॥ ॐ एतत्कर्मप्रधानदेवताभ्यो नमः॥ ॐ सर्वेभ्यो देवेभ्यो नमः॥ ॐ सर्वाभ्यो देवीभ्यो नमः॥ ॐ आचार्येभ्यो नमः॥ ॐ सर्वेभ्यो ब्राह्मणेभ्यो नमः॥ निर्विघ्नमस्तु ओउम्॥" एवं पठित्वा अक्षतादिकं भूमौ क्षिपेत्॥

ततो देशकालौ सङ्कीर्त्य **"अमुकगोत्रोत्पन्नोऽमुक नाम शर्माऽहं श्रुतिस्मृतिपुराणोक्तफलप्राप्तिकामः सपत्नीकोऽमुक देवताप्रीत्यर्थममुक-कामनया स्वस्तिवाचनपुरस्सरं अमुककर्मणि श्रीगणपत्यादिदेवतापूजनं ज्योतिः पूजनं भूतोत्सारणं रक्षाविधानं श्रीवरुणकलशस्थापनं तत्पूजनं पुरस्सरं पुण्याहवाचनकर्म करिष्ये॥"**

ततः अक्षतपुञ्जोपरि घृतदीपं प्रज्वाल्येशानकोणे मन्त्रेणाऽनेन निदध्यात्- **"अग्निर्ज्ज्योतिर्ज्ज्योतिरग्निः स्वाहा सूर्यो ज्ज्योतिर्ज्ज्योतिः सूर्यः स्वाहा॥ अग्निर्व्वर्च्चोज्ज्योतिर्व्वर्च्चः स्वाहा॥" "भो दीप देवरूपस्त्वं कर्मसाक्षी ह्यविघ्नकृत्। यावत्पूजासमाप्तिः स्यात्तावदत्र स्थिरो भव॥"** इति कृत्वा दीपोपरि गन्धपुष्पाक्षतान् क्षिपेत्॥

अथ गणेशपूजनम्

रक्तवर्णाक्षतैर्गोधूमचूर्णेन वा पात्रं पूरयित्वा हरिद्रया स्वास्तिकं विलिख्य तदुपरि रक्तसूत्रावेष्टितपुङ्गीफले गणेशं **"ॐ गणानां त्वा"** इति मन्त्रेणाऽऽवाह्य पञ्चोपचारेण षोडशोपचारेण वा पूजयेत्॥

अथ गौरीपूजनम्

अक्षतपुञ्जोपरि ताम्बूलपर्णोपरि वा गोमयमयीं गौरीं श्रीगणेशपार्श्वे संस्थाप्य मन्त्रेणाऽनेनाऽऽवाह्य पूजयेत् – **"ॐ अम्बेऽअम्बिकेऽम्बालिके न मानयति कश्चन। ससस्त्यश्वकः सुभद्रिकां काम्पीलवासिनीम्॥"** ततः पूजयेत्।

तदनन्तरं हस्तेऽक्षतान् गृहीत्वा **"ॐ अनया कृ॒ ॥या गणपतिदेवता प्रीयतां न मम"** इति पठित्वाऽक्षतान् गणेशोपरि क्षिप्त्वाऽनेन मन्त्रेण प्रार्थनां कुर्यात्– **"ॐ विघ्नेश्वराय वरदाय सुरप्रियाय। लम्बोदराय सकलाय**

जगद्हिताय॥ नागाननाय विधियज्ञविभूषिताय। गौरीसुताय गणनाथ नमो नमस्ते॥'' ततो हस्तेऽक्षतानादाय ''**ॐ अनया पूजया गौरी देवता प्रीयतां न मम**'' इति कथयित्वाऽक्षतान् गौर्या उपरि क्षिप्त्वा प्रार्थयेत्–

''**ॐ सर्वमङ्गलमाङ्गल्ये! शिवे सर्वार्थसाधिके। शरण्ये त्र्यम्बके गौरि नारायणि नमोऽस्तु॥**'' ततः केचन शङ्खघण्टादिकमपि पूजयन्ति। यथावसरं तदपि कर्त्तव्यम्॥

अथ भूतोत्सारणं रक्षाबन्धनञ्च

हस्तेऽक्षतश्वेतपीतसर्षपानादाया मन्त्रैरेभिः क्षितौ क्षिपेत् – ''**ॐ गणाधिपं नमस्कृत्य नमस्कृत्य पितामहम्॥ विष्णुं रुद्रं श्रियं देवीं वन्देभक्त्या सरस्वतीम्॥ स्थानाधिपं नमस्कृत्य ग्रहनाथं निशाकरम्। धरणीगर्भसम्भूतं शशिपुत्रं वृहस्पतिम्॥ दैत्याचार्यं नमस्कृत्य सूर्यपुत्रं महाग्रहम्॥ राहुं केतुं नमस्कृत्य यज्ञारम्भे विशेषतः॥ वसिष्ठं मुनिशार्दूलं विश्वामित्रं च गोभिलम्॥ व्यासं मुनिं नमस्कृत्य ह्यगस्त्यं च्यवनं तथा॥ शक्राद्याश्च ये देवाश्च आचार्याश्च तपोधनाः॥ तान् सर्वान् प्रणमाम्येव यज्ञरक्षाकरान् सदा॥**''

ततो दक्षिणस्यां मन्त्रेणाऽनेन वामपादपार्ष्णिना त्रिवारं भूमिं ताडयित्वा भूतान्युत्सार्याणि – ''**ॐ अपसर्पन्तु ते भूता ये भूता भूतले स्थिताः। ये भूता विघ्नकर्तारस्ते नश्यन्तु शिवाज्ञया। अपक्रामन्तु भूतानि पिशाचाः सर्वतोदिशम्॥ सर्वेषामविरोधेन पूजाकर्म समारभेत्॥**''

ततो दक्षिणहस्ते सर्षपाऽक्षतद्रव्यं त्रिगुणितं रक्तसूत्रं विधाय ''**ॐ हुं फट्**'' मन्त्रेणाऽभिमन्त्रयेत् ततो वामहस्ते विधाय दक्षिणकरतलेन च पिधाय गायत्र्याऽभिमन्त्रयेत्। मन्त्रानिमान् पठित्वा मनसा विष्णुं ध्यायेत् – ''**ॐ यज्ञाग्रे पातु मां शङ्खः पृष्ठे पद्मं तु रक्षतु॥ वामपार्श्वे गदा रक्षेद् दक्षिणे च सुदर्शनः॥ उपेन्द्रः पातु ब्राह्मणमाचार्यं पातु वामनः॥ अच्युतः पातु ऋग्वेदं यजुर्वेदमधोक्षजः॥ कृष्णो रक्षतु सामाख्यमथर्वा-णन्तु माधवः॥ विप्रा ये चोपदेष्टारस्तांश्च दामोदरोऽवतु॥ यजमानं सपत्नीकं पुण्डरीकविलोचनः॥ रक्षाहीनं तु यत् स्थानं तत्सर्वं रक्षताद् हरिः॥**''

तदनन्तरं दक्षिणपाणिना वामकरतलस्थसर्षपाऽक्षतान्मन्त्रेणाऽनेन दिक्षु किञ्चित् किञ्चित् क्षिपेत्– "**ॐ पूर्वे रक्षतु गोविन्द आग्नेय्यां गरुडध्वजः॥ याम्ये रक्षतु बाराहो नारसिंहस्तु नैऋते॥ केशवो वारुण्यां रक्षेद् वायव्यां मधुसूदनः॥ उत्तरे श्रीधरो रक्षेदीशाने च गदाधरः॥ उर्ध्वं गोवर्द्धनो रक्षेदधस्तात्तु त्रिविक्रमः॥ एवं दशदिशो रक्षेद् वासुदेवो जनार्दनः॥**" ततो रक्तरक्षासूत्रं द्रव्याक्षतादिसहितं गणेशपार्श्वे निधाय, तत्पुनरादायाऽऽचार्यो यजमानस्य दक्षिणहस्ते पत्न्याश्च वा[१] महस्तेऽनेन मन्त्रेण रक्षाबन्धनं कुर्यात् –

"**ॐ यदाबध्नं दाक्षायणा हिरण्यꣳशतानीकाय सुमनस्यमाना। तन्म आबध्नामि शतशारदायायुष्मां जरदष्टिर्यथासम्॥**" "**ॐ येन बद्धो बली राजा दानवेन्द्रो महाबलः॥ तेन त्वामनुबध्नामि रक्षे मा चल मा चल॥**" एवं सर्वत्र रक्षाबन्धनं कार्यम्॥ ततः कलशं स्थापयेत्।

अथ सर्वतोभद्रपीठे कलशस्थापनम्

गोधूमचूर्णेन गैरिकधातुना वा पूर्वतः पश्चिमं यावदेकोनविंशतिरेखाः विलिख्य ततो दक्षिणत उत्तरं यावदेकोनविंशतिरेखाः कुर्यात्॥ ततस्तं चक्रं तिसृभिर्लेखाभिर्वेष्टयित्वा चक्रमध्ये चतुःकोष्ठकेषु कृत्वाऽष्टदलंकमलं सप्तधान्येन[२] पूरयेत्। एतदेव सर्वतो[३] भद्रमण्डलं कथ्यते। सप्तधान्याभावे यवेनैव प्रपूरयेत्।

गन्धाक्षतपुष्पाण्यादाय मन्त्रेणाऽनेन पृथिवीं पूजयेत् – "**भूरसि भूमिरस्यदितिरसि विश्वधाया विश्वस्य भुवनस्य धर्त्री॥ पृथिवीं दृꣳह पृथिवीं महिꣳसीः॥**" ततः कलश[४] स्याधारभूमिमुत्तानहस्ताभ्यां स्पृष्ट्वा

---

१. पत्नीवामकरे सूत्रं बद्धं सौख्यधनागमम्। बहुसम्पत्तिमारोग्यं रक्षार्थे कङ्कणं शुभम्॥

२. यवगोधूममाषव्रीहिश्यामाकमुद्गादि च।
तिलाश्चैव सप्तधान्यानि पापं घ्नन्ति सर्वदा॥

३. भद्रेण पूजनाशक्तौ कार्यमष्टदलं शुभम्।
गोधूमान्नेन तत्कार्यं तण्डुलेनाथवा शुभम्॥

४. कलाः कला हि देवानां दानवानां कलाः कलाः।
आदाय निर्मितो यस्मात्कलशस्तेन कथ्यते॥

पठेत्। **"ॐ मही द्यौः पृथिवी च न इमं यज्ञं मिमिक्षताम्। पिपृतान्नो भरीमभिः।"** ततस्तं सप्तधान्यं यवं पूरयन् मन्त्रं पठेत् – **"ॐ धान्यमसि-धिनुहि देवान् प्राणाय त्वोदानाय त्वाव्यानाय त्वा दीर्घामनुप्रसितिमायुषेन् धान्देवो वः सविता हिरण्यपाणिः प्रतिगृभ्णात्वच्छिद्रेण पाणिना चक्षुषे त्वां महीनां पयोसि॥"** धान्योपरि मन्त्रेणाऽनेन धातुमयं मृण्मयं वा त्रिसूत्रयाऽऽवेष्टितं स्वस्तिकयुतं कलशं स्थापयेत् – **"ॐ आ जिघ्र कलशं मह्या त्वा विशन्त्विन्दवः पुनरूर्ज्जा निवर्तस्व सा नः। सहस्त्रन्धुक्षु-वोरुधारा पयस्वतीः पुनर्म्मा विशताद्रयिः॥"**

कलशे जलपूरणमन्त्रः – "ॐ वरुणस्योत्तम्भनमसि वरुणस्य स्कम्भर्ज्जनीस्थो वरुणस्य ऋतसदन्यसि वरुणस्य ऋतसदनमसि वरुणस्य ऋतसदनमासीद्॥" इति वारिणा कलशं पूरयेत्।

कलशे गन्धप्रक्षेपः – "ॐ गन्धद्वारां दुराधर्षां नित्यपुष्टाङ्करी-षिणीम्। ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम्॥" इति चन्दनादिप्रक्षेपः।

कलशे सर्वौष[1]धि प्रक्षेपः – "ॐ या ओषधीः पूर्वा जाता देवेभ्यस्त्रियुगं पुरा। मनैनुबभ्रुणामहꣳशतं धामानि सप्त च॥"

कलशे पञ्चा[2]मृतप्रक्षेपः – "ॐ पञ्चनद्यः सरस्वतीमपियन्ति सस्त्रोतसः। सरस्वती तु पञ्चधा सो देशेऽभवत्सरित्॥"

कलशे तीर्थोदकप्रक्षेपः – "ॐ इमम्मे गङ्गे यमुने सरस्वति शुतुद्रिस्तोमं सचता परुष्ण्या। असिक्न्या मरुद्वृधे वितस्तयार्जीकीये शृणुसुषोमया।" इति गङ्गाजलं प्रक्षिपेत्। अन्यतीर्थनद्या जलं वा॥

कलशे पञ्च[3]पल्लवप्रक्षेपः – "ॐ अश्वत्थे वो निषदनं

---

१. मुरामांसी वचा कुष्ठं शैलेयं रजनीद्वयम्।
शुण्ठी चम्पकमुस्ता च सर्वौषधिगणः स्मृतः॥
सर्वाभावे शतावरीं क्षिपेत्कलशे सर्वदाम्॥

२. पयोदधि घृतं चैव मधु च शर्करायुतम्।
पञ्चामृतमिति ज्ञेयं सर्वपापप्रणाशनम्॥

३. अश्वत्थोदुम्बरप्लक्षचूतन्यग्रोधपल्लवाः।
पञ्चपल्लवमित्युक्तं सर्वकर्मसु शोभनम्॥

पर्णे वो वसतिष्कृता। गोभाज इत्किला सथ यत्समवथ पूरुषम्॥"

कलशे सप्तमृ[१]त्तिका प्रक्षेपः– "ॐ स्योना पृथिवी नो भवानृक्षरा निवेशनी। यच्छा नः शर्म्मसप्रथाः॥" इति मन्त्रेण सप्तमृत्तिकां क्षिपेत्।

कलशे पूगीफलप्रक्षेपः– "ॐ याः फलिनीर्याऽअफलाऽअपुष्पा याश्च पुष्पिणी। बृहस्पतिप्रसूतास्ता नो मुञ्चतथ्ठंहसः॥"

कलशे पञ्च[२] रत्नप्रक्षेपः– "ॐ परिवाजपतिः कविरग्निर्हव्यान्क्रमीत्। दधद्रत्नानि दाशुषे॥" अनेन पञ्चरत्नं कलशे प्रक्षिपेत्।

कलशे कुशप्रक्षेपः – "ॐ शरासः कुशरामो दर्भासः सौर्य्या उत्तमोजा। अदृश्यवैरिणा सर्वे साकं नियमस्य च॥"

कलशे स्वर्णद्रव्यप्रक्षेपः– "ॐ हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेक आसीत्। स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम॥" इति मन्त्रेण दक्षिणाद्रव्यं कलशे प्रक्षिपेत्।

ततः पुष्पाणि तूष्णीमेव क्षिप्त्वा रक्तवस्त्रं सूत्रेण कण्ठे कलशस्य वेष्टयेन्मन्त्रमिमं पठित्वा– **"ॐ युवा सुवासा परिवीत आगात् स उ श्रेयान् भवति जायमानः। तं धीरासः कवय उन्नयन्ति स्वाध्यो मनसा देवयन्तः॥"** ततः कलशं पुष्पमालिकाभिर्वेष्टयित्वा कलशमुखोपरि तण्डुलपूर्णं पूर्णपात्रमनेन मन्त्रेण न्यसेत्– **"ॐ पूर्णादर्वि परापत सुपूर्णा पुनरापत। वस्नेव विक्रीणावहा इष मूर्जथ्ठंशतक्रतोः॥"** ततो रक्तवस्त्रावेष्टितं नारिकेलफलं पूर्णपात्रोपरि न्यसेत्– **"ॐ श्रीश्च ते लक्ष्मीश्च पत्न्यावहो रात्रे पार्श्वे नक्षत्राणि रूपमश्विनौ व्यात्तम्। इष्णन्निषाणामुम्म इषाण सर्वलोकम्म इषाण॥"** ततः कलशे वरुणमावाहयेत्– **"ॐ तत्त्वायामि ब्रह्मणा वन्दमानस्तदाशास्ते यजमानो हविर्भिः। अहेडमानो वरुणेह**

---

१. अश्वस्थानाद् गजस्थानात् वल्मीकात्सङ्गमाद् ह्रदात्।
राजद्वाराच्च गोष्ठाच्च मृदमानीय निक्षिपेत्॥

२. कनकं कुलिशं नीलं पद्मरागं च मौक्तिकम्।
एतानि पञ्चरत्नानि रत्नशास्त्रविदो विदुः।
अभावे सर्वरत्नानां हेमं सर्वत्र योजयेत्॥

बोद्धयरुशꣳ समान आयुः प्रमोषीः॥'' अनेन मन्त्रेण कलशोपरि गन्धपुष्पाक्षतान् क्षिपेत्। ततो वरुणं ध्यात्वाऽनेन मन्त्रेण प्रतिष्ठापनं कुर्यात्। स्वहस्तेऽक्षतादिकमादाय मन्त्रमिमं पठेत् –**''ॐ मनो जूतिर्जुषतामाज्यस्य बृहस्पतिर्यज्ञमिमं तनोत्वरिष्टं यज्ञꣳसमिमं दधातु। विश्वे देवास इह मादयन्तामो३ प्रतिष्ठ॥'' ''ॐ अपां पतये वरुणाय नमः।''** इत्युच्चार्याऽक्षतान् क्षिप्त्वा गङ्गाद्यावाहनं कुर्यात् पुष्पाक्षतान् प्रतिमन्त्रसमाप्तौ कलशे परिक्षिपेत् – **''ॐ सर्वे समुद्राः सरितस्तीर्थानि जलदा नदाः॥ आयान्तु मम शान्त्यर्थं दुरितक्षयकारकाः॥''** ततः साक्षतपाणिना दक्षिणेन कलशं स्पृष्ट्वा मन्त्रं पठेत् – **''ॐ कलशस्य मुखे विष्णुः कण्ठे रुद्रः समाश्रितः॥ मूले तस्य स्थितो ब्रह्मा मध्ये मातृगणाः स्मृताः॥ कुक्षौ तु सागराः सप्त सप्तद्वीपा बसुन्धरा॥ ऋग्वेदोऽथ यजुर्वेदः सामवेदो ह्यथर्वणः॥ अङ्गैश्च सहिताः सर्वे कलशाम्बुसमाश्रिताः॥ अत्र गायत्री सावित्री शान्तिः पुष्टिकरी तथा॥ आयान्तु यजमानस्य दुरितक्षय- कारकाः॥''**

ततः **''ॐ भूर्भुवः स्वः अस्मिन् कलशे वरुणं साङ्गं सपरिवारं सायुधं सशक्तिकमावाहयामि''** इत्युक्त्वा अक्षतान् कलशोपरि क्षिपेत्॥ **''ॐ कलशाधिष्ठितेभ्यो देवेभ्यो नमः कलशाधिष्ठितान् देवानावाहयामि''** इति पठित्वा पुनः कलशोपरि पुष्पाक्षतान् क्षिपेत्। ततः कलशं षोडशोपचारेण पञ्चोपचारेण वा सम्पूज्य प्रार्थनां कुर्यात् – **''ॐ देवदानवसम्बादे मथ्यमाने महोदधौ उत्पन्नोऽसि तदा कुम्भ विधृतो विष्णुना स्वयम्॥ त्वत्तोये सर्वतीर्थानि देवाः सर्वे त्वयि स्थिताः॥ त्वयि तिष्ठन्ति भूतानि त्वयि प्राणाः प्रतिष्ठिताः॥ शिवः स्वयं त्वमेवाऽसि विष्णुस्त्वं च प्रजापतिः॥ आदित्या वसवो रुद्रा विश्वेदेवाः सपैतृकाः॥ त्वयि तिष्ठन्ति सर्वेऽपि यतः कामफलप्रदाः। त्वत्प्रसादादिदं कर्म कर्तुमीहे जलोद्भव॥ सान्निध्यं कुरु मे देव प्रसन्नो भव सर्वदा॥ ॐ नमो नमस्ते स्फटिकप्रभाय सुश्वेतहाराय सुमङ्गलाय॥ सुपाशहस्ताय झषासनाय जलाधिनाथाय नमो नमस्ते॥** ततो जलं गृहीत्वा **''ॐ अनेन पूजनेन कलशाधिष्ठिता वरुणाद्यावाहिता देवताः प्रीयन्ताम् न मम''** इत्युक्त्वा जलं भूमौ क्षिपेत्॥ **इति वरुणकलशस्थापनपूजनविधिः॥**

अथ पुण्या[१]हवाचनविधिः

प्रथमतस्तावद् यजमानो भूमिं सम्पूज्य तदुपरि कलशमेकं स्थापयित्वाऽऽम्रपल्लवदूर्वादिभिः संयोज्य तस्मिन् वरुणमावाह्य पूजयेत्। ततोऽवनिकृतजानुर्यजमानः स्वाञ्जलिं शिरस्याधाय स्वदक्षिणस्यामुदङ्मुखान् विदुषो युग्मान्[२] ब्राह्मणान्[३] चोपवेश्य त्रिबारं प्रणमेत्। तदनन्तरमाचार्यः स्वदक्षिणेन हस्तेन कलशमुत्थाप्य यजमानाञ्जलौ धारयेत् ततो यजमानो ब्रूयात्–"**ॐ दीर्घा नागा नद्यो गिरयस्त्रीणि विष्णुपदानि च। त्रीणि पदा विचक्रमे विष्णुर्गोपा अदाभ्यः अतो धर्माणि धारयन्॥ तेना-युष्प्रमाणेन पुण्यं पुण्याहं दीर्घमायुरस्तु इति भवन्तो ब्रुवन्तु। ॥**" ततो यजमानः कलशं स्वशिरसा पत्नीशिरसा च संयोज्य कलशस्थाने कलशं संस्थाप्य पुनर्गृहीत्वा मन्त्रेणोपर्युक्तेन त्रिवारं कुर्यात्। ततो यजमान उत्तरमुखानां ब्राह्मणानां हस्तेषु जलं दत्त्वा ब्रूयात् "**ॐ सुप्रोक्षितमस्तु।**" ब्राह्मणा वदेयुः "**अस्तु सुप्रोक्षितम्।**" यजमानः–"**ॐ शिवा आपः सन्तु**" इत्याम्रपल्लवादिना ब्राह्मणानां दक्षिणहस्ते जलं दद्यात्। विप्रा वदेयुः–"**ॐ सन्तु शिवा आपः।**" इति प्रतिग्रहणम्। यजमानः– "**ॐ सौमनस्यमस्तु**" इति पुष्पाणि दद्यात्। विप्राः–"**ॐ अस्तु सौमनस्यम्।**" इति प्रतिग्रहणम्। यजमानः– "**ॐ अक्षतं चारिष्टं चास्तु।**" इति दद्यादक्षतान्। ब्राह्मणाः–"**ॐ अस्त्वक्षतमरिष्टं च।**" यजमानः "**ॐ गन्धाः पान्तु।**" इति चन्दनादिगन्ध

---

१. पुण्येऽहनि च सम्प्राप्ते विवाहे चौलिके तथा।
व्रतबन्धे च यज्ञादौ तथा च दानकर्मणि॥
गृहारम्भे धनप्राप्तौ तीर्थाभिगमने तथा। नवग्रहमखे शान्तावद्भुतेषु तथैव च॥
अन्यस्मिन्नपि सर्वस्मिञ्छुभे कर्मणि चोदिते।
वाचनीया द्विजाः सर्वे वेदशास्त्रपरायणाः॥

२. पुण्याहवाचने विप्रा युग्मा वेदविदो मताः।
यज्ञोपवीतिनः शस्ताः प्राङ्मुखाः स्युः पवित्रिणः॥
गन्धपुष्पार्चिताः शुद्धाः सोत्तरीयाः कुशायुधाः॥

३. न तत्र कुनखी काणो हीनाङ्गो विकलस्तथा।
बन्धाश्च विधुरो वापि क्रूरस्तु खलसेवकः॥
वकवृत्तिश्च दम्भी च हेतुको ज्ञानदुर्बलः।
एते चान्ये च विप्रा स्युर्न पुण्ये स्वस्तिवाचने॥

दद्यात्। ब्राह्मणाः "ॐ सौमङ्गल्यं चाऽस्तु।" यजमानः –"अक्षताः पान्तु।" इति अक्षतान् दद्यात्। ब्राह्मणाः–"ॐ आयुष्यमस्तु।" यजमानः–"ॐ पुष्पाणि पान्तु।" इति पुष्पाणि दद्यात्। ब्राह्मणाः–"ॐ सौश्रियमस्तु।" यजमानः–"ॐ सफलानि ताम्बूलानि पान्तु। इति ताम्बूलानि दद्यात्। ब्राह्मणाः –"ॐ ऐश्वर्यमस्तु॥" यजमानः –"ॐ दक्षिणाः पान्तु।" इति दक्षिणाद्रव्यं दद्यात्। ब्राह्मणाः –"ॐ बहुधनं चास्तु॥" यजमानः –"ॐ स्व- र्चितमस्तु॥" इति ब्राह्मणानां दक्षिणकरेषु जलं दद्यात्। ब्राह्मणाः–"अस्तु स्वर्चितम्॥

ततो यजमान आचार्यादीन् ब्राह्मणान् प्रणम्य प्रार्थयेत्–"ॐ श्रीर्यशो विद्या विनयो वित्तं बहुपुत्रं चायुष्यञ्चास्तु।" ततो ब्राह्मणास्तत् कलशजलेन यजमानस्य सपत्नीकस्य शिरः सिञ्चतो ब्रूयुः–"ॐ दीर्घमायुः शान्तिः पुष्टिस्तुष्टिश्चाऽस्तु।" ततो यजमानोऽक्षतानादाय ब्रूयात्–"ॐ यं कृत्वा सर्ववेदयज्ञक्रियाकरणकर्मारम्भाः शोभनाः प्रवर्त्तन्ते तमहमोङ्कार- मादिं कृत्वा ऋग्यजुः सामाथर्वाशीर्वचनं बहुऋषिमतं समनुज्ञातं भवदिभरनुज्ञातः पुण्यं पुण्याहं वाचयिष्ये।" ब्राह्मणाः–"वाच्यताम्।" इति ब्रूयुः। पुनः साक्षताञ्जलिर्यजमानो वदेत्–"ॐ व्रतजपनियमतपः स्वाध्यायक्रतुदया दमशमदानविशिष्टानां समेषां भवतां ब्राह्मणानां मनः समाधीयताम्॥" ब्राह्मणाः–"समाहितमनसः स्मः।" इति ब्रूयुः। यजमानः–"प्रसीदन्तु भवन्तः।" ब्राह्मणाः–"प्रसन्नाः स्मः।" इति वदेयुः। ततो यजमानः कलशोपरि पुष्पाक्षतान् क्षिप्त्वा प्रणम्य च कलशाद् भूमौ स्थापितयोरुभयोः पात्रयोः प्रथमपात्रे दूर्वाम्रपल्लवेन च किञ्चिदुदकं पातयेत्। अत्र ब्राह्मणा मन्त्रान् पठेयुः–"ॐ शान्तिरस्तु ॐ पुष्टिरस्तु॥ॐ तुष्टिरस्तु। ॐ वृद्धिरस्तु। ॐ अविघ्नमस्तु। ॐ आयुष्यमस्तु। ॐ आरोग्यमस्तु। ॐ शिवमस्तु। ॐ शिवकर्माऽस्तु ॐ धनधान्यसमृद्धिरस्तु। ॐ पुत्रपौत्रसमृद्धिरस्तु ॐ इष्टसम्पदस्तु॥"

ततो यजमानो द्वितीयपात्रे जलं पातयेत्। विप्रा मन्त्रान् पठेयुः–ॐ अरिष्टनिरसनमस्तु। ॐ यत्पापं यद्रोगमशुभमकल्याणं तद् दूरे प्रतिहतमस्तु॥" पुनः जलं प्रथमपात्रे पातयेत्। ब्राह्मणा मन्त्रान् ब्रूयुः–

"ॐ यच्छ्रेयस्तदस्तु। ॐ उत्तरे कर्मणि निर्विघ्नमस्तु। ॐ उत्तरोत्तरमहरहरभिवृद्धिरस्तु। ॐ उत्तरोत्तराः क्रियाः शुभाः शोभनाः सम्पद्यताम्। ॐ तिथिकरणे सुमुहूर्त्ते सुनक्षत्रे सग्रहे सलग्ने साधिदैवते प्रीयेताम्। ॐ दुर्गापाञ्चाल्यौ प्रीयेताम्। ॐ अग्निपुरोगा विश्वेदेवाः प्रीयन्ताम्। ॐ इन्द्रपुरोगा मरुद्गणाः प्रीयन्ताम्। ॐ माहेश्वरीपुरोगा उमामातरः प्रीयन्ताम्। ॐ वसिष्ठपुरोगा ऋषिगणाः प्रीयन्ताम्। ॐ अरुन्धतीपुरोगा एकपत्न्यः प्रीयन्ताम्। ॐ ब्रह्मपुरोगा सर्वेवेदाः प्रीयन्ताम्। ॐ विष्णुपुरोगाः सर्वे देवाः प्रीयन्ताम्। ॐ ऋषयश्छन्दांस्याचार्या वेदा देवा यज्ञाश्च प्रीयन्ताम्। ॐ ब्रह्मा च ब्राह्मणाश्च प्रीयन्ताम्। ॐ अम्बिकासरस्वत्यौ प्रीयेताम्। ॐ श्रद्धामेधे प्रीयेताम्। ॐ भगवती कात्यायिनी प्रीयताम्। ॐ भगवती माहेश्वरी प्रीयताम्। ॐ भगवती ऋद्धिकरी प्रीयताम्। ॐ भगवती वृद्धिकरी प्रीयताम्। ॐ भगवती पुष्टिकरी प्रीयताम्। ॐ भगवती तुष्टिकरी प्रीयताम्। ॐ भगवन्तौ विघ्नविनायकौ प्रीयेताम्। ॐ सर्वाः कुलदेवताः प्रीयन्ताम्। ॐ सर्वा ग्रामदेवताः प्रीयन्ताम्। ॐ सर्वा इष्टदेवताः प्रीयन्ताम्॥"

पुनर्जलं यजमानो द्वितीयपात्रे पातयेत्। ब्राह्मणा ब्रूयुः– "ॐ हताश्च ब्रह्मद्विषः। ॐ हताश्च परिपन्थिनः। ॐ हताश्च विघ्नकर्तारः। ॐ शत्रवः पराभवं यान्तु। ॐ शाम्यन्तु घोराणि। ॐ शाम्यन्तु पापानि। ॐ शाम्यन्तु ईतयः। ॐ शाम्यन्तूपद्रवाः॥"

पुनर्यजमानो जलं प्रथमपात्रे पातयेत्। ब्राह्मणा मन्त्रान् पठेयुः– "ॐ शुभानि वर्द्धन्ताम्। ॐ शिवा आपः सन्तु। ॐ शिवा ऋतवः सन्तु। ॐ शिवा ओषधयः सन्तु। ॐ शिवा वनस्पतयः सन्तु। ॐ शिवा अग्नयः सन्तु। ॐ शिवा आहुतयः सन्तु। ॐ शिवा आतिथयः सन्तु। ॐ अहोरात्रे शिवे स्याताम्। ॐ निकामे निकामे नः पर्जन्यो वर्षतु फलवत्यो न ओषधयः पच्यन्ताम्। ॐ योगक्षेमो नः कल्पताम्। ॐ शुक्राङ्गारकबुधवृहस्पतिशनैश्चरराहुकेतुसोमसहिता आदित्यपुरोगाः सर्वे ग्रहाः प्रीयन्ताम्। ॐ भगवान् नारायणः प्रीयताम्। ॐ भगवान् पर्जन्यः प्रीयताम्। ॐ भगवान् स्वामी महासेनः प्रीयताम्। ॐ

पुरोऽनुवाक्यया यत्पुण्यं तदस्तु। ॐ याज्यया यत्पुण्यं तदस्तु। ॐ वषट्कारेण यत्पुण्यं तदस्तु। ॐ प्रातः सूर्योदये यत्पुण्यं तदस्तु॥''

ततो यजमानस्तत्कलशं भूमौ निधाय प्रथमपात्रपातितजलेन शिरः सम्मृज्य सपरिवारगृहांश्चाभिषेचयेत्। द्वितीयपात्रजलमेकान्ते क्वचित् पातयेत्। ततोऽञ्जलिं बद्ध्वा यजमानो वदेत् –''ॐ पुण्याहकालान् वाचयिष्ये।'' ब्राह्मणा वदेयुः– ''ॐ वाच्यताम्।'' ततो यजमानोऽञ्जलिं बद्ध्वा वदेत्– ''ॐ ब्राह्मं पुण्यं महद्यच्च सृष्ट्युत्पादनकारकम्। वेदवृक्षोद्भवं नित्यं तत्पुण्याहं ब्रुवन्तु नः। भो ब्राह्मणाः। मम सकुटुम्बस्य सपरिवारस्य गृहे क्रियमाणस्यामुकर्मणः पुण्याहं भवन्तो ब्रुवन्तु।'' ततो ब्राह्मणा वदेयुः – ''ॐ पुण्याहम् ३'' इति त्रिवारं कथयेयुः। ''ॐ पुनन्तु मां देवजनाः पुनन्तु मनसा धियः। पुनन्तु विश्वाभूतानि जातवेदः पुनीहि माम्॥'' यजमानो वदेत् –''ॐ पृथिव्यामुद्धृतायान्तु यत्कल्याणं पुरा कृतम्। ऋषिभिः सिद्धगन्धर्वैस्तत्कल्याणं ब्रुवन्तु नः। भो ब्राह्मणाः। मम सकुटुम्बस्य सपरिवारस्य गृहे क्रियमाणस्याऽमुककर्मणः कल्याणं भवन्तो ब्रुवन्तु।'' ब्राह्मणा ब्रूयुः – ''ॐ कल्याणम् ३।'' ''ॐ यथेमां वाचं कल्याणीमावदानि जनेभ्यः ब्रह्मराजन्याभ्याॅं शूद्राय चार्याय च स्वाय चारणाय च। प्रियो देवानां दक्षिणायै दातुरिह भूयासमयं मे कामः समृद्ध्यतामुपमादो नमतु॥'' यजमानो ब्रूयात्– ''सागरस्य यथा वृद्धिर्महालक्ष्म्यादिभिः कृता। सम्पूर्णा सुप्रभावा च ताञ्च ऋद्धिं ब्रुवन्तु नः। भो ब्राह्मणाः। मम सकुटुम्बस्य॰ ऋद्धिं भवन्तो ब्रुवन्तु।'' ब्राह्मणा वदेयुः – ''ॐ ऋद्ध्यताम् ३।'' ॐ सत्रस्य ऋद्धिरस्यगन्म ज्योतिरमृता अभूम। दिवं पृथिव्याऽअध्यारुहामाविदाम देवान् स्वर्ज्योतिः॥'' यजमानो ब्रूयात् – ''ॐ स्वस्तिर्याऽविनाशाख्या पुण्यकल्याणवृद्धिदा। विनायकप्रिया नित्यं ताञ्च स्वस्ति ब्रुवन्तु नः। भो ब्राह्मणाः। मम सकुटुम्बस्य॰ स्वस्ति भवन्तो ब्रुवन्तु।'' ब्राह्मणा ब्रूयुः–ॐ स्वस्ति ३।। ॐ स्वस्ति न इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः। स्वस्ति नस्तार्क्ष्योऽअरिष्टनेमिः स्वस्ति नो वृहस्पति-दधातु॥'' यजमानो वदेत्– ''समुद्रमथनाज्जाता जगदानन्दकारिका।

हरिप्रिया च माङ्गल्या तां श्रियञ्च ब्रुवन्तु नः। भो ब्राह्मणाः। मम सकुटुम्बस्य॰ श्रीरस्तु इति भवन्तो ब्रुवन्तु॥" ब्राह्मणा वदेयुः– **"ॐ अस्तु श्रीः ३॥" "ॐ श्रीश्च ते लक्ष्मीश्च पत्न्यावहोरात्रे पार्श्वे नक्षत्राणि रूपमश्विनौ व्याप्तम्। इष्णन्निषाणामुम्म इषाण सर्वलोकम्म इषाण॥"**

ततो यजमानः साक्षताञ्जलिर्ब्रूयात्– **"ॐ कृतैतदस्मिन् दान-खण्डोक्तपुण्याहवाचने न्यूनातिरिक्तो यो विधिः स उपविष्टब्राह्मणानां वचनाच्छ्रीगणपतिप्रसादाच्च सर्वः परिपूर्णोऽस्तु॥"** इति जलाक्षतं क्षिपेत्। ततो ब्राह्मणा ब्रूयुः– **"ॐ अस्तु परिपूर्णः।"** ततो ब्राह्मणा यजमानस्य वामतस्तत्पत्नीमुपवेश्य[१] पुत्रादिकमप्युपवेश्य च कलशोदकप्रथमपात्रस्थजलैः कुशदूर्वाऽऽम्रपल्लवादिभिः सपरिवारं यजमानमभिषिञ्चेयुः। अत्राभिषेकः **"आपो हिष्ठे'ति मन्त्रैः" पयः पृथिव्या'**मिति मन्त्रैः **"द्यौः शान्ति'**'रिति मन्त्रैश्च प्रणवाद्यैस्तु कर्त्तव्यः। ततो ब्राह्मणा उच्चैर्ब्रूयुः– **"ॐ अमृता-भिषेकोऽस्तु शान्तिः शान्तिः सुशान्तिर्भवतु॥"**

ततो यजमानो हस्ते दक्षिणेऽक्षतदक्षिणामादाय देशकालौ सङ्कीर्त्य **"ॐ अद्य कृतैतत्पुण्याहवाचनकर्मणः साङ्गतासिद्ध्यर्थं तत्सम्पूर्णफल-प्राप्त्यर्थं च पुण्याहवाचकेभ्यो ब्राह्मणेभ्यो यथाशक्ति मनसोद्दिष्टां दक्षिणां विभज्य दातुमहमुत्सृजे॥"** इति सर्वेभ्यो ब्राह्मणेभ्यो यथाशक्ति दक्षिणाद्रव्यं दद्यात्॥

॥ इति पुण्याहवाचनविधिः ॥

अथ सर्वतोभद्रे मण्डलदेवतापूजनम्

यजमानः कलशादिकं संस्थाप्य पुण्याहवाचनं कारयित्वा देशकालौ सङ्कीर्त्य **"श्रुतिस्मृतिपुराणोक्तफलकामः अमुक गोत्रोत्पन्नोऽमुक नाम-धेयोऽहं शर्माऽमुककर्मणि अमुकदेवताप्रीत्यर्थं सर्वतोभद्रके मण्डलाधि-देवतास्थापनं तत्पूजनं प्रधानाऽमुकदेवतायाः षोडशोपचारेण च पूजनं**

---

१. आशीर्वादेऽभिषेके च पादप्रक्षालने तथा।
शयने भोजने चैव पत्नी तूत्तरतो भवेत्॥

करिष्ये।'' इति सङ्कल्प्य वरुणकलशाग्रभागे हरिद्रादिनोङ्कारं विलिख्य मन्त्रेणाऽनेन कुर्यादावाहनम्–''**ॐ आवाहयाम्यहं देवमोङ्कारं परमेश्वरम्। त्रिमात्रं त्र्यक्षरं दिव्यं त्रिपदञ्च त्रिदैवकम्॥'' ''ॐ भूर्भुवः स्व भगवन् ओङ्कार! इहागच्छ इह तिष्ठ! ओङ्काराय नमः। ओङ्कारमावाहयामि।** ततः पूजनं कृत्वा प्रार्थयेत्–''**ॐ ओङ्कारं बिन्दुसंयुक्तं नित्यं ध्यायन्ति योगिनः कामदं मोक्षदं चैव ओङ्काराय नमो नमः। ॐ ब्रह्मदेवी च गायत्रीदेवी तथा गोवर्द्धनेश्वरः। पृथ्वी यज्ञपतिश्चैव पञ्चोङ्कारान्नमाम्यहम्॥** इति प्रणमेत्।

अथ षोडशमातृकापूजनम्

षोडशकोष्ठकेषु षोडशमातृकाणामावाहनमनेन मन्त्रेण कृत्वा पूजयेत्– **''ॐ गौरी पद्मा शची मेधा सावित्री विजया जया। देवसेना स्वधा स्वाहा मातरो लोकमातरः। हृष्टिः पुष्टिस्तथा तुष्टिस्तथात्मकुलदेवताः।''** अक्षतैरावाह्य कथयेत् ''**ॐ भूर्भुवः स्वः गौर्यादिषोडशमातृका इहागच्छतम् इह तिष्ठतम् गौर्यादिषोडशमातृकाभ्यो नमः।** ततः पूजां कृत्वा प्रार्थयेत्– **''ॐ जयन्ती मङ्गला काली भद्रकाली कपालिनी। दुर्गा क्षमा शिवा धात्री स्वाहा स्वधा नमोऽस्तु ते॥''** ''अनया पूजया षोडशमातृकाः प्रीयन्ताम् न मम।'' इति पुष्पाक्षतान् क्षिपेत्।

अथ चतुःषष्टियोगिनीपूजनम्

अग्निकोणे चतुःषष्टिकोष्ठकेषु योगिनीनामावाहनमेभिर्मन्त्रैः कृत्वा पूजयेत्– **''आवाहयाम्यहं देवीं योगिनीं परमेश्वरीम्। योगाभ्यासेन सन्तुष्टा परध्यानसमन्विता। चतुःषष्टिसमाख्याता योगिन्यो हि बरप्रदाः त्रैलोक्य पूजिता नित्यं देवमानुषयोगिभिः॥ ॐ भूर्भुवः स्वः चतुष्षष्टियोगिनीमातृका इहागच्छतम् इह तिष्ठतम् योगिनीमातृकाभ्यो नमः।''** इत्यक्षतैः कृत्वाऽऽवाहनं पूजयेत्। ततः प्रार्थनां कुर्यात्– ''**ॐ दिव्य कुण्डलसङ्काशा दिव्यज्वाला त्रिलोचना। मूर्त्तिमती ह्यमूर्त्ता च उग्रा चैवोग्ररूपिणी। अनेकभावसंयुक्ता संसारार्णवतारिणी। यज्ञे कुर्वन्तु निर्विघ्नं श्रेयो यच्छन्तु मातरः॥''** इति नमस्कारं कुर्यात्।

अथ नवग्रहपूजनम्

नवकोष्ठकेषु यथोक्ताकारेण ग्रहान् निर्मायाऽधोलिखितमन्त्रैरावाहनं कृत्वा पूजयेत् –

सूर्यः- (गोलाकारं सूर्यं रक्तपुष्पाक्षतैरावाह्य) – "ॐ आकृष्णेन रजसा वर्तमानो निवेशयन्नमृतं मर्त्यञ्च। हिरण्येन सविता रथेना देवो याति भुवनानि पश्यन्॥" ॐ भूर्भुवः स्वः भोः सूर्य। इहागच्छ इह तिष्ठ सूर्याय नमः सूर्यमावाहयामि।

चन्द्रः-(अर्धचन्द्राकृतिं सोमं श्वेतपुष्पाक्षतैरग्निकोणे) - "ॐ इमं देवा असपत्नथ्ठं सुवध्वं महते क्षत्राय महते ज्येष्ठ्याय महते जानराज्यायेन्द्रस्येन्द्रियाय। इममुष्य पुत्रमुष्यै पुत्रमस्यै विश एष वोमी राजा सोमोऽस्माकं ब्राह्मणानाथ्ठं राजा।" ॐ भूर्भुवः स्वः सोम इहागच्छ इह तिष्ठ सोमाय नमः। सोममावाहयामि।

भौमः-(त्रिकोणं भौमं रक्तपुष्पाक्षतैर्दक्षिणे) - "ॐ अग्निर्मूर्द्धा दिवः ककुत्पतिः पृथिव्याऽअयम्। अपाथ्ठंरेताथ्ठंसि जिन्वति।" ॐ भूर्भुवः स्वः भौम इहागच्छ इह तिष्ठ भौमाय नमः। भौममावाहयामि।

बुधः (वाणाकारं बुधं हरिताक्षतैः पीतपुष्पैरीशानकोणे) - "ॐ उद्बुध्यस्वाग्ने प्रति जागृहि त्वमिष्टापूर्त्ते सथ्ठं सृजेथामयं च। अस्मिन्त्स-धस्थेऽध्युत्तरस्मिन् विश्वे देवा यजमानश्च सीदत॥" ॐ भूर्भुवः स्वः बुध इहागच्छ। इह तिष्ठ। बुधाय नमः। बुधमावाहयामि।

गुरुः- (अष्टदलाकृतिं गुरुं पीतपुष्पाक्षतैरुत्तरे) - "ॐ वृहस्पते अति यदर्यो अर्हाद्युमद्विभाति क्रतुमज्जनेषु यद्दीदयच्छवस ऋतप्रजात-तदस्मासु द्रविणं धेहि चित्रम्।" ॐ भूर्भुवः स्वः वृहस्पते। इहागच्छ इह तिष्ठ। वृहस्पतये नमः। वृहस्पतिमावाहयामि।

शुक्रः-(पञ्चकोणाकृतिं शुक्रं पूर्वे श्वेतपुष्पाक्षतैः) - "ॐ अन्नात्परिस्रुतो रसं ब्रह्मणा व्यपिवत्क्षत्रं पयः सोमं प्रजापतिः। ऋतेन सत्यमिन्द्रियं विपानथ्ठंशुक्रमन्धस इन्द्रस्येन्द्रियमिदं पयोऽमृतं मधु। ॐ भूर्भुवः स्वः शुक्र इहागच्छ। इह तिष्ठ। शुक्राय नमः। शुक्रमावाहयामि॥"

शनिः- (मनुष्याकारं शनिं पश्चिमे कृष्णपुष्पाक्षतैः)- **''ॐ शन्नो देवीरभिष्टय आपो भवन्तु पीतये। शं योरभिस्रवन्तु नः।'' ॐ भूर्भुवः स्वः शनैश्चर इहागच्छ इह तिष्ठ। शनैश्चराय नमः। शनैश्चर-मावाहयामि।**

राहुः -(मकराकृतिं राहुं नैर्ऋत्ये कृष्णपुष्पाक्षतैः)- **''ॐ कया नश्चित्र आभुव दूती सदा वृधः सखा, कया शचिष्ठया वृता॥'' ॐ भूर्भुवः स्वः राहो इहागच्छ इहतिष्ठ। राहवे नमः। राहुमावाहयामि।**

केतुः- (ध्वजाकारं केतुं वायुकोणे कृष्णपुष्पाक्षतैः)- **''ॐ केतुं कृण्वन्नकेतवे पेशोमर्य्या अपेशसे। समुषद्भिरजायथाः।'' ॐ भूर्भुवः स्वः केतो इहागच्छ। इह तिष्ठ। केतवे नमः। केतुमावाहयामि।**

ततो नवग्रहाणां पूजनं कृत्वा प्रार्थयेत्- **''ॐ ब्रह्मामुरारिस्त्रिपुरान्त-कारी भानुः शशी भूमिसुतो बुधश्च। गुरुश्च शुक्रः शनिराहुकेतवः सर्वग्रहाः शान्तिकरा भवन्तु॥''** इति नवग्रहपूजनम्।

अथाधिदेवतापूजनम्

ग्रहाणां दक्षिणपार्श्वेऽधिदेवतानामावाहनं कृत्वाऽनेन मन्त्रेणाऽक्षतान् क्षिपेत्- **''ॐ शिवः शिवा विष्णुब्रह्मेन्द्रयमकालकाः। चित्रगुप्तोऽथ भान्वादि दक्षिणे चाधिदैवताः।'' ॐ भूर्भुवः स्वः शिवाद्यधिदेवताः इहागच्छतम् इह तिष्ठतम्। अधिदेवताभ्यो नमः। अधिदेवता आवाहयामि।''** आवाहनान्तरे पूजनं कुर्यात्।

अथ प्रत्यधिदेवतापूजनम्

ग्रहाणां वामपार्श्वे प्रत्यधिदेवतानां मन्त्रेणाऽनेनाऽऽवाहनं कुर्यात्- **''ॐ अग्निरापो धरा विष्णुः शक्रेन्द्राणी पितामहः। पन्नगार्कक्रमाद् वामे ग्रहप्रत्यधिदेवताः॥'' ''ॐ भूर्भुवः स्वः अग्न्यादयः प्रत्यधि देवताः इहागच्छतम्। इह तिष्ठतम्। प्रत्यधिदेवताभ्यो नमः। प्रत्यधि देवता आवाहयामि।** ततः पूजनं कुर्यात्।'' **''ॐ अनया पूजयाऽधि-देवताप्रत्यधिदेवता सहितनवग्रहदेवताः प्रीयन्ताम् न मम॥''**

अथ वसोर्द्धारापूजनम्

वस्त्राच्छन्ने पीठादौ 'श्रीः' इत्यक्षरं विलिख्य तदधः कुङ्कुमेन घृतसिन्दूरेण वा एकविन्दुं तदधो दक्षिणोत्तरं द्वौ विन्दू, तदधो दक्षिणोत्तरं त्रीन् विन्दून् तदधश्चतुरः, तदधः पञ्च तदधः षट् तदधः सप्त विन्दून् क्रमेण लिखित्वा घृतेन दुग्धेन वा उत्तरतो दक्षिणं यावत्सप्त धाराः निपातयेत् पठेन्मन्त्रमिमम्–

"ॐ वसो पवित्रमसि शतधारं वसोः पवित्रमसि सहस्रधारं देवस्त्वा सविता पुनातु वसोः पवित्रेण शतधारेण सुप्त्वाः कामधुक्षः।" **"ॐ वसोर्धारादेवताभ्यो नमः। आवाहयामि।"** ततोऽर्चनं विधाय प्रार्थनां कुर्यात्। **"ॐ यदङ्गत्वेन भो देव्यः पूजिता विधिमार्गतः। कुर्वन्तु कार्यमखिलं निर्विघ्नेन क्रतूद्भवम्॥" "अनया पूजया वसोर्धारा देवताः प्रीयन्ताम्, न मम॥"** इत्युच्चार्याऽक्षतान् विसर्जयेत्।

वास्तोष्पतिदेवतापूजनम्

नैऋत्ये कोणे वास्तुदेवतानामेकाशीतिकोष्ठकेषु मन्त्रेणाऽनेनावाह्य पूजनं कुर्यात्– **"ॐ वास्तोष्पते प्रतिजानीह्यस्मान्स्वावेशोऽनमीवो भवा नः यत्त्वे महे प्रति तन्नो जुषस्व शन्नो भव द्विपदे शं चतुष्पदे।" "ॐ भूर्भुवः स्वः वास्तोष्पतिदेवता इहागच्छतम् इह तिष्ठतम्। वास्तोष्पति-देवताभ्यो नमः आवाहयामि।"** ततः पूजनं कृत्वा प्रार्थयेत् – **"ॐ नमस्ते वास्तुपुरुष भूशय्यानिरत प्रभो। मद्गृहे धनधान्यादिसमृद्धिं कुरु सर्वदा॥" अनेन पूजनेन वास्तोष्पतिदेवताः प्रीयन्ताम् न मम।"** इति पठित्वाऽक्षतान् क्षिपेत्।

अथ क्षेत्रपालपूजनम्

दक्षिणे पञ्चाशत्कोष्ठकेषु क्षेत्रपालदेवता आवाह्याऽनेन मन्त्रेण स्थापयेत्– **"ॐ न हि स्पर्शमविदन्नयन्मस्माद्वैश्वानरात्पुर एतारमग्नेः। एमेनमवृधन्नमृता अमर्त्यवैश्वानरं क्षेत्रजित्याय देवाः।" ॐ क्षेत्रपालेभ्यो नमः। क्षेत्रपालदेवतां आवाहयामि।"** तदनन्तरं पूजनं कृत्वा प्रार्थयेत्– **"ॐ नमो क्षेत्रपालस्त्वं भूतप्रेतगणैः सह। पूजां बलिं गृहाणेमं सौम्यो**

भवतु सर्वदा॥" अनया पूजया श्रीक्षेत्रपालदेवता: प्रीयन्ताम् न मम।" इत्युच्चार्याऽक्षतान् क्षिपेत्।

अथ पञ्चलोकपालपूजनम्

गणपत्यादीनां पञ्चलोकपालानामुत्तरे पञ्चकोष्ठकेषु कृत्वाऽऽवाहनं प्रपूजयेत्। आवाहनमन्त्रा: -

गणपति:- 'ॐ गणानां त्वा गणपति॰' इत्यादिना मन्त्रेणाऽऽवाह्य' "ॐ भूर्भुव: स्व: गणपते इहागच्छ इह तिष्ठ गणपतये नम:। आवाहयामि।" इति पठित्वाऽक्षतान् क्षिपेत्।

दुर्गा (देवी): - "ॐ जातवेदसे सुनवाम सोममराती यतो निदहाति वेद:। स न: पर्षदति दुर्गाणि विश्वानावेव सिन्ध र्दुरितात्यग्नि:।" 'ॐ भूर्भुव: स्व: दुर्गे इहागच्छ इह तिष्ठ। दुर्गायै नम:। आवाहयामि।' अक्षतक्षेपणं कुर्यात्।

वायु:- "ॐ आनो नियुद्‌भि: सतिनीभिरध्वरꣳ सहस्त्रिणी-भिरुपयाहि यज्ञं वायोऽअस्मिन् सवने मादयस्व यूयं पात स्वस्तिभि: सदा न:। भूर्भुव: स्व: वायो! इहागच्छ। इह तिष्ठ वायवे नम:। आवाहयामि।" अक्षतक्षेपणं कुर्यात्।

आकाश:- "ॐ घृतं घृत पावान: पिवत वसाम्बसापावान: पिबतान्तरिक्षस्य हविरसि स्वाहा दिश: प्रदिशऽआदिशो विदिशऽउद्दिशो दिग्भ्य: स्वाहा। ॐ भूर्भुव: स्व: आकाश। इहागच्छ। इह तिष्ठ। आकाशाय नम:। आवाहयामि।" अक्षतान् क्षिपेत्।

अश्विनौ- "ॐ यावाङ्कशा मधुमत्याश्विना सुनृतावती तया यज्ञम्मिमिक्षताम्। ॐ भूर्भुव: स्व: अश्विनौ इहागच्छताम्। इह तिष्ठताम्। अश्विभ्यां नम:। आवाहयामि।" अक्षतान् क्षिपेत्।

तत: पञ्चलोकपालानां पूजनं कृत्वा प्रार्थनां कुर्यात् – **"ॐ गणेशश्चाम्बिकावायुराकाशश्चाश्विनौ तथा। ग्रहाणामुत्तरे पञ्चलोकपालान् नमाम्यहम्।" अनया पूजया पञ्चलोकपालदेवता: प्रीयन्ताम्, न मम।"** इत्युच्चार्य पुष्पाक्षतान् क्षिपेत्।

अथ दशदिक्पालपूजनम्

दशकोष्ठकेषु पूर्वादिदिक्क्रमेण दशदिक्पालानामेभिर्मन्त्रैरावाहनं कुर्यात्-

इन्द्रः -(पूर्वे)- **"ॐ त्रातारमिन्द्रमवितारमिन्द्रꣳहवे हवे सुहवꣳ शूरमिन्द्रम्। ह्वयामि शक्रम्पूरुहूतमिन्द्रꣳ स्वस्ति नो मघवा धात्विन्द्रः। ॐ भूर्भुवः इन्द्र! इहागच्छ इह तिष्ठ। इन्द्राय नमः। इन्द्रमावाहयामि।"** अक्षतक्षेपणम्।

अग्निः- (आग्नेय्याम्) -**"ॐ अग्निं दूतं पुरोऽदधे हव्यवाहमुपब्रुवे। देवां आसादयादिह।" ॐ भू०। अग्नये नमः अग्निमा०॥"** अक्षतान् क्षिपेत्

यमः - (दक्षिणे) - **"ॐ असि यमो अस्यादित्यो अर्वन्नसि त्रितो गुह्येन व्रतेन असि सोमेन स मया विपृक्त आहुस्ते त्रीणि दिवि बन्धनानि॥ ॐ भू० यमाय नमः यममा०॥"** अक्षतान् क्षिपेत्।

निर्ऋतिः- (नैऋत्यकोणे)- **"ॐ असुन्वन्तम यजमानमिच्छस्तेनस्येत्यमन्विहि तस्करस्य। अन्यमस्मदिच्छसातऽइत्या नमो देवि निऋते तुभ्यमस्तु ॐ भू०॥ निर्ऋतये नमः। निर्ऋतिमा०॥"** अक्षतान् क्षिपेत्।

वरुणः-(पश्चिमे)-**"ॐ इमं मे वरुण श्रुधी हवमद्या च मृडय। त्वामवस्युराचके। ॐ भू०॥ वरुणाय नमः। वरुणमा०॥"** अक्षतान् क्षिपेत्।

वायुः-(वायव्ये)- **"ॐ वायुरग्रेगा यज्ञप्रीःसाकं गन्मनसा यज्ञम्। शिवो नियुद्भिः शिवाभिः।" ॐ भू०॥ वायवे नमः। वायुमा०।"** अक्षतान् क्षिपेत्।

कुबेरः-(उत्तरे)- **"ॐ कुविदङ्ग यवमन्तो यवं चिद्यथा दान्त्यनुपूर्वं वियूय इहेहैषां कृणुहि भोजनानि ये बर्हिषां नम उक्तिं यजन्ति। ॐ भू०। कुबेराय नमः। कुबेरमावाहयामि।"** अक्षतान् क्षिपेत्।

ईशानः- (ईशानकोणे)- **"ॐ तमीशानञ्जगतस्तस्थुषस्पतिन्धियञ्जिन्वमवसे हूमहे वयम्। पूषा नो यथा वेद साम सद्वृधे रक्षिता पायुरदब्धः स्वस्तये। ॐ भू० ईशानाय नमः। ईशानमा०।"** अक्षतान् क्षिपेत्।

ब्रह्मा - (पूर्वेशानयोर्मध्ये)- **"ॐ ब्रह्म यज्ञानं प्रथमं पुरस्ताद्वि-सीमतः सुरुचो वेन आवः। स बुध्न्या उपमा अस्य विष्ठाः सतश्च योनिमतश्च विवः।" ॐ भू०॥ ब्रह्मणे नमः ब्रह्माणमा०।"** अक्षतान् क्षिपेत्।

अनन्तः- नैर्ऋत्यपश्चिमयोर्मध्ये) -**"ॐ नमोऽस्तु सर्पेभ्यो ये के च पृथिवीमनु। येऽन्तरिक्षे ये दिवि तेभ्यः सर्पेभ्यो नमः। ॐ भू०। अनन्ताय नमः। अनन्तमावाहयामि।"** अक्षतान् क्षिपेत्।

एवं दशदिक्पालानामावाहनं कृत्वा यथाविधि पूजयेत्। ततः प्रार्थयेत्- **"ॐ इन्द्रादिदशदिक्पाला वरदाभयपाणयः। मखं रक्षन्तु ते सर्वे भूयोभूयो नमाम्यहम्।" अनया पूजया दशदिक्पालदेवताः प्रीयन्ताम् न मम।"** इत्युच्चार्य पुष्पाक्षतान् क्षिपेत्।

॥ इति पञ्चलोकपालदशदिक्पालपूजनम् ॥

अथ सर्वतोभद्रमण्डले देवतानां पूजनम् (सङ्क्षेपेण)

सर्वतोभद्रमण्डले मध्यकणिकायां ब्रह्माणमावाह्येशानादिक्रमेणाऽक्षत-क्षेपणद्वारेण देवतानामावाहनं कुर्यात् - **"ॐ ब्रह्मणे नमः। ॐ ईशानाय नमः। ॐ सोमाय नमः ॐ वायवे नमः। ॐ वरुणाय नमः। ॐ निर्ऋतयेनमः। ॐ धर्माय नमः। ॐ अग्नये नमः। ॐ इन्द्राय नमः। ॐ अष्टवसुभ्यो नमः। ॐ एकादशरुद्रेभ्यो नमः। ॐ द्वादशादित्येभ्यो नमः। ॐ अश्विभ्यां नमः। ॐ विश्वेभ्यो देवेभ्यो नमः। ॐ पितृभ्यो नमः। ॐ सप्तयक्षेभ्यो नमः। ॐ भूतेभ्यो नमः। ॐ सर्पेभ्यो नमः। ॐ गन्धर्वेभ्यो नमः। ॐ अप्सरोभ्यो नमः। ॐ स्कन्दाय नमः। ॐ नन्दीश्वराय नमः। ॐ शूलाय नमः। ॐ महाकालाय नमः। ॐ प्रजापतिभ्यो नमः। ॐ दुर्गायै नमः। ॐ विष्णवे नमः। ॐ सर्वपितृभ्यो नमः। ॐ मृत्युरोगेभ्यो नमः। "ॐ गणपतये नमः। ॐ अद्भ्यो नमः। ॐ मरुद्भ्यो नमः। ॐ पृथिव्यै नमः। ॐ गङ्गादिसरिद्भ्यो नमः। ॐ सप्तसमुद्रेभ्यो नमः। ॐ मेरवे नमः।"**

ततो मण्डलाद्बहिरुत्तरत ईशानादिक्रमेणाऽऽयुधान्यावाहयेत्- "ॐ **गदायै नमः। ॐ त्रिशूलाय नमः। ॐ वज्राय नमः। ॐ शक्तये नमः। ॐ दण्डाय नमः। ॐ खड्गाय नमः। ॐ अङ्कुशाय नमः।"**

ततो मण्डलाद् आयुधेभ्यो बहिर्ऋषीनुत्तरत ईशानादिक्रमेणाऽऽवाहयेत् **"ॐ गौतमाय नमः। ॐ भरद्वाजाय नमः। ॐ विश्वामित्राय नमः। ॐ कश्यपाय नमः। ॐ जमदग्नये नमः। ॐ वसिष्ठाय नमः। ॐ अत्रये नमः। ॐ अरुन्धत्यै नमः।"**

तत ऋषिभ्यो बहिः पूर्वत आग्नेयक्रमेण शक्तीनामावाहनं कुर्यात्- **"ॐ ऐन्द्र्यै नमः। ॐ कौमार्यै नमः। ॐ ब्राह्म्यै नमः। ॐ वाराह्यै नमः। ॐ चामुण्डायै नमः। ॐ वैष्णव्यै नमः। ॐ माहेश्वर्यै नमः। ॐ वैनायक्यै नमः।"**

एवमावाहनं कृत्वा मन्त्रेणाऽनेन प्रतिष्ठापयेत्- **"ॐ मनोजूतिर्ज्जुषतामाज्यस्य वृहस्पतिर्यज्ञमिमं तनोत्वरिष्टं यज्ञꣳ समिमं दधातु। विश्वेदेवास इह मादयन्तामों प्रतिष्ठ।"** ततो यथाविधि सर्वतोभद्रदेवतानां पूजनं कृत्वा प्रार्थयेत्- **"ॐ भद्रं कर्णेभिः शृणुयाम देवा भद्रं पश्येमाक्षभिर्यजत्राः। स्थिरैरङ्गैस्तुष्टुवाꣳसस्तनूभिर्व्यशेमहि देवहितं यदायुः।" ॐ सायुधाः सर्षयः सशक्तीकाः सर्वतोभद्रमण्डलस्था देवताः प्रीयन्तामनया पूजया, न मम। ॐ सर्वतोभद्रमण्डलदेवेभ्यो नमः।"** अक्षतान् क्षिपेत्।

॥ इति सर्वतोभद्रमण्डलस्थदेवानां सङ्क्षिप्तपूजनविधिः ॥

अथाग्न्युत्तारणदेवप्राणप्रतिष्ठाविधिः

यजमानो हस्ते (दक्षिणे) जलाक्षतपुष्पाण्यादाय देशकालौ सङ्कीर्त्य **"ममात्मनः श्रुतिस्मृतिपुराणोक्तफलप्राप्त्यर्थं सकलाभीष्टसिद्ध्यर्थं नूतनाऽमुकधातुमय्यमुकदेवप्रतिमायाः घटनकालिकस्वर्णकारकृतटङ्काद्याघातदोषपरिहारार्थमग्न्युत्तारणपूर्वममुकदेवसारूप्यादिलाभयोग्यत्वसम्पादनाय प्राणप्रतिष्ठां करिष्ये।"** इति सङ्कल्प्य प्रतिमां यन्त्रं वा नवकांस्यादिपात्रे निधाय घृतेनाभ्यज्य तदुपरि पयोजलधारां कुर्यात्। तत्राऽऽचार्यो

मन्त्रान् पठेत्- "ॐ समुद्रस्य त्वा वकयाग्ने परिव्ययामसि। पावको-ऽअस्मभ्यथ्ठं शिवो भव॥१॥ हिमस्य त्वा जरायुणाऽग्ने परिव्ययामसि। पावकोऽअस्मभ्यथ्ठं शिवोभव॥२॥ उपज्मनुपवेतसे वतरनदीष्वा अग्ने पित्तेमपामसि मण्डूकिताभिरागहिसेमन्नो यज्ञमपावकवर्णथ्ठं शिवङ्कृधि॥३॥ अपामिदन्ययनथ्ठं समुद्रस्य निवेशनम्। अन्यास्ते अस्मत्तपन्तु हेतयः पावकोऽअस्मभ्यथ्ठं शिवोभव॥४॥ अग्ने पावक रोचिषा मन्द्रया देवजिह्वया। आदेवान्वक्षि यक्षि च॥५॥ स नः पावक दीदिवोऽग्ने देवां इहावह। उपयज्ञथ्ठं हवि श्वनः॥६॥ पावकया यश्चिन्त्या कृपाक्षामन् रुरुच उषसो न भानुना। तूर्वन्नया मन्नेतशस्य नूरण आयो घृणेन तृतषाणोऽजरः॥७॥ ॐ नमस्ते हरसे शोचिषे नमस्ते अस्त्वर्चिषे। अन्यास्तेऽअस्मत्तपन्तु हेतयः पावकोऽअस्मभ्य थ्ठं शिवो भव॥८॥ नृष देवेडप्सुषदेवेड् वर्हिष देवेड् वनसदेवेड्स्वर्विदेवेड॥९॥ ये देवा देवानां यज्ञियानाथ्ठं संव्वत्सरीणमु-पभागमासतेऽआहुतादो हविषा यज्ञेऽअस्मिन्त्स्वयं पिबन्तु मधुनो घृतस्य॥१०॥ ये देवा देवेष्वधिदेवत्वमायन्ये ब्रह्मणः पुरऽएतारोऽअस्य। येभ्यो न ऋते पवते धाम किञ्चन ते दिवो न पृथिव्या अधिस्नुषु॥११॥ प्राणदाऽअपानदा व्यानदाव्वचोदा व्वरिवोदाः। अन्यांस्तेऽअस्मत्तपन्तु हेतयः पावकोऽअस्मभ्यथ्ठं शिवो भव॥"

ततः प्रतिमां यन्त्रं वाऽऽसने निधाय हस्ते जलमादाय "ॐ अस्य श्रीप्राणप्रतिष्ठामन्त्रस्य ब्रह्मविष्णुमहेश्वरा ऋषय ऋग्यजुःसामानि छन्दांसि क्रियामयवपुः प्राणाख्या देवता आं बीजं ह्रीं शक्तिः क्रौं कीलकम् अस्यां नूतनप्रतिमाया (अस्मिन्नूतनयन्त्रे) प्राणप्रतिष्ठापने विनियोगः।" इत्युच्चार्य जलं क्षिपेत्। ततो मूर्त्तिं यन्त्रं वा दक्षिणहस्तेन साक्षतपुष्पेण स्पृशन् पठेत् "ॐ आं ह्रीं कौं यं रं लं वं शं षं सं हं क्षं हं सः सोऽहम् अस्य अमुकदेवतायाः प्राणा इह प्राणाः।" अक्षतपुष्पाणि क्षिपेत्। पुनरादाय तथैव कर्त्तव्यम्- "ॐ आं ह्रीं क्रौं॰ जीव इह स्थितः।" अक्षतपुष्पाणि क्षिप्त्वा पुनरादाय तथैव कर्त्तव्यम्- "ॐ आं ह्रीं क्रौं॰ अमुकदेवतायाः सर्वेन्द्रियाणि वाङ्मनस्त्वक्चक्षुः श्रोत्रजिह्वाप्राणपाणि- पादपायूपस्थानि

इहैवागत्य सुखं चिरं तिष्ठन्तु स्वाहा॥" पुष्पाक्षतान् क्षिपेत्। पुनः पुष्पाण्यादाय "**ॐ मनो जूतिर्ज्जुषता॰**" इत्यादिना मन्त्रेण प्रतिष्ठापयेत्। ततो मूर्त्तिं दक्षिणहस्तेन स्पृशन् षोडशप्रणवान् जप्त्वा जलाक्षतान् गृहीत्वा पठेत्- "**ॐ अनेनाऽस्याऽमुकदेवप्रतिमाया गर्भाधानादयः षोडशसंस्काराः सम्पद्यन्ताम्।**" जलाक्षतान् क्षिपेत्। ततो मूर्तेश्चक्षुषी स्वर्णशलाकयोन्मीलयन् पठेत्- "**ॐ वृत्रस्यासि कनीनकश्चक्षुर्दा असि चक्षुर्मे देहि।**" ततो मूर्त्तिं प्रणम्य स्तुत्वा षोडशोपचारैः पूजयेत्।

॥ इति प्राणप्रतिष्ठायामग्न्युत्तारणप्राणप्रतिष्ठाविधिः ॥

अथ षोडशोपचारेण देवपूजनविधिः

आसने देवप्रतिमां देवीप्रतिमां वा यथाऽभीष्टं स्थापयित्वा तत्त-द्देवताविहितमन्त्रैर्ध्यानं कृत्वा "**ॐ भूर्भुवः स्वः अमुकदेवताभ्यो नमः ध्यानं समर्पयामि।**" इत्युच्चार्य ध्यानं समर्पयेत्। ततोऽधोलिखितवैदिक पौराणिकमन्त्रैर्यथोपचारं समर्पयेत्।

आवाहनम्- (वैदिकमन्त्रः) - "**ॐ धामच्छदग्निरिन्द्रो ब्रह्मा देवो वृहस्पतिः। स चेतसो विश्वेदेवा यज्ञं प्रावन्तु नः शुभेः।**" (पौराणिकमन्त्रः) - "**ॐ आगच्छागच्छ देवेश त्रैलोक्यतिमिरापह। क्रियमाणां मया पूजां गृहाण सुरसत्तम।।** आवाहयामि स्थापयामि पूजयामि।

आसनम् -(वै.म.) - "**ॐ यविष्ठदाशुषो नृथ्ंपाहि शृणुधी गिरः रक्षातोकमुत्मना।** (पौ.म.) **ॐ रम्यं सुशोभनं दिव्यं सर्वसौख्यकरं शुभम्। आसनञ्च मया दत्तं गृहाण परमेश्वर।**" "आसनं समर्पयामि।" इत्युच्चार्य पुष्पं समर्पयेत्।

पाद्यम्- (वै.मन्त्रः)- "**ॐ एतावानस्य महिमातो ज्यायांश्च पूरुषः। पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि।**" (पौ.म.)- "**ॐ उष्णोदकं निर्मलञ्च सर्वसौगन्ध्यसंयुतम्। पादप्रक्षालनार्थाय दत्तं ते प्रतिगृह्यताम्।**" पाद्यं समर्पयामि। चरणौ पाद्यार्थं जलं समर्पयेत्।

अर्घ्यम्-(वै.मं.)-"**ॐ सहस्त्रशीर्षाः पुरुषः सहस्त्राक्षः सहस्त्रपात्। स भूमिथ्ं सर्वतो स्पृत्वात्त्यतिष्ठद्दशाङ्गुलम्।**" (पौ.मं.)-

ॐ अर्घ्यं गृहाण देवेश गन्धपुष्पाक्षतैः सह। करुणां कुरु मे देव गृहाणार्घ्यं नमोऽस्तु ते।'' देवताया हस्तयोर्गन्धपुष्पाक्षतयुतं जलं त्रिबारं समर्पयेत्।

आचमनीयम्- (वै.म.)- **''ॐ शन्नो देवीरभिष्टयऽआपो भवन्तु पीतये शं योरभिस्त्रवन्तु नः॥''** (पौ.म.)- **''ॐ सर्वतीर्थसमायुक्तं सुगन्धिनिर्मलं जलम्। आचम्यतां मया दत्तं गृहाण परमेश्वर। आचमनीयं समर्पयामि।''** इत्याचमनार्थं जलं दद्यात्।

स्नानम्- (वै.म.)- **''ॐ वरुणस्योत्तम्भनमसि वरुणस्य स्कम्भसर्जनीस्थो वरुणस्य ऋतसदन्यसि वरुणस्य ऋतसदनमसि वरुणस्य ऋतसदनमासीद्॥''** (पौ.म.)-**''ॐ गङ्गा सरस्वतीरेवा पयोष्णीनर्मदाजलैः। स्नापितोऽसि मया देव ह्यतः शान्तिं प्रयच्छ मे।''** स्नापयामि। जलेन स्नानं कारयेत्।

पयःस्नानम्- (वै.म.)- **''ॐ पयः पृथिव्यां पय ओषधीषु पयो दिव्यन्तरिक्षे पयोधाः। पयस्वतीः प्रदिशः सन्तु मह्यम्।''** (पौ.म.)- **ॐ कामधेनुसमुत्पन्नं सर्वेषां जीवनं परम्। पावनं यज्ञहेतुश्च पयः स्नानार्थमर्पितम्।'' ''पयसा स्नापयामि।''** पयः स्नानान्ते शुद्धोदकेन स्नानं कारयेत्।

दधिस्नानम्- (वै.म.)- **''ॐ दधिक्राव्णोऽअकारिषं जिष्णोरश्वस्य वाजिनः। सुरभिणो मुखाकरत्प्रण आयुᳬंषि तारिषत्।** (पौ.म.)- **''ॐ पयसस्तु समुद्भूतं मधुराम्लं शशिप्रभम्। दध्यानीतं मया देव! स्नानार्थं प्रतिगृह्यताम्।'' दध्ना स्नानं समर्पयामि।** दधिस्नानान्ते शुद्धोदकेन स्नानं कारयेत्।

घृतस्नानम्- (वै.म.)- **''ॐ घृतं घृतपावानः पिबतव्वसां व्वसा पावानः पिबतान्तरिक्षस्य हविरसि स्वाहा। दिशः प्रदिशऽआदिशो विदिशऽउद्दिशो दिग्भ्यः स्वाहा।** (पौ.म.)- **ॐ नवनीतसमुत्पन्नं सर्वसन्तोषकारकम्। घृतं तुभ्यं प्रदास्यामि स्नानार्थं प्रतिगृह्यताम्।। घृतेन स्नानं समर्पयामि।** घृतस्नानान्ते शुद्धोदकस्नानं कारयेत्।

मधु[१] स्नानम्- (वै.म.) - "ॐ मधुव्वाता ऋतायते मधु क्षरन्ति सिन्धवः। माध्वीर्नः सन्त्वोषधीः। मधुनक्तमुतोषसो मधुमत्पार्थिवꣳ रजः। मधु द्यौरस्तु नः पिता। मधुमान्नो व्वनस्पतिर्मधुमांऽअस्तु सूर्यः। माध्वीर्गावो भवन्तु नः।" (पौ.म.) - "ॐ तरुपुष्पसमद्भूतं सुस्वादु मधुरं मधु। तेजः पुष्टिकरं दिव्यं स्नानार्थं प्रतिगृह्यताम्।" मधुना स्नापयामि। मधुस्नानान्ते शुद्धोदकेन स्नानं कारयेत्।

शर्करास्नानम्- (वै.म.) - "ॐ अपाꣳरसमुद्द्वयसꣳसूर्ये सन्तꣳ समाहितम्। अपाꣳरसस्य यो रसस्तं वो गृह.णाम्युत्तममुपयाम गृहीतोसीन्द्राय त्वा जुष्टं गृह्णाम्येष ते योनिरिन्द्राय त्वा जुष्टतमम्॥" (पौ.म.) - "ॐ इक्षुसारसमुद्भूता शर्करा पुष्टिकारिका। मलापहारिका दिव्या स्नानार्थं प्रतिगृह्यताम्॥" शर्करास्नानं समर्पयामि। शर्करास्नानान्ते शुद्धोदकस्नानं कारयेत्।

पञ्चामृतस्नानम्- (वै.म.) - "ॐ पञ्चनद्यः सरस्वतीमपियन्ति सस्रोतसः। सरस्वती तु पञ्चधा सो देशेऽभवत्सरित्॥" (पौ.म.) ॐ पयोदधिघृतं चैव मधुशर्करयान्वितम्। पञ्चामृतं मयानीतं स्नानार्थं प्रतिगृह्यताम्। पञ्चामृतेन स्नापयामि। पञ्चामृतस्नानान्ते शुद्धोदकस्नानं कारयेत्।

शुद्धोदकस्नानम्- (वै.म.) - "ॐ इमम्मे गङ्गे यमुने सरस्वतीं शुतुद्रि स्तोमः स च ता परुष्ण्या। असिक्नयामरुद्वधे वितस्तयार्जीकीये शृणुह्यसुषो मया॥" (पौ.म.) - "ॐ गङ्गे च यमुने चैव गोदावरि सरस्वति। नर्मदे सिन्धुकाबेरि जलेऽस्मिन् सन्निधिं कुरु॥" "शुद्धोदकेन स्नापयामि।"

यज्ञोपवीतम्- (वै.म.)- "ॐ तस्मादश्वा अजायन्त ये के चोभयादतः गावो ह जज्ञिरे तस्मात्तस्माज्जाता अजावयः।" (पौ.म.) -"ॐ नवभिस्तन्तुभिर्युक्तं त्रिगुणं देवतामयम्। उपवीतं मया दत्तं गृहाण परमेश्वर। यज्ञोपवीतं समर्पयामि। द्विराचमनं कारयेत्।

वस्त्रम्- (वै.म.) - "ॐ युवा सुवासा परिवीतऽआगात्।

---

१. दध्यलाभे पयः कार्यं मध्वलाभे तथा गुडः।
घृतं प्रतिनिधिं कुर्यात् पयो वा दधि वा नृप॥

सऽउश्रेयान् भवति जायमानः। तं धीरासः कवयऽउन्नयन्ति स्वाध्यो मनसा देवयन्तः।'' (पौ.म.) ''ॐ सर्वभूषाधिके सौम्ये लोकलज्जा-निवारणे। मयोपपादिते तुभ्यं वाससी प्रतिगृह्यताम्।'' वस्त्रोपवस्त्रं समर्पयामि। तत आचमनं कारयेत्।

गन्ध[१]- (वै.म.) - ''त्वाङ्गन्धर्वा अखनँस्त्वामिन्द्रस्त्वां वृहस्पतिः। त्वामोषधे सोमो राजा विद्वान्नयक्ष्मादमुच्च्यत।'' (पौ.म.) - ''ॐ श्रीखण्डं चन्दनं दिव्यं गन्धाढ्यं सुमनोहरम् विलेपनं सुरश्रेष्ठ चन्दनं प्रतिगृह्यताम्। चन्दनं समर्पयामि।''

अक्षताः[२]- (वै.म.) - ''ॐ अक्षन्नमीमदन्त ह्यवप्रिया अवधूषत। अस्तोषत स्वभानवो विप्रा न विष्ठया मती यो जाविन्द्र ते हरी।'' (पौ.म.) - ''ॐ अक्षताश्च सुरश्रेष्ठ। कुङ्कुमाक्ता सुशोभिताः। मया निवेदिता भक्त्या गृहाण परमेश्वर।'' ''अक्षतान् समर्पयामि।''

पुष्पाणि[३]- (वै.म.) - ''ॐ ओषधीः प्रतिमोदद्ध्वं पुष्पवती प्रसूवरीः। अश्वा इव स जित्त्वरी वीरुधः पारयिष्णवः।'' (पौ.म.) - ''ॐ मल्लिकादिसुगन्धीनि मालत्यादीनि वै प्रभो। मयानीतानि पुष्पाणि पूजार्थं प्रतिगृह्यताम्।'' '' पुष्पाणि समर्पयामि।''

सौभाग्यद्रव्याणि- (वै.म.) - ''ॐ अहिरिव भोगैः पर्येति बाहुं ज्याया हेतिम्परिवाधमानः। हस्तघ्नो विश्वा वयुनानि विद्वान्न

---

१. अनामिक्या च देवस्य ऋषीणां च तथैव च।
गन्धानुलेपनं कार्यं प्रयत्नेन विशेषतः
पितृणामर्पयेद् गन्धं तर्जन्या च सदैव हि।
तथैव मध्यमाङ्गुल्या धार्यो गन्धः स्वयं बुधैः।

२. नाक्षतैरर्चयेद् विष्णुं न तुलस्या गणाधिपम्।
न दूर्वया यजेद् दुर्गां विल्वपत्रैश्च भास्करम्॥
दिवाकरं वृन्तहीनैर्विल्वपत्रैः समर्चयेत्।
न पर्युषितदोषोऽस्ति जलजोत्पलचम्पके। तुलस्यगस्तबकुले बिल्वे गङ्गाजले तथा॥

३. न मिश्रीकृत्य दद्यात्तु दीपं स्नेहे घृतादिकम्। घृतेन दीपकं नित्यं तिलतैलेन वा पुनः।
ज्वालयेन्मुनिशार्दूल सन्निधौ जगदीशितुः।
कार्पासवर्त्तिका ग्राह्या न दीर्घा न च सूक्ष्मिका॥

पुमान् पुमाꣳसं सम्परिपातु विश्वतः।" (पौ.म.)- "ॐ श्वेतचूर्णरक्त-चूर्णहरिद्राकुङ्कुमान्वितैः। नानापरिमलद्रव्यैः प्रीयतां परमेश्वर॥" "सुगन्धतैलाम्बीरगुलालादिनानापरिमलसौभाग्यद्रव्याणि समर्पयामि।"

धूपम्- (वै.म.) - "ॐ धूरसि धूर्व्व धूर्वन्तं धूर्वतं योऽस्मान् धूर्वति तं धूर्वयं वयं धूर्वामः। देवानामसि वह्नितमꣳ सस्नितमम्पप्रित-मञ्जुष्टतमन्देवहूतमम्।" (पौ.म.) - "ॐ वनस्पतिरसोद्भूतो गन्धाढ्यो गन्ध उत्तमः। आघ्रेयः सर्वदेवानां धूपोऽयं प्रतिगृह्यताम्।" "धूपमाघ्रा-पयामि।" वामहस्तेन घण्टां वादयन् धूपमाघ्रापयेत्।

दीपम्- (वै.म.) - "ॐ चन्द्रमा मनसो जातश्चक्षोः सूर्यो ऽअजायत। श्रोत्राद् वायुश्च प्राणश्च मुखादग्निरजायत।" (पौ.म.) - "ॐ आज्यं च वर्त्तिसंयुक्तं वह्निना योजितं मया। दीपं गृहाण देवेश त्रैलोक्यतिमिरापहम्। दीपं दर्शयामि। घण्टां वामहस्तेन वादयन् दीपं दर्शयेत्।" दीपदर्शनोपरि हस्तप्रक्षालनं कुर्यात्।

नैवेद्यम्[१]-(वै.म.)-"ॐ अन्नपतेऽन्नस्य नो देह्यनमीवस्य शुष्मिणः। प्रप्रदातारं तारिषऽऊर्ज्जन्नो धेहि द्विपदे चतुष्पदे।" (पौ.म.)-"ॐ शर्कराखण्डखाद्यादिदधिक्षीरघृतादिभिः। आहारैर्भक्ष्य-भोज्यैश्च नैवेद्यं प्रतिगृह्यताम्। नैवेद्यं निवेदयामि।" नैवेद्यं निवेद्य धेनुमुद्रां ग्रासमुद्रां च प्रदर्शयेत्-"ॐ प्राणाय स्वाहा। ॐ अपानाय स्वाहा। ॐ व्यानाय स्वाहा। ॐ उदानाय स्वाहा। ॐ समानाय स्वाहा। जलं दत्त्वा कथयेत्-"मध्ये पानीयम्।" वामहस्तेन घण्टां वादयेत्।

ताम्बूल[२] पूगीफलैलालवङ्गफलानि- (वै.म.) - "ॐ उत स्मास्यद् द्रवतस्तुरण्यतः पर्णन्नवेरनुवातिप्प्रगर्द्धिनः। श्येनस्य

---

१. तैजसेषु च पात्रेषु सौवर्णे राजते तथा।
ताम्रे वा प्रस्तरे वापि पद्मपत्रेऽथवा पुनः॥
यज्ञदारुमये वापि नैवेद्यं स्थापयेद् बुधः।

२. पर्णमूले भवेद् व्याधिः पर्णाग्रे पापसम्भवः।
जीर्णपत्रं हरत्यायुः शिरा बुद्धिविनाशिनी॥

वद्व्रजतोऽअङ्कसम्परि दधिक्राग्णः सहोर्ज्जा तरित्रतः स्वाहा।। (पौ० मं०) ॐ पूगीफलं महद्दिव्यं नागबल्लीदलैर्युतम्। एलादिचूर्णसंयुक्तं ताम्बूलं प्रतिगृह्यताम्।'' मुखवासार्थे ताम्बूलवीटिकां समर्पयामि।

अखण्डफलानि- (वै.म.)-**''ॐ याः फलिनीर्या अफला अपुष्या याश्च पुष्पिणीः। वृहस्पतिप्रसूतास्ता नो मुञ्चत्वꣳ ह सः।''** (पौ.म.) **-ॐ इदं फलं मया देव स्थापितं पुरतस्तव। तेन मे सफलावाप्तिर्भवेज्जन्मनि जन्मनि।। अखण्डफलानि समर्पयामि।**

दक्षिणा- (वै.म.)-**''ॐ हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेक आसीत्। स दाधार पृथिवीं द्यामुतेमाङ्कस्मै देवाय हविषा विधेम।''** (पौ.म.) **ॐ न्यूनारिक्तपूजायां सम्पूर्णफलप्राप्तये। दक्षिणां काञ्चनीं देव! स्थापयामि तवाग्रतः।।''** दक्षिणाद्रव्यं समर्पयामि।

आरार्त्तिक्यम्- (आरार्त्तिकां प्रज्वाल्य) - **''ॐ ज्वालामालिन्यै नमः''** इति मन्त्रेण गन्धाक्षतपुष्पाणि क्षिप्त्वा वामहस्तेन घण्टां वादयन् मन्त्रं पठेत्। (वै.म.) - **''ॐ आरार्त्तिपार्थिवꣳ रजः पितुरप्रायि धामभिः। दिवः सदाꣳसि वृहती वितिष्ठ स आत्त्वेषं वर्त्तते तमः।''** (पौ.म.)- **''ॐ कदलीगर्भसम्भूतं कर्पूरं च प्रदीपितम्। आरार्त्तिक्यमहं कुर्वे पश्य मे वरदोत्तम।'' ''आरार्त्तिक्यं दर्शयामि।''** हस्तं प्रक्षालयेत्।

पुष्पाञ्जलिः- (अञ्जलौ पुष्पाण्यादायोत्तिष्ठन्) - **''ॐ यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन्। तेह नाकं महिमानः सचन्त यत्र पूर्वे साद्ध्या सन्ति देवाः।''** ''ॐ नानासुगन्धपुष्पाणि यथा कालोद्भवानि च। पुष्पाञ्जलिर्मया दत्ता गृहाण परमेश्वर।'' इति पुष्पाञ्जलित्रयं दत्त्वा प्रणमेत्।

प्रदक्षिणाः- **''ॐ यानि कानि च पापानि ज्ञाताज्ञातकृतानि च। तानि सर्वाणि नश्यन्तु प्रदक्षिणायाः पदे पदे।।''** प्रदक्षिणां कुर्वन् मन्त्रं पठेत्।

विशेषार्ध्यः- अर्ध्यपात्रे जलं प्रपूर्य गन्धाक्षतपुष्पपूगीफलं च धृत्वा मन्त्रेणाऽनेन त्रिवारमर्ध्यं दद्यात् - **''ॐ वरद त्वं वरं देहि वाञ्छितं**

वाञ्छितार्थद। अनेन सफलार्घ्येण फलदोऽस्तु सदा मम।''

ततो देवं नमस्कृत्य स्तोत्रादिकं पठेत्। प्रार्थनां कुर्यात्। ततोऽक्षतान् गृहीत्वा **''ॐ अनया पूजया अमुकदेवता प्रीयताम्, न मम।''** ततश्चरणामृतादिकं नैवेद्यं च यथाविधि भक्षयेत्। अक्षतांश्च क्षिपेत्।

देवानां षोडशो[१] पचारेण पूजायामेते मन्त्राः सर्वेषां देवानां सर्वासां च देवीनां पूजने प्रयुज्यन्ते। पौराणिकमन्त्रेषु देवीनां पूजने सम्बोधनादिकं स्त्रीलिङ्गे प्रयोक्तव्यम्। एतदतिरिक्तं विष्णवादिदेवानां पूजा पुरुषसूक्तमन्त्रैः शिवादिदेवानां पूजा यजुर्वेदगतरुद्रसूक्तैः **''नमस्ते रुद्रमन्यवे''** त्यादिभिर्मन्त्रैः देवीनां पूजा च श्रीसूक्तस्य वाक्सूक्तस्य रात्रिसूक्तस्य वा मन्त्रैः कर्त्तव्यम्।

अथ देवानां पञ्चोपचारेण पूजनम्

षोडशोपचारेण पूजनाशक्तौ पूर्वोक्तमन्त्रैरेव गन्धपुष्पधूपदीपनैवेद्या-द्युपचारैः देवं प्रपूजयेत्। गन्धादीनां कृते ये मन्त्राः षोडशोपचारे निगदितास्ते मन्त्रा एव प्रयोक्तव्याः। केवलं न पञ्चोपचारैरपितु यथालब्धोपचारैर्देवानां पूजनं कर्त्तव्यमिति। **इति पञ्चोपचारेण देवपूजनम्॥**

अथ होमकर्मणि कुशकण्डिकाविधिः

प्रथमं तावद् परिमिते तुषकेशादिरहिते यथाशास्त्रनिर्मिते कुण्डे स्थण्डिले[२] वा चतुरस्रां भूमिं त्रिभिस्त्रिभिः कुशैः परिसमूह्य तान् कुशानेशानकोणे परित्यज्य **'वं'** इति वीजमुच्चार्य गोमयेनोपलिप्य[३] खदिराम्रस्त्रुवमूलेन प्रागग्रं प्रादेशमात्रमुत्तरोत्तरक्रमेण त्रिरुल्लिख्य उल्लेखनक्रमेणैव **'ह्रीं'** इति माया

---

१. आसनं स्वागतं पाद्यमर्घ्यमाचमनीयकम्।
मधुपर्काचमस्नानवसनाभरणानि च॥
सुगन्धसुमनो धूपदीपनैवेद्यवन्दनम्।
प्रयोजयेदर्चनायामुपचारांश्च षोडश॥

२. हस्तप्रमाणमात्रैव वेदी कार्या मनीषिभिः।
स्थण्डिलं मृण्मयं कार्यं चतुर्विंशाङ्गुलायतम्॥

३. पुरा इन्द्रेण वज्रेण हतो वृतो महासुरः।
व्यापिता मेदसा पृथ्वी तदर्थमुपलेपनम्॥

बीजमुच्चार्याऽनामिकाङ्गुष्ठाभ्यां मृदमुद्धृत्य[१] जलेन न्युब्जपाणिनाऽभ्युक्ष्य ब्रह्मक्षत्रविशां गृहात्कास्यपात्रेऽग्निमानीय कुण्डस्य स्थण्डिलस्य वा वायुकोणे निधाय **'हुं' फट्** मन्त्रेण क्रव्यादांशं नैर्ऋत्यकोणे परित्यज्य **''ॐ अग्निं दूतं पुरोदधे हव्यवाहमुपब्रुवे। देवां आसादयादिह।''** इति मन्त्रेण सम्मुखेऽग्निं स्थापयेत्। ततोऽग्न्यानयनपात्रे साक्षतोदकं निषिच्य ततस्तत्र प्रोक्षतेन्धनानि प्रक्षिपेत्। ततो वेणुधमनीमादाय शुद्धमुखेन[२] तमग्निं धमेत्। ततः प्रज्वलितेऽग्नौ ध्यायेत् - **''ॐ चत्वारि शृङ्गा त्रयोऽस्य पादा॰''** इति मन्त्रेण। ततोऽग्निं **''ॐ भूर्भुवः स्वः अग्ने वैश्वानर शाण्डिल्यगोत्र मेषध्वज मम सम्मुखो भव।''** इति पठित्वा वरद[३]नामानमग्निं प्रतिष्ठापयेत्। **''ॐ भूर्भुवः स्वः अग्नये नमः''** इति मन्त्रेण बहिरग्निं पञ्चोपचारेण प्रपूज्य प्रार्थयेत्- **''ॐ अग्निं प्रज्वलितं वन्दे जातवेदं हुताशनम्। हिरण्यवर्णममलं समृद्धं विश्वतोमुखम्।''**

ततो देशकालौ सङ्कीर्त्य ब्रह्मावरणसङ्कल्पं कुर्यात्। **''त्वामहं वृणे''** इति मङ्गलसूत्रादिकं बद्ध्वा ब्रह्माणं वृणुयात्। **''ब्रह्मा वृतोऽस्मि''** इति ब्रूयात् ततोऽग्नेर्दक्षिणतः[४] परिस्तरणभूमिं परित्यज्य ब्रह्मोपवेशनार्थं शुद्धमासनं दत्त्वा यजमानो ब्रूयात्- **''ॐ अस्मिन्नमुकहोमकर्मणि त्वं मे ब्रह्मा भव''** ततो ब्रह्मा ब्रूयात् - **''भवानि।''** यदि ब्रह्मणः कृते ब्राह्मणाभावस्तर्हि पञ्चाशत[५] कुशनिर्मितं ब्रह्माणमग्निप्रदक्षिणां कारयित्वाऽऽसन उदङ्मुखोपवेश्यगन्धपुष्पाक्षतादिभिः पूजयेत्। ततः प्रणीतापात्रं पुरतो जलेन परिपूर्य

---

१. ये भ्रमन्ति पिशाचाद्या आकाशपथगामिनः।
तेषां संरक्षणार्थाय उद्धृत्य कथितं बुधैः॥

२. मुखेनोपधमेदग्निं मुखादग्निरजायतेति वचनात्।
न कुर्यादग्निधमनं कदाचिद् व्यजनादिना।

३. शान्तिके वरदः प्रोक्तः पौष्टिके बलवर्द्धनः। पूर्णाहुत्यां मृडो नाम क्रोधाग्निश्चाभिचारिके।

४. उत्तरे प्रोक्षणी प्रोक्ता उत्तरे सर्वदेवताः।
उत्तरे सर्वतीर्थानि किमर्थं ब्रह्म दक्षिणे।
दक्षिणे दानवाः प्रोक्ताः पिशाचोरगराक्षसाः।
तेषां संरक्षणार्थाय ब्रह्मा तिष्ठति दक्षिणे॥

५. पञ्चाशता भवेद् ब्रह्मा तदर्धं तु विष्टरः।

कुशत्रयेणाऽऽच्छाद्य ब्रह्मणो मुखमवलोक्याऽग्नितो वितस्त्यन्तरे उत्तरतः कुशोपरि निदध्यात्। ततो बर्हिषश्चतुर्थभागं (षोडशदर्भान्) गृहीत्वा चतुर्भिश्चतुर्भिर्द-र्भैराग्नेयादीशानान्तमुत्तराग्रैर्ब्रह्मणोऽग्निपर्यन्तं प्रागग्रैर्नैर्ऋत्याद्वायव्यान्तमुत्तराग्रैरग्नितः प्रणीतापर्यन्तं प्रागग्रैः परिस्तरणं[१] कुर्यात्। ततोऽग्नेरुत्तरतः पश्चिमदिशि पवित्रच्छेदनार्थं कुशत्रयं पवित्रकरणार्थं साग्रमनन्तगर्भकुशपत्रद्वयम्। प्रोक्षणीपात्रम्, आज्यस्थाली, चरुस्थाली, सम्मार्जनार्थं कुशत्रयम्। उपयमनार्थं वेणीरूपं कुशत्रयम्। समिधस्तिस्रःपलाश्यः, स्रुवः खादिर आम्रमयः, गव्यमाज्यम्। षट् पञ्चाशदुत्तरशतद्वयावच्छिन्नमुष्टिमिततण्डुलपूर्णं पूर्णपात्रम्। एतानि पवित्रच्छेदनकुशानां पूर्वपूर्वदिशि क्रमेणाऽऽसादनीयानि।

ततः पवित्रच्छेदनकुशैरग्रतः प्रादेशमात्रं विहाय पवित्रे च्छित्वा दक्षिणावर्त्तग्रन्थिं च विधाय पवित्रच्छेदनं कुशोन्मूलञ्चोत्तरतः क्षिपेत्। ततः सपवित्रकरेण प्रणीतोदकं त्रिःप्रोक्षणीपात्रे निक्षिप्य व्यस्ताऽनामिकाङ्गुष्ठाभ्यां द्वे उत्तराग्रे पवित्रे गृहीत्वा त्रिरुत्पवनं कुर्यात्। ततः प्रागग्रं प्रोक्षणीपात्रं वामहस्ते कृत्वा प्रणीतासन्निधौ दक्षिणे निधायाऽनामिकाऽङ्गुष्ठाभ्यां गृहीतपवित्राभ्यां तज्जलं किञ्चित् त्रिरुत्क्षिप्य प्रणीतोदकेन पवित्रानीतेनोत्तान- हस्तेन प्रोक्षणीमभिषिच्य प्रोक्षणीजलेन 'वं' इति वारुणं वीजमुच्चार्याऽऽज्य-स्थाल्यादीनि वस्तूनि क्रमेणैकैकशः प्रोक्ष्याऽसञ्चरे[२] प्रणीताग्न्योरन्तराले प्रोक्षणीपात्रं निदध्यात्। आज्यस्थाल्यामाज्यनिर्वापः। तदाज्यमग्नौ अधिश्रित्य 'वं' इति बीजमुच्चार्य ज्वलद्दर्भयुगमादायाऽऽज्यस्योपरि प्रदक्षिणं समन्ताद् भ्रामयित्वा तद्दर्भयुगलं बह्नौ क्षिपेत्। एवमेव चरुस्थाल्यां चरुं निक्षिप्याऽधिश्रयेत् ततः पूर्ववज्ज्वद्दर्भयुगलेन भ्रामणं कृत्वाऽग्नौ क्षिपेत्। ततो दक्षिणहस्तेन स्रुवमादायाऽधोमुखमग्नौ त्रिस्तापयित्वा वामहस्ते कृत्वा सम्मार्जनकुशा-नामग्रैरन्तरतो मूलैर्बाह्यतः स्रुवमूर्ध्वमूलं सम्मृज्य प्रणीताजलेनाऽभ्युक्ष्य पुनः पूर्ववत्प्रताप्य दक्षिणतो निधाय मन्त्रेणाऽनेन पूजयेत् - **"ॐ आवाहयाम्यहं देवं स्रुवं शेवधिमुत्तमम्। स्वाहाकारस्वधाकारवषट्कारसमन्वितम्।"**

---

१. वेदिकादर्भहीना तु विनग्ना प्रोच्यते बुधैः।
परिधानं ततः कुर्याद् दर्भेणैव विशेषतः॥

२. जले वा बालुकायां वा वने वा पर्वतेऽथवा। भवनोपरिदेशे वा ह्यसञ्चर इतीर्यते॥

ततः प्रदक्षिणक्रमेणाज्यमवतार्याऽग्रतो निधाय चरुं चानीय आज्यस्योत्तरतो निदध्यात्। ततो बारत्रयं प्रोक्षणीवदाज्यस्योत्पवनम्। अवेक्ष्य सत्यद्रव्ये तन्निरसनम्। पुनः पूर्ववत्प्रोक्षणीमुत्पूयोपयमन[१] कुशान् वामहस्तेनादायोत्थाय प्रजापतिं मनसा ध्यात्वा तूष्णीं घृताक्ताः तिस्रः समिधो[२]ऽग्नौ क्षिपेत्। तत उपविश्य प्रोक्षणीजलेनाग्निं प्रदक्षिणं पर्युक्ष्य प्रणीतापात्रे पवित्रे निधाय कुशेन ब्रह्मणान्वारब्धः पातितदक्षिणजानुः समिद्धतमे बह्नौ स्रुवेणाऽऽज्याहुतीर्जुहोति। तत्राधारावाज्यभागौ हुत्वाऽनन्तरं स्रुवावस्थितहुतशेषं घृतस्य प्रोक्षणीपात्रे प्रक्षेपः[३] कार्यः।

।। इति कुशकण्डिकाविधिः।।

अथ कुण्डनिर्माणप्रकारः

प्रायः शास्त्रेषु कुण्डस्याऽष्टौ प्रकारा दृश्यन्ते- (१) चतुष्कोणकुण्डम्। (२) योनिकुण्डम्। (३) चन्द्रार्द्धकुण्डम्। (४) त्रिकोणककुण्डम्। (५) वृत्तकुण्डम्। (६) षट्कोणकुण्डम्। (७) पद्मकुण्डम्। (८) अष्टास्त्रकुण्डम्।

एषु चतुष्कोणात्मकं कुण्डं त्रिकोणात्मकं कुण्डं वाऽद्य दरीदृश्यते होमानुसारेणैकहस्तात्मकं द्विहस्तात्मकं वा कुण्डं कुर्यात्। यथोक्तम्-

हस्तमात्राणि कुण्डानि चतुरस्राणि सर्वतः।
समेखलानि कुर्वीत योनिवक्त्रयुतान्यपि॥

तथा च -

एकहस्तमितं कुण्डमेकलक्षे विधीयते।
लक्षाणां दशके यावत्तावद्हस्तेन वर्द्धयेत्॥

---

१. लाजाहोमे समिद् होमे ऊर्ध्वहोमे तथैव च।
तिष्ठतैव हि कर्त्तव्याः स्वाहाकारा अपि ध्रुवम्॥

२. शमीपलाश न्यग्रोधप्लक्षवैकङ्कतोद्भवाः।
अश्वत्थोदुम्बरौ विल्वश्चन्दनस्सरलस्तथा।
सालश्च देवदारुश्च खदिरश्चैव यज्ञियाः॥

३. स्रुवहोमे सदा त्यागः प्रोक्षणीपात्रमध्यतः।

त्रिकोणात्मकस्य कुण्डस्य निर्माणमुक्तम् - **"चतुर्द्धा भेदिते क्षेत्रे न्यसेदुभयपार्श्वयोः। एकैकमंशं तन्मानादग्रतो लाञ्छयेत्ततः। सूत्रद्वयं ततः कुर्यात् त्र्यस्रं कुण्डमुदाहृतम्।"** एवं कुण्डं होमानुसारं प्रकर्त्तव्यम्॥ **इति कुण्डनिर्माणविधिः॥**

अथ मण्डपनिर्माणप्रकारः

मण्डपनिर्माणं क्वचिद् दशहस्तप्रमाणेन क्वचिद् द्वादशहस्तप्रमाणेन क्वचिच्च षोडशहस्तप्रमाणेन क्रियते। यथोक्तम् -

कनीयान्दशहस्तः स्यान्मध्यमो द्वादशोन्मितः।
तथा षोडशभिर्हस्तैर्मण्डपः स्यादिहोत्तमः॥

चतुरस्रं मण्डपं निर्माय षोडशहस्तप्रमाणेन, तस्याष्टहस्तपरिमाणमुच्छायः कर्त्तव्यः। चतुर्हस्तान्तरेषु षोडशस्तम्भास्तत्र कार्याः। चतुर्दिक्षु चत्वारि द्वाराणि निर्मातव्यानि। तत्र शाखा अधोलिखिताः प्रतिद्वारं योजयेत् -

अश्वत्थोदुम्बरप्लक्षवटशाखाकृतानि तु।
मण्डपस्य प्रतिदिशं द्वाराण्येतानि कारयेत्॥
मण्डपेऽथाग्निमीडे'ति विन्यसेत् पूर्वतोरणम्।
'इषे त्वोर्ज्जे'ति मन्त्रेण दक्षिणे च विनिवेशयेत्।
'अग्न आयाहि' मन्त्रेण पश्चिमे विनिवेशयेत्॥
'शन्नो देवी'ति मन्त्रेण न्यसेदुत्तरतोरणम्॥

मण्डपे प्रतिदिशं पताका योजयेत् तत्प्रमाणं वर्णा आह-

पञ्च हस्ता ध्वजाः कार्या वैपुल्येन द्विहस्तकाः।
सप्त हस्ताः पताकाः स्युर्विंशत्यङ्गुलविस्तृताः॥
सिन्दुरा कर्बुरा धूम्रा धूसरा मेघसन्निभाः।
हरिताः पाण्डुवर्णाश्च शुभ्राः पूर्वादितः क्रमात्॥

एवं पूजानुष्ठानादौ यज्ञादौ च मण्डपो विधातव्यः। कुण्डमण्डपयोर्निर्माणादिविषयेऽनेकमतमतान्तराणामत्र विस्तरभयान्नोल्लेखः कृतः।

अथ होम-विधिः

यथाविधि कुशकण्डिकां कृत्वाऽग्नेरुत्तरभागे **'ओम् प्रजापतये स्वाहा।'** इति मनसा 'इदं प्रजापतये न मम'' इति पठित्वा प्रोक्षण्यां घृतत्यागः कार्यः। ततोऽग्नेर्दक्षिणभागे-''**ॐ अग्नये स्वाहा, इदमग्नये न मम। ॐ सोमाय स्वाहा इदं सोमाय न मम।** इत्याज्यभागौ हुत्वा ततो व्याहृतिभिर्जुहुयात्-''**ॐ भूः स्वाहा इदमग्नये न मम। ॐ भुवः स्वाहा इदं वायवे न मम। ॐ स्वः स्वाहा इदं सूर्याय न मम॥**''

तत आचार्यः-''**ॐ यथा वाणप्रहाराणां कवचं वारकं भवेत्। तद्वद्देवोपघातानां शान्तिर्भवति वारिका॥ शान्तिरस्तु। पुष्टिरस्तु। यत्पापं यजमानस्य रोगमकल्याणं तद् दूरे प्रतिहतमस्तु द्विपदे चतुष्पदे सुशान्तिर्भवतु।**'' इति पठित्वा यजमानस्य मूर्द्धानमभिषेचयेत्। ततः प्रायश्चित्तसञ्ज्ञकपञ्च मन्त्रैः-''**ॐ त्वन्नोऽग्ने** इत्यादिभिर्जुहुयात्। तत उदकस्पर्शः संस्रवप्राशनं च कर्त्तव्यम्। तदनन्तरं ''**ॐ गणानां त्वा**'' इति मन्त्रैर्गणपतये[१] दातव्या आहुतयः। होमकाले यजमानाचार्यौ शिरस्युष्णीषं[२] धारयेयाताम्। ततो नवग्रहादीनामिष्टदेवतानां च मन्त्रेष्वन्ते स्वाहाकारं संयोज्याहुतयो यथाशक्ति दातव्याः। होमकाले मन्त्राणां छन्दो देवर्षीणां स्मरणं न क्रियते[३]। गायत्रीहोमे तु सप्रणवं व्याहृतिरहितं स्वाहान्तं च गायत्रीमन्त्रमुच्चार्यम्। तिलमिश्रितपायसेना-ऽथवा पञ्चखाद्येन जुहुयात्। तत्र तिलादीनामेवं व्यवस्था कार्या-

चतुर्भागं तिलान्नं च द्विभागं चाज्यमेव च।
यवान्नन्तु त्रिभागं स्याद्भागमेकञ्च तण्डुलम्॥

अत्र शर्करा तण्डुलपरिमाणं पञ्चखाद्यञ्च यथेष्टं योजयेत्। एवं हवनमाचरेत्।

---

१. गणाधिपतये देया प्रथमा तु वराहुतिः। अन्यथा विफलं विप्र भवतीह न संशयः॥

२. उष्णीषेण विना राजन् होमं चेत्कुरुते नरः।
होतुश्चक्षोर्विनाशः स्याद् होता च विकलो भवेत्।

३. अग्निहोत्रे वैश्वदेवे विवाहादिविधौ तथा।
होमकाले न दृश्यन्ते प्रायश्छन्दर्षिदेवताः॥

अथ पूर्णाहुतिविधिः

हवनसमाप्तौ पूर्णाहुतिसङ्कल्पं विधाय ताम्बूलपूगीफलाक्षतादियुक्त-मन्तर्घृतपूरितं नारिकेलं रक्तवस्त्रपुष्पादिभिर्वेष्टितं कृत्वा प्रधानदेवताया बलिपुरुषस्य प्राणप्रतिष्ठां च तस्मिन् विधाय पञ्चोपचारैः सम्पूज्य सपत्नीको यजमानोऽन्वारब्धस्तिष्ठन्नेव श्रीपरमेश्वरं ध्यायन् शङ्खघण्टादिघोषैः सह मन्त्रेणाऽनेन पूर्णाहुतिं दद्यात्-

"**ॐ मूर्धानं दिवोऽअरतिं पृथिव्या वैश्वानरमृत आ जात-मग्निम् कविꣳ सम्राजमतिथिञ्जनानामासन्ना पात्रं जनयन्त देवाः। ॐ पूर्णादर्वि परापत सुपूर्णा पुनरापत विक्रीणावहा इषमूर्जꣳशतक्रतो स्वाहा।**" इति वह्नौ प्रक्षिप्य वदेत् - "**इदमग्नये वैश्वानराय वसुरुद्रा-दित्येभ्यः शतक्रतवे सप्तवते अग्नये अद्भ्यः पुरुषाय श्रियै च न मम।**"

ततोऽग्नावविच्छिन्नां घृतधारामनेन मन्त्रेण कुर्यात् - "**ॐ वसोः पवित्रमसि शतधारं वसोः पवित्रमसि सहस्रधारम्। देवस्त्वा सविता पुनातु वसोः पवित्रेण शतधारेण सुप्त्वा कामधुक्षः स्वाहा, इदं वाजादि-भ्योऽग्नये विष्णवे रुद्राय सोमाय वैश्वानराय च न मम॥**"

ततोऽग्निं प्रार्थयेत् - "**ॐ श्रद्धां मेधां यशः प्रज्ञां विद्यां पुष्टिं श्रियं बलम्। तेज आयुष्यमारोग्यं देहि मे हव्यवाहन।**"

ततो भस्म[१] स्रुवमूलेन गृहीत्वा '**ॐ त्र्यायुषम् जमदग्नेः** ललाटे। '**कश्यपस्य त्र्यायुषम्**' ग्रीवायाम्। '**यद्देवेषु त्र्यायुषम्**' दक्षिणबाहुमूले। **तन्नोऽअस्तु त्र्यायुषम्** इति हृदि वामस्कन्धे च एतत्कथिताङ्गेषु विलेपयेत्। ततोऽनामिकाङ्गुष्ठाभ्यां संस्रवप्राशनं कुर्यात्। तत आचम्य प्रणीतापात्रे निहिते पवित्रे आदाय ग्रन्थिं मुक्त्वा ताभ्यां शिरः सम्मृज्य ते पवित्रे अग्नौ क्षिपेत्। ततो ब्रह्मणे तण्डुलपूर्णपात्रं दत्त्वा ब्रह्मग्रन्थिविमोकः कर्त्तव्यः। ततो जलसहितं प्रणीतापात्रमग्नेः पश्चादानीय "**ॐ सुमित्रिया न आप ओषधयः सन्तु**

---

१. ऐशान्यामाहरेद्भस्म स्रुचा वाथ स्रुवेण वा।
अङ्कनं कारयेत्तेन शिरः कण्ठांसकेषु च॥

ॐ आपः शिवाः शिवतमाः शान्ताः शान्ततमास्तास्ते कृण्वन्तु भेषजम्। इति मन्त्रेण प्रणीताजलं सपवित्रोपयमनकुशादिनाऽऽदाय यजमानशिरस्यभिषिच्य "**ॐ दुर्मित्रियास्तस्मै सन्तु योऽस्मान् द्वेष्टि यञ्च वयं द्विष्मः।**" इति पठित्वा प्रणीतां न्युब्जीकुर्यात्। उपयमनकुशान् वह्नौ प्रक्षिपेत्। तत आस्तरणक्रमेण बर्हिरुत्थायाऽऽज्येनाऽभिधार्य मन्त्रेणाऽनेनाऽग्नौ हस्तेनैव जुहुयात् –"**ॐ देवा गातु विदो गातु वित्वा गातुमित। मनसस्पत इमं देवयज्ञꣳस्वाहा वातेधाः स्वाहा।**" ततो यजमानशिरसि "**आपो हिष्ठे॰**" ति मन्त्रैरभिषेकः कार्यः। **इति पूर्णाहुतिहोमविधिः।**

अथ बलिदानम्

यजमानो देशकालो सङ्कीर्त्य "**मण्डलस्थदेवताभ्यो बलिदानं करिष्ये**" इति सङ्कल्प्य पलाशाग्रपत्रेषु पृथक् पृथक् दधिमाषात्मकं दधितण्डुलात्मकं वा बलिं पञ्चलोकपालदशदिक्पालषोडशमातृका-चतुष्षष्टियोगिनीक्षेत्रपालवास्तुदेवताग्रहदेवतादिभ्यो दत्त्वा तेषां कृते पृथक् पृथक् दीपं प्रज्वालयेत्। गन्धपुष्पाक्षतांश्च क्षिपेत्। अत्राऽऽवाहने प्रयुक्ता मन्त्रा एव प्रयोक्तयाः। '**बलिं गृहाण**' इति तत्र योजनीयः। बलिदानानन्तरं जलमुत्सृजेत्।

एवं देवतानां बलिदानं कृत्वा "**ॐ भूतेभ्यो नमः बलिं सदीप-पुष्पाक्षतं गृह्णन्तु।**" इति मन्त्रमुच्चार्य भूतेभ्योऽपि दक्षिणस्यां बलिं दद्यात्। "**अनेन बलिदानेन अमुकदेवता प्रीयताम् न मम**" इत्यपि तत्र वक्तव्यम्। **इति देवभूतबलिविधानम्॥ इति कर्मकौमुद्यां पूजाहोमकर्माध्यायः॥**

अनुष्ठानशान्तिकर्माध्यायः

रुद्राभिषेकविधिः

आचमनादिकं कृत्वा स्वस्तिवाचनं विधाय ततो "**ॐ ह्रां पृथिव्यै नमः**" इति मन्त्रेण पृथिवीं सम्पूज्य "**ॐ उद्धृतासि वराहेण कृष्णेन शतबाहुना। मृत्तिके त्वां च गृह्णामि प्रजया च धनेन च॥**" इति मन्त्रेण सुस्निग्धां शुभ्रां मृत्तिकामादाय देशकालौ सङ्कीर्त्य "**अमुकगोत्रोत्पन्नोऽमुक शर्माऽहं श्रुतिस्मृतिपुराणोक्तफलप्राप्तये धनायुरारोग्यप्राप्त्यर्थम् अमुककामनासिद्ध्यर्थं श्रीभवानीशङ्करप्रीतये श्रीपार्थिवेश्वरलिङ्गस्य षोडशोपचारेण पूजनं तद्विघ्नताशान्त्यर्थं च मृण्मयगणेशादिपरिच्छदानां पूजनं ततः रुद्राष्टाध्यायीमन्त्रै रुद्राभिषेककर्म करिष्ये।**" इति सङ्कल्पं कुर्यात्। मृदञ्च ताम्रपात्रे निधाय गायत्रीमन्त्रेण सूर्याया[1]ऽर्घ्यं दद्यात्। ततो 'वं' इति बीजमन्त्रेण मृदं गङ्गाजलेनाऽऽसिञ्चय पिण्डं कृत्वा तस्मादल्पमृत्तिकामादाय "**ॐ ह्रीं ग्लौं गं गणपतये ग्लौं ह्रीं**" इति मन्त्रेण विनायकं निर्माय ततः "**ॐ ऐं हुं क्षुं क्लीं कुमाराय नमः**" इति कुमारं षडाननं रचयेत्। ततः "**ॐ नन्दीश्वराय नमः**" इति मन्त्रेण नन्दीश्वरं "**ॐ वीरभद्राय नमः**" इति मन्त्रेण वीरभद्रं "**ॐ कुबेराय नमः**" इति कुबेरं "**ॐ "कीर्त्तिमुखाय नम**" इति कीर्त्तिमुखं च रचयेत्। ततः '**ॐ हराय नमः**' इति मन्त्रेण मृदमादाय "**ॐ महेश्वराय नमः**" इति मन्त्रेण मनोहरं यथेष्टं[2] लिङ्गंरचयेत्। ततः "**ॐ शूलपाणये नमः**" इति मन्त्रेण पुष्पाक्षतविल्वपत्रादिभिः पीठमध्ये लिङ्गं स्थापयेत्। तत आचम्य प्राणायामं कृत्वा जलमादाय विनियोगं कुर्यात् – "**ॐ अस्य श्रीसदाशिवमन्त्रस्य वामदेव ऋषिः पङ्क्तिश्छन्दः श्रीसदाशिवो देवता ॐ बीजं नमः**

---

१. यावन्न दीयते चार्घ्यं भास्कराय निवेदितम्।
तावन्न पूजयेद् विष्णुं शङ्करं वा महेश्वरम्॥

२. अङ्गुष्ठमानादधिकं वितस्त्यवधि सुन्दरम्।
पार्थिवं रचयेल्लिङ्गं न न्यूनं नाधिकं च तत्॥

शक्तिः शिवाय कीलकं मम साम्बसदाशिवप्रीत्यर्थे पार्थिवलिङ्गपूजने विनियोगः।'' ततो मन्त्रन्यासः कर्त्तव्यः-

''ॐ वामदेव ऋषये नमः शिरसि। ॐ पङ्क्तिश्छन्दसे नमः मुखे। सदाशिवदेवतायै नमः हृदये। ॐ बीजाय नमः गुह्ये। ॐ शक्तये नमः पादयोः। ॐ शिवाय कीलकाय नमः सर्वाङ्गे।'' इति ऋष्यादिन्यासः।

''ॐ ॐ अङ्गुष्ठाभ्यां नमः। ॐ नं तर्जनीभ्यां नमः। ॐ मं मध्यमाभ्यां नमः। ॐ शिं अनामिकाभ्यां नमः। ॐ वां कनिष्ठिकाभ्यां नमः। ॐ यं करतलकरपृष्ठाभ्यां नमः।'' इति करन्यासः।

''ॐ ॐ हृदयाय नमः। ॐ नं शिरसे स्वाहा। ॐ मं शिखायै वषट्। ॐ शिं कवचाय हुं। ॐ वां नेत्रत्रयाय वौषट्। ॐ यं अस्त्राय फट्।'' इति हृदयादिन्यासः।

एवं न्यासं कृत्वा कलशादिकं पञ्चलोकपालदशदिक्पालमातृका-योगिनीक्षेत्रपालादीनां यथाविधि यथाशक्ति पूजां कृत्वा पीठादौ सपरिच्छदं शिवलिङ्गं संस्थाप्य ध्यानं कृत्वा लिङ्गादिषु तत्तद्देवतानां प्राणप्रतिष्ठां कुर्यात् प्राणप्रतिष्ठानन्तरं गणेशमावाहयेन्मन्त्रेणाऽनेन- **''ॐ नमो गणेभ्यो गणपतिभ्यश्च वो नमो नमो व्रातेभ्यो व्रातपतिभ्यश्च वो नमो नमो गृत्सेभ्यो गृत्सपतिभ्यश्च वो नमो नमो विरूपेभ्यो विश्वरूपेभ्यश्च वो नमो नमः॥''**

ततो नन्दीश्वरमावाहयेत्- **''ॐ आयङ्गौ पृश्निरक्रमीदसन्मातरम्पुरः। पितरं च प्रयन्त्वः।''** ततो वीरभद्रमावाहयेत्- **''ॐ भद्रं कर्णेभिः शृणुयाम''** इति मन्त्रेण। ततः कुमारमनेन मन्त्रेणाऽऽवाहयेत्-

यदक्रन्दः प्रथमञ्जायमान उद्यन्त्समुद्रादुत वा पुरीषात्। श्येनस्य पक्षा हरिणस्य बाहू उपस्तुत्यन्महि जातन्तेऽअर्वन्।'' ततः कुबेरमावाहयेत्- **''ॐ कुबिदङ्गयवमन्तो यञ्चिद्यथा दान्त्यनुपूर्वं वियूय। इहेहैषां कृणुहि भोजनानि ये बर्हिषो नम उक्तिं यजन्ति।''** ततो मन्त्रेणाऽनेन कीर्त्तिमुखमावाहयेत्- **''ॐ असवे स्वाहा वसवे स्वाहा विभवे स्वाहा**

विवस्वते स्वाहा गणश्रिये स्वाहा गणपतये स्वाहा विभवे स्वाहाऽधि पतये स्वाहा शूषाय स्वाहा सꣳसर्पाय स्वाहा चन्द्राय स्वाहा ज्योतिषे स्वाहामलिम्लुचाय स्वाहा दिवापतये स्वाहा।"

ततः पुष्पैर्बिल्वपत्रैश्च **"ॐ भूः पुरुषं साम्बसदाशिवमावाहयामि। ॐ भुवः पुरुषं साम्बसदाशिवमावाहयामि। ॐ स्वः पुरुषं साम्बसदाशिवमावाहयामि।"** इति लिङ्गे पार्वतीपरमेश्वरावावाह्याऽक्षतान् गृहीत्वा **"ॐ स्वामिन् सर्वजगन्नाथ यावत्पूजावसानकम्। तावत्त्वं प्रीतिभावेन लिङ्गेऽस्मिन् सन्निधिं कुरु।"** ततोऽक्षतान् क्षिपेत्। ततः पूर्वोक्तविधिनाऽऽवाहनादि शर्करापञ्चामृतस्नानपर्यन्तमुपचारैः सम्पूज्य **'ॐ नमस्ते रुद्रमन्यव॰'** इति सूक्तेन गङ्गाजलदुग्धमधुघृतमिश्रेण द्रवेणाऽभिषेकं कारयेत्। ततः षोडशोपचारैर्यथाविधि विल्पत्रादिभिश्च सर्वान् देवान् महादेवं च सम्पूज्य प्रार्थनामेवं कुर्यात्-

"ॐ गणपतये नमः। लम्बोदर। नमस्तुभ्यं सततं मोदक प्रिय। निर्विघ्नं कुरु मे देव सर्वकार्येषु सर्वदा॥ ॐ अम्बेऽअम्बिकेऽम्बालिके न मा नयति कश्चन। ससस्त्यश्वकः सुभद्रिकां काम्पीलवासिनीम्। ॐ अम्बिकायै नमः। ॐ प्रैतु वाजी कनिक्रदन्नादद्रसभः पत्वा। भरन्नग्रिम्पुरीष्यम्मापाद्यायुषः पुरा। ॐ नन्दीश्वराय नमः। ॐ भद्रो नोऽ अग्निराहुतो भद्रा रातिः सुभग भद्रोऽअध्वरः। भद्रा उत प्रशस्तया। ॐ वीरभद्राय नमः। ॐ यत्र वाणाः सम्पतन्ति कुमारा विशिखा इव तन्न इन्द्रो वृहस्पतिरदितिः शर्म यच्छतु विश्वाहा शर्म यच्छतु। ॐ कुमाराय नमः। ॐवयꣳ सोमव्रते तव मनस्तनूषु विभ्रतः प्रजावन्तः सचेमहि। ॐ कुबेराय नमः। ॐ ओजश्च सहश्चमऽआत्मा च मे तनूश्च मे शर्म च मे वर्म च मेऽङ्गानि च मेऽस्थीनि च मे परूꣳषि च मे शरीराणि च मेऽआयुश्च मे जरा च मे यज्ञेन कल्पन्ताम्। ॐ कीर्त्तिमुखाय नमः। ॐ त्र्यम्बकं यजामहे सुगन्धिम्पुष्टिवर्धनमुर्वारुकमिव बन्धनान्मृत्योर्मुक्षीयमाऽमृतात् ॐ नमः शम्भवाय च मयोभवाय च

नमः शङ्कराय च मयस्कराय च नमः शिवाय च शिवतराय च। ॐ साम्बसदाशिवाय नमः। अनया पूजया रुद्राभिषेककर्मणा च गणपतिनन्दीश्वरवीरभद्रकुमारकुबेर- कीर्त्तिमुखसहितः साम्बसदाशिवः प्रीयताम्।''

ततो जलधारां कुर्वता रुद्राष्टाय्यायीमन्त्राणां पाठः कर्त्तव्यो यजमानेन यथासम्भवं हवनादिकर्म स्तोत्रपाठादिकं च कर्त्तव्यम्। ततो महादेवं प्रणमन् प्राथयेत् - **''ॐ पापोऽहं पापकर्माऽहं पापात्मा पापसम्भवः। त्राहि मां पार्वतीनाथ सर्वपापहरो भव। कालहर कण्टकहर दुःखहर दारिद्र्य हर॥ ॐ नमश्शिवाय॥''**

ततो जलहरीजलं नेत्रयोरञ्जयेत्- **''ॐ निरालम्बस्य ममालम्बं विपाटिताशेषविपत्कदम्बम्। मदीयपापाचलपातशम्बं प्रवर्ततां वाचि सदैव बम् बम्॥''** ततोऽक्षतपुष्पाण्यादाय - **''ॐ आवाहनं न जानामि न जानामि विसर्जनम्। पूजां चैव न जानामि क्षमस्व परमेश्वर। यदक्षरंपदभ्रष्टं मात्राहीनं च यद्भवेत्। तत्सर्व क्षम्यतां देव। प्रसीद परमेश्वर।''** इति पठित्वा क्षिपेत्। ततोऽनेन मन्त्रेण विसर्जनं कुर्यात् - **''ॐ हरो महेश्वरश्चैव शूलपाणिः पिनाकधृक्। शिवः पशुपतिश्चैव महादेव विसर्जनम्।''**

॥ इति रुद्राभिषेकविधिः ॥

अथ महामृत्युञ्जयजपविधानम्

यजमानो नित्यक्रियामचमनीयादिकृत्यं च विधाय देशकालौ सङ्कीर्त्य **अमुकगोत्रोत्पन्नोऽहम् अमुकनामशर्मा अमुकग्रहदशाशान्त्यर्थम् अमुकारिष्टप्रशमनाय वा रुद्राभिषेकपुरस्सरं श्रीमृत्युञ्जयप्रीतये अमुकसङ्ख्याकं महामृत्युञ्जयमन्त्रजपं तद्दशांशहवनतर्पणमार्जन-ब्राह्मणभोजनादिकर्म करिष्ये।''** इति सङ्कल्पं कृत्वा रुद्राभिषेकविधिना श्रीमृत्युञ्जयं पार्थिवलिङ्गं च सम्पूज्य महामृत्युञ्जयमन्त्रस्य विनियोगं हस्ते जलमादायैवं कुर्यात् - **''ॐ अस्य श्रीमहामृत्युञ्जयमन्त्रस्य वसिष्ठ ऋषिरनुष्टुप् छन्दः श्री त्र्यम्बकरुद्रो देवता श्रीं बीजं ह्रीं शक्तिः मम**

शरीरे सर्वारिष्टनिवृत्तिपूर्वकं सकलमनोरथसिद्ध्यर्थे जपे[१] विनियोगः।'' जलं भूमौ पातयेत्। ततो मन्त्रस्य ऋषिकरहृदयादिन्यासं विधाय यथासम्भवं पदन्यांसं वर्णन्यासञ्च कुर्यात्। ततो ध्यानमनेन मन्त्रेण कर्त्तव्यम्- **''ॐ हस्ताभ्यां कलशद्वयाऽमृतरसैराप्लावयन्तं शिरो, द्वाभ्यां तौ दधतं मृगाऽक्ष-वलये द्वाभ्यां वहन्तं परम्। अङ्कन्यस्तकरद्वयामृतघटं कैलाशकान्तं शिवम् स्वच्छाम्भोजगतं नवेन्दुमुकुटाभान्ते त्रिनेत्रं भजे।** इति ध्यात्वा मालापूजनं[२] विधाय जपविधिना मूलमन्त्रं जपेत्। महामृत्युञ्जयमन्त्रः- **''ॐ हौं ॐ जूं सः भूर्भुवः स्वः त्र्यम्बकं यजामहे सुगन्धिम्पुष्टिवर्धनम्। उर्वारुकमिव बन्ध नान्मृत्योर्मुक्षीय माऽमृतात् भूर्भुवः स्वरों जूं सः हौं ओम्।**

ततो जपान्ते यजमानः प्रार्थयेत् - **''ॐ मृत्युञ्जय महारुद्र त्राहि मां शरणागतम्। जन्ममृत्युजरारोगैः पीडितं कर्मबन्धनैः। तावकस्त्वद्गत-प्राणस्त्वच्चितोऽहं सदा मृड। इति विज्ञाप्य देवेशं जपेन्मन्त्रं त्र्यम्बकम्।।''**

ततो **''गुह्याति॰''** इत्यादिमन्त्रेण महादेवाय जपं निवेदयेत्। जपसमाप्तौ त्रिकोणात्मके कुण्डे तन्त्रोक्तविधिना वैदिकविधिना वा जपदशांशहवनं[३] कारयेत्। अनुष्ठानेऽस्मिन् पुत्तलिकासु रोगी वस्त्रे च रोगारिष्टानां प्राणप्रतिष्ठां कृत्वा **''मा नो महा॰''** इति मन्त्रेण रुग्णशिरसि सप्तबारं भ्रामयित्वाऽग्नौ यथाविधि प्रक्षिपेत्। अयं तान्त्रिकविधिर्विशेषफलदायित्वादत्र सङ्क्षेपेण सङ्केतितः।'' **इति महामृत्युञ्जयमन्त्रजपविधानम्।**

---

१. मनसा यः स्मरेत्स्तोत्रं वचसा वा मनुं जपेत्।
उभयं निष्फलं देवि भिन्नभाण्डोदकं यथा॥

२. विना भस्मत्रिपुण्ड्रेण विना रुद्राक्षमालया।
पूजितोऽपि महादेवो न स्यात्तस्य फलप्रदः॥

३. स्वजन्मदिवसे यस्तु पायसैर्मधुरान्वितैः।
जुहोति तस्य वर्द्धन्ते कमलारोग्यकीर्त्तयः॥
गुडूचीवकुलोत्थाभिः समिद्भिर्हवनं नृणाम्।
जन्मतारात्रये रोगान्मृत्युं चापि विनाशयेत्॥
प्रत्यहं जुहुयाद् दूर्वामपमृत्युविनष्टये। किं बहूक्तेन सर्वेष्टं प्रयच्छति शिवो नृणाम्॥''
महामृत्युञ्जयहवनद्रव्यसम्बन्धे रोगानुसारेण कामनया च हवनद्रव्याणि
वसिष्टकल्पे निगदितानि तानि विस्तरेण द्रष्टव्यानि।

अथ दशांशतर्पणमार्जनविधिः

हवनं कृत्वा पात्रस्थजले जपदेवतां रक्तचन्दनगन्धपुष्पाक्षतैः सम्पूज्य होमदशांशेन सतीर्थजलदुग्धमिश्रवारिणा मूलमन्त्रान्ते **"ॐ साङ्गं सपरिवारम् अमुकदेवतां तर्पयामि"** इत्युक्त्वा तर्पणं कुर्यात्। ततस्तर्पणदशांशेन मूलमन्त्रान्ते **"ॐ आत्मानमभिषिञ्चामि नमः"** इति पठित्वा तर्पणसञ्चितातिरिक्त-शुद्धोदकेन यजमानशिरसि भूमौ वा मार्जनं कुर्यात्। **इति दशांशतर्पण-मार्जनविधिः॥**

अथ नवचण्डीशतचण्डीविधानम्

प्रथमं तावद् यजमान आचमनादिकं कृत्वा देशकालौ सङ्कीर्त्य **अमुकगोत्रोऽहम् अमुकशर्मा श्रुतिस्मृतिपुराणोक्तफलप्राप्तिकामा-पूर्वकदीर्घायुर्विपुलधनपुत्रपौत्राद्यनवच्छिन्नसन्ततिवृद्धिस्थिरलक्ष्मी कीर्त्तिलाभार्थं शत्रुपराजयार्थं ममाभीष्ट सिद्ध्यर्थं स्वस्तिवाचनपुरस्सरं कलशस्थापनपूजनं गणपतिभैरवलोकपालदिक्पालमातृकायोगिनी-क्षेत्रपालग्रहादीनां ततः श्रीमहाकालीमहालक्ष्मीमहासरस्वतीपूजनं शापोद्धारपुरस्सरं कवचार्गलाकीलकपाठरात्रिसूक्तदेव्यथर्वशीर्ष पाठविनियोगन्याससहितं नवार्णमन्त्रजपं ध्यानविनियोगन्याससहितं दुर्गासप्तशत्याश्चरित्रयपाठं ततो विनियोगन्याससहितं नवार्णमन्त्रजप-देवीसूक्तपाठरहस्यत्रयपाठशापोद्धारादिकं नवचण्डीपाठं करिष्ये। तदङ्गभूतं नवकुण्डे देवीप्रीत्यर्थं हवनतर्पणादिकर्म कुमारीभोजनं च करिष्ये।"** इति सङ्कल्पं विधाय मण्डपस्थदेवतानां पूजनं कृत्वा देवीपूजनं च विधाय यथासङ्कल्पितं दुर्गासप्तशतीपाठं कुर्यात्। एवं नवदिनं यावत्पाठं कृत्वाऽष्टम्यां नवम्यां वा तिलमिश्रितपायसैर्हवनं नवकुण्डेषु, एकस्मिन् वा कुण्डे सप्तशतीमन्त्रान्ते स्वाहाकारं पठित्वा कुर्यात्। नवार्णमन्त्रान्ते स्वाहाकारं विधाय तेनैव होमोऽपि कार्यः। होमान्ते तर्पणं मार्जनं कुमारीभोजनं च कृत्वा यथाविधि समापयेत्। कवचमन्त्रैर्होमो न कर्त्तव्यः। **इति नवचण्डीविधानम्॥**

अथ शतचण्डीविधानम्

शङ्करस्य भवान्या वा प्रासादनिकटे शुभम्। मण्डपं द्वारवेदाढ्यं कुर्यात्सध्वजतोरणम्। तत्र कुण्डं प्रकुर्वीत प्रतीच्यां मध्यतोऽपि वा। स्नात्वा

नित्यक्रियां कृत्वा वृणुयाद्दशवाडवान्[१]। जितेन्द्रियान्सदाचारान् कुलीनान्सत्यवादिनः। व्युत्पन्नांश्चण्डिकापाठरतांल्लज्जादयावतः। मधुपर्कविधानेन हेमवस्त्रादिदानतः। जपार्थमासनं मालां दद्यात्तेभ्योऽपि भोजनम्।। ते हविष्यान्नमश्नन्तो मन्त्रार्थगतमानसाः। भूमौ शयानाः प्रत्येकं जपेयुश्चण्डिकास्तवम्॥ मार्कण्डेयपुराणोक्तं दशकृत्वः सचेतसः। नवार्णं[२] चण्डिकामन्त्रं जपेयुश्चायुतं पृथक्॥ यजमानः पूजयेच्च कन्याया नवकं शुभम्। द्विवर्षाद्या दशाब्दान्ताः कुमारी परिपूजयेत्॥ विप्रां सर्वेष्टसंसिद्धयै यशसे क्षत्रियोद्भवाम्। वैश्यजां धनलाभाय पुत्राप्त्यै शूद्रजां यजेत्। द्विवर्षा सा कुमार्युक्ता त्रिमूर्त्तिर्हायनत्रिका। चतुरब्दा तु कल्याणी पञ्चवर्षा तु रोहिणी षडब्दा कालिका प्रोक्ता चण्डिका सप्तहायना। अष्टवर्षा शाम्भवी स्याद् दुर्गा तु नवहायना॥ सुभद्रा दशवर्षोक्ता नाममन्त्रैः प्रपूजयेत् तासामावाहने मन्त्रः प्रोच्यते शङ्करोदितः॥ मन्त्राक्षरमयीं लक्ष्मीं मातृणां रूपधारिणीम्। नवदुर्गात्मिकां साक्षात्कन्यामावाहयाम्यहम्॥ कुमारिकादिकन्यानां पूजा मन्त्रान्ब्रुवेऽधुना। जगत्पूज्ये जगद्वन्द्ये सर्वशक्तिस्वरूपिणि॥ पूजां गृहाण कौमारि जगन्मातर्नमोऽस्तु ते। त्रिपुरां त्रिपुराधारां त्रिवर्षां ज्ञानरूपिणीम्। त्रैलोक्यवन्दितां देवीं त्रिमूर्त्तिं पूजयाम्यहम्। कालात्मिकां कलातीतां कारुण्यहृदयांशिवाम्॥ कल्याणजननीं देवीं कल्याणीं पूजयाम्यहम्। अणिमादिगुणाधारामकाराद्यक्षरात्मिकाम्॥ अनन्तशक्तिकां लक्ष्मीं रोहिणीं पूजयाम्यहम्। कामचारीं शुभां कान्तां कालचक्रस्वरूपिणीम्। कामदां करुणोदारां कालिकां पूजयाम्यहम्। चण्डवीरां चण्डमायां चण्डमुण्डप्रभञ्जनीम्॥ पूजयामि सदा देवीं चण्डिकां चक्रविक्रमाम् सदानन्दकरीं शान्तां सर्वदेवनमस्कृताम्॥ सर्वभूतात्मिकां लक्ष्मीं शाम्भवीं पूजयाम्यहम्। दुर्गमे दुस्तरे कार्ये भव दुःखविनाशिनीम्॥ पूजयामि सदा भक्त्या दुर्गां दुर्गर्तिनाशिनीम्। सुन्दरीं स्वर्णवर्णाभां सुखसौभाग्यदायिनीम्॥ सुभद्रजननीं देवीं सुभद्रां पूजयाम्यहम्॥'' एतैः पुराणोक्तमन्त्रैः कुमारीं पूजयेन्मुदा॥ वेद्यां विरचिते रम्ये सर्वतोभद्रमण्डले। घटं संस्थाप्य विधिना तत्रावाह्यार्चयेच्छिवाम्॥ तदग्रे कन्यकाश्चापि पूजयेद् ब्राह्मणानपि। उपचारैस्तु विविधैर्नवार्णावरणान्यपि ओङ्कारः प्रथमं पीठं पूर्णपीठमतः परम्। तृतीयं

---

१. ब्राह्मणान्।

२. ऐं ह्रीं क्लीं चामुण्डायै विच्चे' इति नवार्णमन्त्रः।

कामपीठं च पूजयेत्सम्प्रदायतः पूर्वादिदिक्षु पीठस्य गणेशादि- चतुष्ट्यम्। गणेशक्षेत्रपालौ च पादुके बटुकास्त्रयः॥ आग्नेयादि चतुर्दिक्षु पूज्यं देवी चतुष्ट्यम्। जया च विजया चैव जयन्ती चापराजिता॥

पूर्वोक्तमण्डले[१] पूर्वकोणे सरस्वतीसहितो ब्रह्मा श्रीसहितो विष्णु-नैर्ऋत्यामुमया शिवो वायव्यां षट्कोणे चक्रमध्यस्थमध्यबीजे श्रींमहालक्ष्मी ह्रीं महाकाली ऐं महासरस्वती दक्षिणवामयोरुदक् सिंहो दक्षिणे महिषः, षट्कोणेषु नन्दजारक्तदन्तिकाशाकम्भरी दुर्गाभीमाभ्रामर्यः सविन्दुना-माद्यवर्णताराद्याश्चासां नाममन्त्रः पूजादौ तारः प्रणवोऽष्टत्रयेषु ब्रह्माणीमाहेश्वरी-कौमारीवैष्णवीवाराहीनारसिंही ऐन्द्री चामुण्डा चोक्तरीत्या नाममन्त्रैः पूज्याः। ततो विष्णुमायादिचतुर्विंशति[२] देवताः प्रागादिक्रमेण केसरेषु पूज्याः, प्रतिपत्रञ्च केसरत्रयं वर्तते।

नामूले तु सम्पूज्य माधवादिचतुष्टयम्।
आधारः कूर्मशेषौ च चतुर्थी पृथिवी नृप॥

गृहकोणेषु गणेशः क्षेत्रपालो वटुको योगिन्यः प्रागादिदिक्षु इन्द्राद्याश्चेति। एवं चतुर्दिनं पूजनादिकं कार्यम्। तत्र प्रथमदिने एकावृत्तिर्द्वितीये द्वे वृत्ती, तृतीये तिस्रश्चतुर्थे चतस्र इति कर्त्तव्यम्। पञ्चमे दिवसे हवनं कर्त्तव्यम्। होमद्रव्याण्युक्तानि- "**पायसान्नैस्त्रिमध्वक्तैद्राक्षारम्भा**[३] **फलादिभिः। मातुलिङ्गैरिक्षुखण्डैनारिकेलयुतैस्तिलैः। जातीफलैराम्रफलै-रन्यैर्मधुरवस्तुभिः।**" इति सप्तशत्या दशावृत्या प्रतिमन्त्रं त्रिकोणात्मकेषु योन्याकारेषु वा शतकुण्डेषु, दशकुण्डेषु एकस्मिन् वा कुण्डे जुहुयात्। तद् यथा - "**सप्तशत्या दशावृत्या प्रतिमन्त्रं हुतं चरेत्। अयुतं च नवार्णेन स्थापितेऽग्नौ विधानतः। कृत्वावरणदेवानां होमं तन्नाममन्त्रतः। कृत्वा पूर्णाहुतिं सम्यग् देवमग्निं विसृज्य च॥ अभिषिञ्चेच्च यष्टारं विप्रौघः कलशोदकैः। निष्कं सुवर्णमथवा प्रत्येकं दक्षिणां दिशेत्॥ भोजयेच्च**

१. सप्तशतीपूजनयन्त्रे।

२. विष्णुमाया, चेतना, बुद्धिः, निद्रा, क्षुधा, छाया, शक्तिः, तृष्णा, क्षान्तिः, जातिः, लज्जा, शान्तिः, श्रद्धा, कान्तिः, लक्ष्मीः, धृतिः, वृत्तिः, स्मृतिः, दया, तुष्टिः, पुष्टिः, मातृ, भ्रान्तिः, चितिः। इति सप्तशत्यां पञ्चमाध्याये तद्गतमन्त्रानुच्चार्यैतेषां पूजा कर्त्तव्या।

३. आज्यं मधु तथा क्षीरं मधुत्रयं समुच्यते।

शतं विप्रान् भक्ष्यभोज्यैः पृथग् विधैः। तेभ्योऽपि दक्षिणां दत्त्वा गृह्णीयादाशिषस्तथा॥ एवं कृते जगद्वश्यं सर्वे नश्यन्त्युपद्रवाः। इति शतचण्डीविधानम्॥

अथ गायत्रीमन्त्रपुरश्चरणम्

यजमानो यथाविधि सन्ध्यादिकर्म कृत्वा कलशं संस्थाप्य गणेशादीन् देवान् सम्पूज्य गायत्रीयन्त्रे गायत्रीमावाहयेत्- **"ॐ आगच्छ वरदे देवि जपे मे सन्निधौ भव। गायन्तं त्रायसे यस्माद् गायत्री त्वं ततः स्मृता॥"** यन्त्राभावे मूर्तौ रक्तसूत्रावेष्टितप्राणप्रतिष्ठितपूगीफले वा गायत्रीमावाहयेत्। ततो गायत्रीं ध्यायेत्- **"श्वेतवर्णा समुद्दिष्टा कौशेयवसना तथा। श्वेतैर्विलेपनैः पुष्पैरलङ्कारैश्च भूषिता। आदित्यमण्डलस्था च ब्रह्मलोकगताऽथवा अक्षसूत्रधरादेवी पद्मासनगता शुभा॥"** ततो देवान् सर्वान् गायत्रीं च षोडशोपचारेण पूजयेत्। ब्रह्मवसिष्ठविश्वामित्र[1] शाप विमोचनार्थं तत्तन्मन्त्रान् पठेत्। ततो हस्ते जलमादाय विनियोगः कर्त्तव्यः-

"ॐ कारस्य ब्रह्मा ऋषिर्गायत्रीच्छन्दोऽग्निर्देवता शुक्लो वर्णः जपे विनियोगः॥ ॐ त्रिव्याहृतीनां प्रजापतिर्ऋषिर्गायत्र्युष्णि-गनुष्टुभश्छन्दांस्यग्निवाटवादित्या देवता जपे विनियोगः। ॐ गायत्र्या विश्वामित्र ऋषिर्गायत्री छन्दः सविता देवता शुक्लो वर्णोऽग्निर्मुखं ब्रह्मा शिरो विष्णुर्हृदयं रुद्रकवचं परमात्मा शरीरं साङ्ख्यायनष-ट्स्वरा सरस्वती जिह्वा पिङ्गाक्षी त्रिपदा गायत्री सवितुः प्रीतयेऽमुकसङ्ख्यया जपे विनियोगः॥"

अत्र केचन चतुर्विंशतिमुद्रा गायत्र्या जपपूर्वं जपानन्तरं चाऽष्टौ मुद्राः प्रदर्शनीया इति कथयन्ति तद् विस्तरभयान्नाऽत्र निगदितम्। ततो रुद्राक्षस्य स्फटिकस्य वा मालामादाय सम्पूज्य जपविधिना जपः कार्यः। जपात्पूर्वं गायत्रीमन्त्रेण न्यासः कर्त्तव्यः। ततो वस्त्राच्छादिता[2] गोमुखीं वा

---

१. विस्तरभयात्ते मन्त्रा अत्र नोदिता ग्रन्थान्तरेषु द्रष्टव्याः।

२. वस्त्रेणाच्छाद्य तु करं दक्षिणं यः सदा जपेत्।
तस्य स्यात्सफलं जाप्यं तद्हीनमफलं स्मृतम्॥
अत एव जपार्थं तु गोमुखी ध्रियते जनैः॥

नाभिप्रदेशे[१] धृत्वा मन्त्रस्याऽस्य जप: कर्त्तव्य: - **''ॐ भूर्भुव: स्व: तत्सवितुर्वरेण्यं[२] भर्गोदेवस्य धीमहि धियो यो न: प्रचोदयात्।''**

एवं साधक: सूर्याभिमुखंस्तिष्ठन् ब्रह्मचर्येण सपादलक्षसङ्ख्याकं चतुर्विंशतिसहस्त्रं वा मन्त्रं जपेत्। जपसमाप्तौ जपार्पणमपि कर्त्तव्यम्। ततो गन्धाक्षतमादाय **''ॐ सवित्र्यै नम: ॐ सरस्वत्यै नम: ॐ सवित्रे नम:, ॐ सन्ध्यायै नम:''** इति मन्त्रै: प्रार्थयेत्। ततो **''यानि कानि च पापानि''** इत्यादि मन्त्रेण सूर्यस्य प्रदक्षिणा[३] कर्त्तव्या। ततो दशांशहवनं स्वाहान्तैर्गायत्री-मन्त्रैर्घृतपायसपञ्चखाद्यादिभि: करणीयम्। ततो दशांशतर्पणमार्जनब्राह्मण-भोजनादिकृत्यमनुष्ठेयम्। **इति सङ्क्षेपेणगायत्रीमन्त्रपुरश्चरणम्॥**

अथ शान्तिकर्माणि

अथ नवग्रहशान्ति:

सर्वप्रथमं यजमानो ग्रहाणां पूजार्थं देशकालौ सङ्कीर्त्य **''अमुकगोत्रो-ऽमुकशर्मा मम ग्रहकृतसकलारिष्टशान्त्यर्थमायुरारोग्यधनकीर्त्ति-लाभायाऽहं नवग्रहशान्तिकर्म करिष्ये तदङ्गभूतं स्वस्तिवाचनं कलशस्थापनपूजनं पुण्याहवाचनं मण्डलदेवतापूजनं ततो ग्रहाणां षोडशोपचारेण पूजनं ग्रहमन्त्रजपं तद्दशांशहवनादिकर्माऽहं करिष्ये।''** इति सङ्कल्पं विधाय कलशादिदेवान् विधिवत्सम्पूज्य पुण्याहवाचनं मण्डलदेवतापूजनं च विधाय नवग्रहाणां यन्त्रेषु मूर्त्तिषु वा तेषां षोडशोपचारेण पूजां कुर्यात्। ततो जपविधिना नवग्रहाणां वैदिकमन्त्रान् तान्त्रिकमन्त्रान् वा जपेत्। अरिष्टानुसारमत्र जपसङ्ख्या भवितुमर्हति ग्रहाणां वैदिकतान्त्रिकमन्त्रा लिख्यन्ते-

---

१. प्रातर्नाभौ करं कृत्वा मध्याह्ने हृदि संस्थितम्।
सायं जपेच्च नासाग्रे ह्येतज्जपविधि: स्मृत:॥

२. पाठकाले वरेण्यं स्याज्जपकाले वरेणियम्।

३. एकां चण्ड्यां रवौ सप्त तिस्रो दद्याद् विनायके।
चतस्रो विष्णवे दद्याच्छिवे सार्द्धप्रदक्षिणा॥

सूर्यः - **"ॐ आकृष्णेन रजसा॰"** इति वैदिकमन्त्रः। **"ॐ सः ह्रौ ह्रीं ह्रां ॐ सूर्याय नमः" ॐ घृणिः सूर्य आदित्याय** वेति तान्त्रिकमन्त्रौ॥ धारणार्थं माणिक्यरत्नम्। रक्तद्रव्यैः पूजा कर्त्तव्या। होमसमिधाऽर्कः।

चन्द्रः - **"ॐ इमं देवा॰"** इति वैदिकमन्त्रः। **"ॐ सः श्रौं श्रीं श्रां ॐ सोमाय नमः।" "ॐ सों सोमाय नमः"** चेति तान्त्रिकमन्त्रौ। धारणार्थं मुक्तारत्नम्। श्वेतद्रव्यैः पूजा विधातव्या। होमसमिधा पलाशः।

भौमः - **"ॐ अग्निमूर्धा"** इति वैदिकमन्त्रः। **" ॐ सः क्रौं क्रीं क्रां ॐ भौमाय नमः।" ॐ अं अङ्गारकाय नमः"** चेति तान्त्रिकमन्त्रौ। धारणार्थं प्रवालरत्नम्। रक्तद्रव्यैः पूजनं कर्त्तव्यम्। होमसमिधा खदिरः।

बुधः - **"ॐ उद्बुध्य॰"** इति वैदिकमन्त्रः। **ॐ सः ब्रौं ब्रीं ब्रां ॐ सौम्याय नमः।" "ॐ बुंबुधाय नमः"** चेति तान्त्रिकमन्त्रौ। धारणार्थं मरकतरत्नम्। हरितद्रव्यैः पूजा कर्त्तव्या। होमसमिधाऽपामार्गः।

गुरुः - **"ॐ वृहस्पते॰"** इति वैदिकमन्त्रः। **"ॐ सः ह्रौं ह्रीं ह्रां ॐ वृहस्पतये नमः "ॐ वृं वृहस्पतये नमः"** चेति तान्त्रिकमन्त्रौ। धारणार्थं पद्मरागरत्नम्। पीतद्रव्यैः पूजा कर्त्तव्या। होमसमिधाऽश्वत्थः।

शुक्रः - **"ॐ अन्नात् परि॰"** इति वैदिकमन्त्रः। **"ॐ सः द्रौं द्रीं द्रां ॐ शुक्राय नमः।" "ॐ शुं शुक्राय नमः।"** चेति तान्त्रिकमन्त्रौ। धारणार्थं हीरकरत्नम्। श्वेतद्रव्यैः पूजा कर्त्तव्या। होमसमिधा उदुम्बरः।

शनिः-**"ॐ शन्नो देवी॰"** इति वैदिकमन्त्रः। **"ॐ सः खौं खीं खां ॐ शनैश्चराय नमः।" "ॐ शं शनैश्चराय नमः"** चेति तान्त्रिकमन्त्रौ। धारणार्थं नीलमरत्नम्। कृष्णद्रव्यैः पूजा कर्त्तव्या। होमसमिधा शमी।

राहुः - **"ॐ कयानश्चित्र॰"** इति वैदिकमन्त्रः। **"ॐ सः भ्रौं भ्रीं भ्रां ॐ राहवे नमः।" "ॐ रां राहवे नमः"** चेति तान्त्रिकमन्त्रौ॥ धारणार्थं गोमेदरत्नम्। कृष्णद्रव्यैः पूजा कर्त्तव्या। होमसमिधा दूर्वा।

केतुः - **"ॐ केतुं कृण्वन्॰"** इति वैदिकमन्त्रः। **"ॐ सः प्रौं प्रीं प्रां ॐ केतवे नमः।" "ॐ कें केतवे नमः"** चेति तान्त्रिकमन्त्रौ।

धारणार्थं वैदूर्यरत्नम्। कृष्णद्रव्यैः पूजा विधातव्या। होमसमिधा कुशः।

एवं मन्त्रं जप्त्वा तेनैव मन्त्रेण दशांशहवनं कुर्यात्। दशांशतर्पणमार्जन-ब्राह्मणभोजनमपि विधेयम्। ग्रहाणामुक्तसमिद्भिर्होमः कर्त्तव्यः। ततः प्रार्थना विधेया "**ॐ सूर्यः शौर्यमथेन्दुरुच्चपदवीं सन्मङ्गलंमङ्गलः। सद् बुद्धिं च बुधो गुरुश्च गुरुतां शुक्रः सुखं शं शनिः। राहुर्बाहुबलं करोतु विपुलं केतुः कुलस्योन्नतिं। शान्तिसौख्ययशस्करा हि भवतात्सर्वे प्रसन्ना ग्रहाः॥**" ततस्तत्तद्ग्रहनिमित्तं दानमपि दातव्यम्। समाप्तौ कलशजलेन यजमानशिरसि "**आपो हिष्ठे॰**" ति मन्त्रैरभिषेकः करणीयः। एवं कृते ग्रहाणां शान्तिर्भवति।

॥इति ग्रहशान्तिविधानम्॥

अथ मूलगण्डान्तशान्तिविधिः

सर्वप्रथमं विहितनित्यक्रियः कृताचमनो यजमानः शुद्धासनोपरि स्थित्वा स्वस्तिवाचनं विधाय तस्मिन्नेव मूलसञ्ज्ञकनक्षत्रे देशकालौ सङ्कीर्त्य "**अमुकगोत्रोऽमुकशर्माऽहं सपत्नीकोऽस्य शिशोः अमुकमूलनक्षत्रस्य अमुकचरणजननारिष्ट निवारणपूर्वकं तस्यायुर्वृद्धिपित्रादिसम्बन्धि शुभफलप्राप्तये श्रीपरमेश्वरप्रीतये च गोमुखप्रसवपूर्वकममुकनक्षत्र-गण्डान्तच्छान्तिं करिष्ये। तन्निर्विघ्नतासिद्ध्यर्थं तदङ्गत्वेन गणपत्या-दिपूजनं नान्दीश्राद्धञ्चाऽहं करिष्ये।**" इति सङ्कल्पं विधाय गणपतिनवग्रहादीनां पूजनं कृत्वा नान्दीश्राद्धं कुर्यात्।

तत आचार्य पूजाभूमेः पृथक् मण्डपाद् बहिश्च गोमयोपलिप्तगृहे ईशानकोणे श्वेतपीतसर्षपाणि विकिरेत्। "**आपो हिष्ठे**"ति मन्त्रैः पञ्चगव्येन[१]

१. गोमूत्रं गोमयं क्षीरं दधि सर्पिः कुशोदकम्।
'गायत्र्या' चैव गोमूत्रं 'गन्धद्वारे'ति गोमयम्॥
'आप्यायस्वे'ति वै क्षीरं 'दधिक्राब्णे'ति वै दधि।
'तेजोऽसिशुक्र'मित्याज्यं 'देवस्य त्वा' कुशोदकम्॥
एभिस्तु पञ्चभिर्युक्तं पञ्चगव्यंप्रचक्षते।
एतदेव महापुण्यं ब्रह्मकूर्चमिति स्मृतम्॥

च प्रोक्षणं कृत्वा तत्र तण्डुलपिष्टेनाऽष्टदलपद्मं कुर्यात्। पद्मोपरि ब्रीहीन्निक्षिप्य तस्योपरि नवीनं वंशशूर्पं निधाय शूर्पे तिलदर्भांश्च विकीर्य तस्योपरि रक्तवस्त्रं प्रसार्य तदुपरि पूर्वमुखं शिशुं निधाय त्रिगुणितेन माङ्गलिकसूत्रेण तं शिशुं सशूर्पं वेष्टयित्वा शिशुसमीपे गोमुखमानीय गोमुखात्प्रसवं भावयित्वा कुशैः पञ्चगव्येन शिशुं मार्जयेत् ततः मन्त्रः "**ॐ गवामङ्गेषु तिष्ठन्ति भुवनानि चतुर्दश। यस्मात्तस्माच्छिवं मे स्यादिह लोके परत्र च।**" तत आचार्यः शिशुमादाय "**ॐ विष्णो श्रेष्ठेन रूपेणाऽस्यां नार्यां गवीन्यां पुमांसं पुत्रमाधेहि दशमे मासि सूतवे।**" इति पठित्वा मातृहस्ते दद्यात्। ततो माता धेनुं मुहुर्मुहुर्दृष्ट्वा बालं पितुर्हस्ते दद्यात् तत्र पिता मन्त्रं पठेत्- "**ॐ अङ्गादङ्गात् सम्भवसि हृदयादधि जायसे। आत्मा वै पुत्रनामासि सञ्जीव शरदः शतम्।**" इति मन्त्रं पठित्वा पिता शिशोर्मूर्ध्न्याघ्राय मात्रे दद्यात्। ततो यजमानः पुण्याहवाचनं कारयेत्।

तत ऐशान्यां दिशि वरुणकलशस्थापनं कृत्वा तत्पूजनं मण्डदेवतानां च पूजनं कुर्यात्। ततो मूलसञ्ज्ञकनक्षत्रदेवताप्रतिमां संस्थाप्याऽन्युत्तारण-प्राणप्रतिष्ठां कृत्वाऽऽवाहयेत्। अत्र मूलसञ्ज्ञकनक्षत्राणां देवता तदावाहनमन्त्रा लिख्यन्ते-

आश्लेषा(सार्पदेवता) - "**ॐ नमोऽस्तु सर्पेभ्यो ये के च पृथिवीमनु। येऽन्तरिक्षे ये दिवि तेभ्यः सर्पेभ्यो नमः।** आवाहयामि।"

मघा(पितृदेवता) - "**ॐ उशन्तस्त्वा निधीमह्युशन्तः समिधीमहि। उशन्नु शतऽआवह पितॄन् हविषेऽअत्तवे।** आवाहयामि।"

ज्येष्ठा(इन्द्रदेवता) - "**ॐ सयोषा इन्द्र सगणो मरुद्भिः सोमं पिब वृत्रहा शूर विद्वान्। जहि शत्रुरपमृधो नुदस्वाथाभयं कृणुहि विश्वतो नः।** आवाहयामि।"

रेवती(पूषा) - "**ॐ पूषन् तव व्रते वयं न रिष्येम कदाचन। स्तोतारस्त इह स्मसि।** आवाहयामि।"

एवं मूलसञ्ज्ञकनक्षत्रदेवतामावाह्याऽष्टाविंशतिनक्षत्रदेवान्

पूगीफलेष्वक्षतपुञ्जेषु वाऽऽवाहनमेवं कुर्यात्-"**ॐ अश्विभ्यां नमः अश्विनावावाहयामि। ॐ यमाय नमः यममावाहयामि।** एवमेवाऽष्ट-विंशतिनक्षत्रदेवान् आवाहयेत्। ततो नैर्ऋतिप्रतिमायां प्राणप्रतिष्ठाऽग्न्युत्तारणपूर्वकं निर्ऋतिमावाहयेत्-"**ॐ असुन्वन्त यजमानमिच्छस्तेन सेत्वामन्विहित-स्करस्य। अन्यमस्मादिच्छसातऽइत्या नमो देवि निर्ऋते तुभ्यमस्तु। निर्ऋतिमावाहयामि।**" ततः **ॐ त्रातारमिन्द्र**'मिति मन्त्रेणाऽधिदे वतारूप-मिन्द्रमिन्द्रप्रतिमायामावाहयेत्। तदनन्तरं "**ॐ शन्नो देवी॰**" इति मन्त्रेण प्रत्यधिदेवता अप आवाहयेत्।

एवमावाहनं कृत्वा सर्वान् देवान् यथोपचारैः पूजयेत्। प्रार्थयेच्च-"**ॐ अनया पूजया निर्ऋत्याद्यावाहिता देवताः प्रीयन्ताम्।** पठित्वाऽक्षतान् क्षिपेत्।

ततो वरुणकलशसमीपं गोधूमवर्णेन श्वेतपङ्कजं विरच्य तत्रोपरि सप्तधान्यं संस्थाप्य सप्तधान्योपरि शतच्छिद्रं कलशं स्थापयेत्। तच्चतुर्दिक्षु पूर्वादिक्रमेण चतुष्कुम्भान् कलशस्थापनविधिना स्थापयेत्। पूर्वकलशे कमलरक्तचन्दनकुष्ठ प्रियङ्गुशुण्ठी मुस्ताऽऽमलकवचश्वेतसर्षपमुरामांस्यगरो शीरादिवनस्पतीन् निक्षिपेत्। ततः "**ॐ नमस्ते रुद्रमन्यव॰**" इत्यादि रुद्रसूक्तेन तं पूजयेत्। दक्षिणकुम्भे पञ्चामृतगजमदतीर्थजलसप्तधान्यस्वर्णानि निक्षिपेत्। "**ॐ आशुः शिशान॰**" इति द्वादशमन्त्रैस्तं पूजयेत्। पश्चिमकुम्भे सप्तमृत्तिका निक्षिपेत्। "**ॐ कृणुष्वाजः**" इति पञ्चमन्त्रान् पठेत् कुम्भं च पूजयेत्। उत्तरकुम्भे पञ्च[१] रत्नं वटाश्वत्थपलाशप्लक्षोदुम्बरपञ्चपल्लवान् क्षिपेत्। जम्बु प्लक्षोदुम्बर, वटाम्रमूलत्वचः सप्तकूपजलानि निक्षिपेत्। रक्षोहरणं चतुर्मन्त्रान् जप्त्वा पूजयेत्। मध्यस्थिते शतच्छिद्रकुम्भे शतौषधयो निक्षिपेत्। तदभावे यथालाभं सद्वृक्षाणां पल्लवान्, विष्णुकान्तासहदेवीतुलसीशतावरीकुश कुङ्कुमानि क्षिपेत्। "**ॐ त्र्यम्बकं यजामहे**" इति मन्त्रमष्टोत्तरशतं जप्त्वा

---

१. सुवर्णं रजतं मुक्ता राजावर्त्तं प्रवालकम्।
पञ्चरत्नकमाख्यातं शेषं वस्तु ब्रबीम्यहम्॥ (आदित्यपुराणे)

तं कुम्भं गन्धपुष्पाक्षतैरर्चयेत्। ततोऽर्चनान्तेऽग्निस्थापनभूमेः पश्चिमप्रदेशे तत्रोर्ध्वं शिक्यं बद्ध्वाऽथवा केनचिदुपायेन वंशपात्रे कम्बलखण्डं प्रसार्य तस्योपरि शतच्छिद्रं कलशं निधाय तस्याधः काष्ठपीठं निधाय श्वेतवस्त्रेणाऽऽच्छाद्य तत्र यजमानं शिशुसहितां यजमानपत्नीं चोपवेशयेत्। तत्र शतच्छिद्रे कलशे शनैः शनैः चतुः कुम्भस्थवारि प्रक्षिप्याऽऽचार्योऽभिषेकमन्त्रेण सपत्नीक-यजमानवालस्योपरि जलधारां कुर्यात्। अभिषेकमन्त्रः-"**ॐ देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम्। ॐ सरस्वत्यै वाचो यन्तुर्यन्त्रिये दधामि वृहस्पतेष्ट्वा साम्राज्येनाभिषिञ्चाम्यसौ। ॐ देवस्य त्वा०। ॐ सरस्वत्यै वाचो यन्तु यन्त्रेणाग्रे साम्राज्येनाभिषिञ्चामि ॐ देवस्य त्वा०। ॐ अश्विनो भैषज्येन तेजसे ब्रह्मवर्चसायाऽभिषिञ्चामि सरस्वत्यै भैषज्येन वीर्यायान्नाद्यायाभिषिञ्चामि इन्द्रस्येन्द्रियेण बलाय श्रियै यशसेऽभिषिञ्चामि।**"

ततः सपत्नीकः शिशुसहितो यजमानः स्नानं कृत्वा वस्त्रान्तराणि धृत्वाऽऽर्द्रवस्त्राणि च नापिताय दत्त्वाऽऽचमनं कुर्यात्। तत आचार्य कुशकण्डिकां विधाय होमविधिना होमं कृत्वा गणेशाम्बिकाग्रहलोक- पालदिक्पालादीनां मन्त्रैर्हवनं कृत्वा नम स्वाहान्तैर्नक्षत्रदेवतानामभिर्जुहुयात्। "**ॐ असुन्त मे०**" इति मन्त्रेण निर्ऋतये "**ॐ सयोषा इन्द्र०**" इति मन्त्रेण इन्द्राय। "**ॐ आपो हिष्ठे**'ति मन्त्रैरद्भ्यो जुहुयात्। अत्र मूलसञ्ज्ञकनक्षत्राणां हवनमन्त्रा, प्रत्यधिदेवताहवनमन्त्रा लिख्यन्ते-

आश्लेषा - "**ॐ नमोऽस्तु सर्पेभ्यो**" इति मन्त्रः। "**ॐ वृहस्पते अतियदर्यो**" इति तदधिदेवतागुरुमन्त्रः। "**ॐ उषन्तस्त्वा निधी०**" इति प्रत्यधिदेवता पितृमन्त्रः।

मघा - "**ॐ पितृभ्यः स्वधायिभ्यः**" इति मघामन्त्रः। "**ॐ नमोऽस्तु सर्पेभ्यो०**" इति तदधिदेवतासर्पमन्त्रः। "**ॐ भगं प्रणेतर्भग०**" इति प्रत्यधिदेवताभगमन्त्रः।

ज्येष्ठा - "**ॐ इन्द्र आसां नेता०**" ज्येष्ठामन्त्रः। "**ॐ मित्रस्य च ऋषणीधृतो०**" इति तदधिदेवतामित्रमन्त्रः। "**ॐ असुन्वन्त मे०**" इति

प्रत्यधिदेवतानिर्ऋतिमन्त्रः।

रेवती - "**ॐ पूषन्तव व्रते॰**" इति रेवतीमन्त्रः। "**ॐ शिवो नामासि॰**" इति अधिदेवताशिवमन्त्रः। "**ॐ यावाङ्कशा॰**" इति प्रत्यधि देवताऽश्विनीकुमारमन्त्रः।

अश्विनी - "**ॐ अश्विना तेजसा॰**" इति त्वश्विनीमन्त्रः। "**ॐ पूषन् तवव्रते॰**" इति तदधिदेवतापूषन्मन्त्रः। "**ॐ यमाय त्वाङ्गिरस्वते॰**" इति प्रत्यधिदेवतायममन्त्रः।

एवं नक्षत्रतदधिदेवताप्रत्यधिदेवतामन्त्रान्ते स्वाहाकारं संयोज्य प्रत्येकमष्टसङ्ख्या स्रुवेणाऽऽज्याहुतीर्दद्यात्। ततो "**ॐ अग्नये स्विष्टकृते स्वाहा**" इति स्विष्टकृद्होमं विधाय देवतानां कृते बलिदानं दधिमाषभक्तैः कर्त्तव्यम्। ततः संस्रवप्राशनं त्र्यायुषकरणं विधाय यथाविधि कांस्यपात्रस्य घृते शिशोर्मुखालोकनं कृत्वा मातापितरौ यथाविधिच्छायादानं कुर्याताम्। तदनन्तरमाचार्यः प्रधानवरुणकलशजलमादाय '**आपो हिष्ठे**'ति मन्त्रैर्बालमभिषिञ्चेत्। ततो दक्षिणादानं सूर्यार्ध्यदानं च विधाय यथाविधि सप्तविंशतिर्दश वा विप्रान् यजमानो भोजयेत्। ततोऽनुष्ठानं विसर्ज्य यजमानः सपरिवारो भोजनं कुर्यात्। **इति मूलगण्डान्तशान्तिविधिः॥**

अथ दुःस्वप्नशान्तिविधिः

दुःस्वप्नदर्शने शान्तिं कुर्यात्। यजमानो नित्यक्रियां कृत्वा स्नात्वाऽऽचम्य शुद्धासने स्थित्वा स्वस्तिवाचनं कुर्यात्। ततः पुष्पाक्षतान् गृहीत्वा देशकालौ सङ्कीर्त्य '**अमुकगोत्रोऽमुकशर्माऽहं श्रुतिस्मृति पुराणोक्तफलप्राप्तिकामः अमुकस्वप्नदर्शनजन्यदुःस्वप्नारिष्टशान्तये आयुरारोग्ययशोलाभाय श्रीरात्रिदेवताप्रीतये च दुःस्वप्नशान्तिकर्म करिष्ये**। तदङ्गभूतं गणपत्यादिदेवानां पूजनं हवनादिकर्म करिष्ये। इति सङ्कल्पं कृत्वा कृतोपवासो यजमानो गणपत्यादिपूजनं कुर्यात् कलशं च स्थापयेत्। पूगीफले रात्रिदेवतां "**ॐ रात्री व्यख्य॰**" इत्यादिमन्त्रेणाऽऽवाहयेत्। ततः षोडशोपचारेण सम्पूज्य यथाविधि कुशकण्डिकां विधाय प्रायश्चित्तसञ्ज्ञकवरुणमन्त्रैर्हवनं कृत्वा गणपत्यादिदेवानां कृते होमं कुर्यात्। तत्पश्चात्

पायसैस्तिलमिश्रितैर्दूर्वायुक्तैर्जुहुयात् गायत्रीमन्त्रेण त्र्यम्बकमन्त्रेणाऽष्टोत्तरशतम्। ततो रात्रिसूक्तमन्त्रैर्हवनं कर्त्तव्यम्। ततो मन्त्रैरेभिर्दशकृत्वो जुहुयात्- "**ॐ अद्या नो देव सवितः प्रजावत्सावी सौभगम्। परा दुःखष्वण्न्यं सुव स्वाहा। ॐ विश्वानि देव सवितर्दुरितानि परासुव। यद् भद्रं तन्न आसुव स्वाहा। ॐ यो मे राजन् युज्यो वा सखा वा स्वप्ने भयं भीरवे मह्यमाह। स्तेनो वा यो दिप्सति वृको वा त्वं तस्माद् वरुण पाह्यस्मान् स्वाहा। ॐ त्रिंते दुःस्वप्न्यं सर्वमाप्त्ये परि दद्मस्यनेहसो व ऊतयः सुऽऊतयो व ऊतयः स्वाहा।**"

एवं हवनं कृत्वा संस्रवप्राशनं त्र्यायुषं च कुर्यात्। ततो कलशस्थ जलैरभिषेको रात्रिसूक्तमन्त्रेण "**आपो हिष्ठे**"ति मन्त्रैः कर्त्तव्यः। अत्र हवनं शमीसमिद्भिर्विधेयः। ततो ब्राह्मणेभ्यो दक्षिणां दत्त्वा तान् भोजयेत्। गुडूचीघृतं च स्वयं भक्षयेत्। एवं दुःस्वप्नजन्याऽरिष्टशान्तिर्भवति।

।। इति दुःस्वप्नशान्तिविधिः।।

अथ वैधव्ययोगशान्तिविधिः

कन्याया वैधव्ययोगशान्तये कन्यापिता विवाहात्पूर्वं चन्द्रनक्षत्रादिशुभे सति शुभेऽहनि स्नात्वा नवं वस्त्रं परिधाय पूर्वाभिमुखः समुपविश्य स्वदक्षिणे कन्यां चोपवेश्य दीपं प्रज्वाल्याऽऽचमनं प्राणायामादिकं विधाय स्वस्तिवाचनं कुर्यात्। ततो देशकालौ सङ्कीर्त्य "**ममाऽमुकराशेरस्या कन्यकाया जन्मकालिकलग्नाद् अमुकाऽमुकस्थानस्थिताऽमुकग्रहैः संसूचित बालवैधव्यादिदोषाऽनेकविधवन्ध्या-काकबन्ध्यादुर्भगामृतवत्सादिदोष-निराकरणपूर्वकसौभाग्यप्राप्तिद्वाराऽऽयुष्यारोग्यैश्वर्याभिवृद्धिपूर्वक-दाम्पत्यैश्वर्यसुखावाप्तये श्रीपरमेश्वरप्रीतये च श्रीविष्णुप्रतिमया कन्योद्वाहकर्म तदङ्गत्वेन कलश मातृकापूजनग्रहपूजनवसोर्धारनिपातना-ऽऽयुष्यमन्त्रजपाभ्युदयिकनान्दीश्राद्धादिकर्म तत्रादौ विघ्नशान्तये श्रीगौरीगणपतिपूजनं च करिष्ये।**" इति सङ्कल्प्य गणपतिपूजनं कलशमातृकाग्रहवसोर्धारानान्दीश्राद्धादिकृत्यं विधायाऽऽयुष्यमन्त्रं यथाशक्ति जपेत्।

ततः सुवर्णनिर्मितां चतुर्भुजां यथायुधयुक्तां विष्णुप्रतिमां शालग्रामशिलां वा गृहीत्वाऽग्न्युत्तारणपूर्वकं प्राणप्रतिष्ठां कृत्वा पञ्चामृतेन स्नापयेत्। ततो विष्णुप्रतिमां नमस्कृत्य "**त्वामहं वृणे**" इति पठित्वा वरणं कुर्यात् ततो विष्णुं प्रार्थयेत्- "**ॐ उद्वाहयिष्ये विधिवदच्युतेन मनोहराम्। कन्यां सौभाग्यसौख्यार्थहेतवेऽहं द्विजोत्तम।**" ततो "**मनो जूतिर्जुषतां**" इति मन्त्रेण विष्णुमासने प्रतिष्ठाप्य कन्यकां च मङ्गलकलशैः स्नानं कारयित्वा तां वस्त्राभरणैरलङ्कृत्य कङ्कणं च बद्ध्वा विष्णुसमीप आनयेत्। कन्याहस्तेन सङ्कल्पपूर्वकं विष्णुपूजनं कारयेत पूजनानन्तरं कन्या प्रार्थयेत् - "**ॐ देहि विष्णो वरं देव कन्यां पालय दुःखतः। पतिं जीवय कन्यायाश्चिरं पुत्रसुखं कुरु।**" इति प्रार्थनां कृत्वा कन्यापिता मधुपर्कादिविवाहकृत्यं विधाय कन्या विष्णुप्रतिमयोरन्तरालेऽन्तः पटं धृत्वा कन्यावस्त्रे ग्रन्थिबन्धनं "**मङ्गलं भगवान् विष्णुर्मङ्गलं॰**" इति मन्त्रेण कृत्वा समञ्जनान्ते विवाहोपयोगिमङ्गलश्लोकानां पाठं कारयित्वा कन्यादानसङ्कल्पमेवं कुर्यात्। देशकालौ सङ्कीर्त्य **अमुकगोत्रोऽमुकशर्माऽहं कन्यापिता अमुकराशेरमुक-नामधेयाया ममास्या कन्याया जन्मकालिकलग्नादमुकाऽमुकस्थान-स्थाऽमुकाऽमुकग्रहैः संसूचितवैधव्यदोषनिराकरणपूर्वकसौभाग्यप्राप्तिद्वारा एतद्भविष्यद्भर्तुरारोग्यैश्वर्यालाभकामः अमुकगोत्राम् अमुकप्रवराम् अमुकनाम्नीं श्रीस्वरूपिणीमिमां कन्यां विष्णवे तुभ्यं सम्प्रददे।**" इति सङ्कल्प्य विवाहविधिना कन्यादानं कृत्वाऽग्राङ्कितमन्त्रैरधस्तादुपरिष्टाच्च मन्त्रावृत्या कन्यां कुम्भं च दशतन्तुसूत्रेण परिवेष्टयेत्। मन्त्राः - "**ॐ परित्वागिर्वणो गिर इमा भवन्तु विश्वतः। वृद्धायुमनुवृद्धायो जुष्टा भवन्तु जुष्टयः॥१॥ ॐ इन्द्रस्यूरसीन्द्रस्य ध्रुवोऽसि ऐन्द्रमसि वैश्वदेवमसि॥२॥ ॐ विभुरसि प्रवाहणो वह्निरसि हव्यवाहनः श्वात्रोऽसि। प्रचेतास्तुथोऽसि विश्ववेदाः॥३॥ ॐ उशगसि कविरङ्घारिरसि बम्भारिरवस्युरसि दुवस्वान् शुन्ध्यूरसि मार्जालीयः सम्राडसि कृशानुः परिषद्योऽसि पवमानो नभोऽसि प्रतक्वा मृष्टोऽसि हव्यसूदनऽऋतधामासि स्वर्ज्योतिः॥४॥ समुद्रोऽसि विश्वव्यचा अजोऽस्येकपादहिरसि बुध्न्योवागस्यैन्द्रमसि सदोऽस्यतस्य द्वारौ मा मा संताप्तमध्वना मध्वपते प्रमातिरस्वस्तिमे- ऽस्मिन्पथि देवयान भूयात्॥५॥**

ॐ मित्रस्य मा चक्षुषेक्षध्वमग्नयः सगराः सगराः स्थ सगरेण नाम्ना रौद्रेणानीकेन पात माग्नयः। पितृतमाग्नयो गोपायतमा नमो वोऽस्तु मामाहिᳬसिष्ठ॥६॥ ॐ ज्योतिरसि विश्वरूपं विश्वेषां देवानां समित्। त्वᳬ सोमतनू कृद्भ्यो द्वेषेभ्योऽन्यकृतेभ्य उरुयन्तासि वरुथᳬ स्वाहा जुषाणो अप्तुराज्यस्य वेतु स्वाहा॥७॥ ॐ अग्ने नय सुपथा रायेऽअस्मान् विश्वानि देव वयुनानि विद्वान्। युयोध्यस्मज्जुहुराणमेनो भूयिष्ठां ते नम उक्ति विधेम॥८॥ ॐ अयं नोऽअग्निर्वरिवस्कृणोत्वयं मृधः पुर एतु प्रभिन्दन्। अयं वाजाञ्जयतु वाज साता वयᳬ शत्रूञ्जयन्तु जर्हृषाणः स्वाहा॥९॥ ॐ उरु विष्णोर्विक्रमस्वोरुक्षयात नस्कृधि। घृतं घृतयोने दिवः प्रप्रयज्ञपतिं तिरः स्वाहा॥१०॥

एवं वेष्टयित्वा ससङ्कल्पं विप्राय दक्षिणादानं कुर्यात्। ततो हस्ते कुशाक्षतपुष्पाण्यादाय पूर्ववत्सङ्कल्पं पठित्वा **"इमां सुपूजितां विष्णुप्रतिमाम-ग्निदैवताम् अमुकगोत्रायाऽमुकनामधेयाय शर्मणे ब्राह्मणाय तुभ्यमहं सम्प्रददे।"** इति पठित्वा ब्राह्मणहस्ते कन्यां विष्णुप्रतिमां च स्पृष्ट्वा कुशाक्षतादि दद्यात् ततः प्रार्थनां कुर्यात् - **"ॐ यन्मया पूर्वजनुषि घ्नन्त्या पतिमनागसम्। विषोपविषशस्त्राद्यैर्हतो वातिविरक्तया। प्राप्यमाणं महाघोरं यशः सौख्यध नापहम्। वैधव्याद्यतिदुःखौघनाशाय सुखलब्धये। बहुसौभाग्यलब्ध्यै च महाविष्णोरिमां तनुम्। सौवर्णीं निर्मिताशक्त्यां तुश्यं सम्प्रददे द्विज।"** इति पठित्वा सूत्राणि कन्याया अपसार्य सूत्रसहितां विष्णुप्रतिमां दत्वा ब्राह्मणकरे त्रिबारं कन्या **"अनघाऽहमस्मि"** इति ब्रूयात्। ब्राह्मणः **"ॐ द्यौस्त्वा ददातु पृथिवी त्वा प्रतिगृह्णातु ॐ स्वस्ति"** इति कथयित्वा प्रतिग्रहणं कुर्यात् ततो ब्राह्मणः पुनर्ब्रूयात्- **"ॐ कोऽदात्कस्माऽअदात् कामायादात्। कामो दाता कामः प्रतिगृहीता कामैतत्त"** इति पठित्वा **"अनघाभव"** इति त्रिबारं ब्रूयात्। ततो यजमानः साङ्गतासिद्ध्यर्थं विप्राय दक्षिणां दत्वा तिलकब्राह्मणाशिषो गृहीत्वा ब्राह्मणभोजनं कारयित्वाऽनुष्ठानं समापयेत्। **इति वैधव्ययोगशान्तिविधिः॥**

॥ इति कर्मकौमुद्यामनुष्ठानशान्तिकर्माध्यायः समाप्तः॥

संस्कारकर्माध्यायः

अथ संस्कारकर्मसु सामान्यनियमाः

जन्मना जायते शूद्रः संस्काराच्च द्विजोच्यते।
विद्यया याति विप्रत्वं त्रिभिः श्रोत्रिय उच्यते॥१॥

नैमित्तिकाः षोडशोक्ताः समुद्वाहावसाक्षकाः।
सप्तैवाग्रयणाद्याश्च संस्कारा वार्षिका मताः॥२॥

मासिकं पार्वणं प्रोक्तमशक्तानां तु वार्षिकम्।
महायज्ञाश्च नित्या स्युः सन्ध्यावच्चाग्निहोत्रवत्॥३॥

सम्पूज्य गन्धमाल्याद्यैर्ब्राह्मणान् स्वस्ति वाचयेत्।
धर्मकर्मणि माङ्गल्ये सङ्ग्रामेऽद्भुतदर्शने॥४॥

कर्मादिषु च सर्वत्र मातरः सगणाधिपाः।
पूजनीयाः प्रयत्नेन पूजिताः पूजयन्ति ताः॥५॥

प्रतिमासु च शुद्धासु लिखित्वा वा पटादिषु।
अपि वाऽक्षतपुञ्जेषु नैवेद्यैश्च पृथग्विधैः॥६॥

कुड्यलग्ना वसोर्धारा सप्तवारं घृतेन तु।
कारयेत्पञ्च धारा वा नातिनीचा न चोच्छ्रिताः॥७॥

कन्यापुत्रविवाहेषु प्रवेशे नववेश्मनः।
नामकर्मणि बालानां चूडाकर्मणिके तथा॥८॥

सीमन्तोन्नयने चैव पुत्रादिमुखदर्शने।
नान्दीमुखं पितृगणमर्चयेत्प्रयतो गृही॥९॥

नान्दीश्राद्धं पिता कुर्यादाद्ये पाणिगृहे पुनः।
अत ऊर्ध्वं सुतः कुर्यात्स्वयमेव तु नान्दिकम्॥१०॥

गार्भैर्होमैर्जातकर्मचूडामौञ्जिनिबन्धनैः।
बैजिकं गार्भिकं चैतो द्विजानामपमृज्यते॥११॥

ब्रह्मक्षत्रियविट्शूद्रा वर्णास्त्वाद्यास्त्रयो द्विजाः।
निषेकाद्याः श्मशानान्तास्तेषां वैमन्त्रतः क्रियाः॥१२॥

तूष्णीमेताः क्रियाः स्त्रीणां विवाहस्तु समन्त्रकः।
चौले च व्रतबन्धे च विवाहे यज्ञकर्मणि॥१३॥

माता रजस्वला यस्य भवेत्तस्य न शोभनम्।
वैधव्यं च विवाहे स्याज्जडत्वं व्रतबन्धने॥१४॥

चूडायां च शिशोर्मृत्युर्विघ्नं यात्राप्रवेशयोः।
युञ्जानामाहुतिं दत्त्वा दानं कृत्वा न दुष्यति॥१५॥

पुत्रोद्वाहात्परं पुत्रीविवाहो न ऋतुत्रये।
न कार्यं व्रतमुद्वाहान्मङ्गले नाप्यङ्गलम्॥१६॥

विवाहश्चैव कन्यानां षणमासाभ्यन्तरे यदि।
असंशयं त्रिभिर्वर्षैस्तत्रैका विधवा भवेत्॥१७॥

एकस्मिन्वत्सरे चैव वासरे मण्डपे तथा।
कर्तव्यं मङ्गलं स्वस्त्रोर्भ्रात्रोर्यमलजातयोः॥१८॥

नान्नमद्यादेकवासा न नग्नः स्नानमाचरेत्।
न मूत्रं पथि कुर्वीत न भस्मनि न गोव्रजे॥१९॥

इक्षुरापः पयोमूलं ताम्बूलं फलमौषधम्।
भक्षयित्वाऽपि कर्त्तव्याः स्नानदानादिकाः क्रियाः॥२०॥

होमदेवार्चनाद्यासु क्रियास्वाचमने तथा।
नैकवस्त्रः प्रवर्तेत द्विजवाचनिके तथा॥२१॥

रजसो दर्शनाद् वध्वाः सर्वमेव परित्यजेत्।
सा वै रजस्वला शीघ्रं रक्षिता स्वगृहे वसेत्॥२२॥

सुतसंस्कारकर्माणि पिता कुर्यात् सभार्यकः।
तदभावेऽधिकारी च कुर्यादेव स चापि हि॥२३॥

संस्कार्यस्य च वै यस्य यदि माता विपद्यते।
पत्नीं विनेति नियमः सद्भिश्चैवात्र नोच्यते॥२४॥

संस्कार्यः पुरुषो वा स्त्री वा दक्षिणतो भवेत्।
संस्कारकस्तु सर्वत्र तिष्ठेदुत्तरतः सदा॥२५॥

धर्मकार्येषु सर्वेषु व्रतोद्यापनशान्तिषु।
वामे स्त्री दक्षिणे कर्त्ता स्थालीपाके तथैव च॥२६॥

मार्जने चाभिषेके च कन्या पुत्रविवाहके।
आशीर्वचनकाले च पत्नी स्यादुत्तरे सदा॥२७॥

आरभ्याधानकं कर्म यावन्मौञ्जीनिबन्धनम्।
कर्त्तास्यादुत्तरे तावत् पत्नी पुत्रस्य दक्षिणे॥२८॥

विच्छिन्नवह्निसन्धाने कन्यादाने वरार्चने।
नवोढाप्रवेशे पत्नी दक्षिणे स्वयमुत्तरे॥२९॥

पत्नीं विना न तत्कुर्यात्संस्कारं कर्म यच्छिशोः।
पत्न्यां चैव तु जीवन्त्यां विधिरेष उदाहृतः॥३०॥

यज्ञकाले विवाहे च देवयागे तथैव च।
हूयमाने तथा चाग्नौ नाशौचं नैव सूतकम्॥३१॥

॥ इति संस्कारकर्मसु सामान्यनियमाः॥

अथ गर्भाधानसंस्कारः

अथ प्रथम[१] रजोदर्शने जाते भर्ता प्रातरभ्यङ्गपूर्वकं स्नानं कृत्वा अहते धौते वाससी परिधाय वधूञ्च सर्वौषधिसप्तमृत्तिकापञ्चत्वक्पञ्चपल्लव-सहितकलशोदकेन स्नापयित्वा नूतनवस्त्रं परिधाप्य माला- भरणैश्चालङ्कृत्य प्राङ्मुखः शुभासने समुपविश्य पत्नीञ्चोपवेश्य यथाकुलाचारं पतिपुत्राद्य-

१. गर्भाधानपुंसवनसीमन्तोन्नयनसंस्काराः क्षेत्रसंस्कारा अभिधीयन्ते, तस्मात् प्रथमे गर्भे एव संस्कारो विधातव्यो यथोक्तं देवलेन-
सकृच्च संस्कृता नारी सर्वगर्भेषु संस्कृता।
यं यं गर्भं प्रसूयेत स सर्वः संस्कृतो भवेत्॥ (देवलः)

विच्छिन्नसन्तानोपेताभिः कुलवृद्धवनिताभिः नीराजनपूर्वकं नारिकेलादिनाना-फलप्रक्षेपणं तदुत्सङ्गे विधिवद् विधायाथाचम्य प्राणानाऽऽयम्य देशकालौ सङ्कीर्त्य, अस्याः ममभार्य्यायाः प्रथमगर्भातिशयद्वारा **अस्यां जनिष्यमाण-सर्वगर्भाणां बीजगर्भसमुद्भवैनो निबर्हणार्थं श्रीपरमेश्वरप्रीतये गर्भाधानं**[१] **संस्कारं तदङ्गविहितगणेशाम्बिकापूजनमातृकापूजनस्वस्तिपुण्याह-वाचननान्दीश्राद्धानि च करिष्ये,** इति सङ्कल्प्य सविधि च तत्सर्वं यथांशक्त्यावाहितदेवेभ्य आहुतीश्च दत्त्वा, **आदित्यं गर्भ**मितिमन्त्रेणा-दित्यमवलोकयेत् **ॐ आदित्यङ्गर्भम्पसा समङ्ग्धिसहस्रस्य प्रतिमां विश्वरूपम्। परिवृङ्ग्धिहरसामाभिमꣳस्थाः शतायुषङ्कृणुहि चीयमानाः।** पूर्वोक्तेन मन्त्रेण दम्पतिभ्यां सूर्यावलोकनं नमस्कारश्च कार्यः। ततः सायं कालीनं नित्यकर्म कृत्वोभौ दम्पती शुक्लाम्बरधारणानुलेपनमाल्याभरणालङ्कृतौ सदीपे[२] शयनागारे सुखशय्यामञ्चकमारुह्य [३]सुमुहूर्त्ते स्त्रियमुत्तानां प्राक्शिरसं शयितां कृत्वा भर्ता तस्याः नाभिदेशे हस्तं दत्त्वा, अभिमृश्य जपेत्॥ **ॐ पूषा भग ꣳ सविता मे ददातु रुद्रः कल्पयतु ललाम ꣳ विष्णु-र्योनिङ्कल्पयतु त्वष्टा रूपाणि पिꣳशतु। आसिञ्चतु प्रजापतिर्धाता गर्भं दधातु ते॥ गर्भंधेहि सिनीवालि गर्भंधेहि पृथुष्टुके॥ गर्भं ते ग्रश्विनौ देवावाधत्तां पुष्करस्त्रजौ॥ तेजो वैश्वानरो दद्यादथ ब्रह्मानुमन्त्रयते॥ ब्रह्मा गर्भं दधातु ते॥** ग्रथाभिगमनकाले पठनीयमन्त्रः॥ **ॐ गायत्रेणत्वाच्छन्दसा मन्थामि त्रैष्टुभेनत्त्वाच्छन्दसा मन्थामि जागतेन**

---

१. ऋतुः स्वाभविकः स्त्रीणां रात्रयः षोडश स्मृताः।
चतुर्भिरितरैः सार्धमहोभिः सद्भिगर्हितैः॥
तासामाद्याश्चतस्त्रस्तु निन्दितैकादशी च या।
त्रयोदशी च शेषास्तु प्रशस्ता दशरात्रयः॥
युग्मासु पुत्रा जायन्ते स्त्रियोऽयुग्मासु रात्रिषु।
तस्माद् युग्मासु पुत्रार्थी संविशेदार्तवे स्त्रियम्॥ (मनुः)

२. उभावप्यशुची स्यातां दम्पती शयनं गतौ।
शयनादुत्थिता नारी शुचिः स्यादशुचिः पुमान्॥ (वृद्धशातातपः)

३. उत्सवेषु च सर्वेषु सीमन्ते ऋतुजन्मसु।
सुरासुरगुरोश्चैव मौढ्यदोषो न विद्यते॥ (भृगुः)

त्वाच्छन्दसा मन्थामि॥ रेतो मूत्रं विजहाति योनिम्प्रविशदिन्द्रियम्॥ गर्भोजरायुणावृत उल्बञ्जहाति जन्मना॥ ऋतेन सत्यमिन्द्रियं विपान ँ शुक्रमन्धस इन्द्रस्येन्द्रियमिदं पयोऽमृतं मधु॥ अभिगमनोत्तरं च तस्याः दक्षिणस्कन्धस्योपरि हस्तं नीत्वा तेन हृदयमालभेत। **ॐ यत्ते सुसीमे हृदयं दिवि चन्द्रमसिश्रितम्। वेदाहं तन्मां तद्विद्यात् पश्येम शरदः शतं जीवेम शरदः शत ँ शृणुयाम शरदः शतम्॥** ततो कृतस्य कर्मणः साङ्गतासिद्ध्यर्थं यथाशक्ति ब्राह्मणान् बन्धुजनाँश्च भोजयेत्। ब्राह्मणेभ्यो दक्षिणां दत्त्वा तेषामाशिषो गृहीत्वा च, **यान्तु मातृगणाः सर्वे॰** इति मातृणां विसर्जनं कर्त्तव्यम्॥

॥ इति गर्भाधान- संस्कारः ॥

अथ पुंसवन[१] संस्कारः

सुस्नातौ शुद्धवाससावृतौ दम्पती शुभे, पवित्रासने सुखमुपविश्य लोकाचारानुरूपं कुलवृद्धसुवासिनीभिः कृतनीराजनौ प्रजापतिंध्यायताम्। ततो भर्ताऽऽचमनं विधाय प्राणानायम्य देशकालकीर्तनान्ते, **अस्याः मम भार्य्याया उत्पत्स्यमानगर्भस्य बैजिकगार्भिकदोषपरिहारार्थं पूंरू[२]पताज्ञानोदय-प्रतिरोधपरिहारद्वारा श्रीपरमेश्वरप्रीत्यर्थं पुंसवनं करिष्ये, तत्र निर्विघ्नतार्थं गणपतिपूजनं, स्वस्तिपुण्याहवाचनमातृपूजनवसोर्द्धाराऽऽयुष्यमन्त्रज-पनान्दीश्राद्धञ्च करिष्ये**-इति सङ्कल्प्य यथाविधि तन्निखिलं कर्म जातम् अनुष्ठाय यथाशक्ति चावहितेभ्यो देवेभ्य आहुतीर्दत्त्वा प्रजापतिः प्रीयतामिति वदेत्। ततस्तां गर्भिणीमहन्युपवास्य रात्रौ वटवृक्षावरोहाङ्कुरान् कुशकण्टकं

---

१. गर्भाधानमृतौ पुंसः सवनं स्पन्दनात्पुरा॥ (याज्ञवक्ल्यः)

२. हस्तो मूलः श्रवणः पुनर्वसुर्मृगशिरास्तथा पुष्यः॥
पुंसञ्ज्ञकेषु कार्येष्वेतानि शुभानि धिष्ण्यानि॥
यदहः पुंसा नक्षत्रेण चन्द्रः संयुक्तो भवेत्तदा कार्यं पुंसवनम्।
नारदेन रोहिणीपूर्वाभाद्रपदोत्तराभाद्रपदनक्षत्राणि वसिष्ठेन च
स्वात्यनुराधाऽश्विनीनक्षत्राणि पुंसवनसंस्कारयोग्यानि कथितानि।

सोमलताखण्डं ब्राह्मीखण्डं वा सर्वमुदकेन पिष्ट्वा पेषितोदकं वस्त्रगालितं कृत्वा भर्ता[१] गर्भिणीदक्षिणनासि-कायामासिञ्चेत्। तत्र मन्त्रौ पठेत्-**ॐ हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेक आसीद्। स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम॥१॥ अद्भ्यः सम्भृतः पृथिव्यैरसाच्च विश्वकर्मणः समवर्तताग्रे। तस्य त्वष्टाविदधद्रूपमेति तन्मर्त्यस्य देवत्वमाजानमग्रे।** स यदि कामयेत वीर्य्यवान् स्याद् गर्भस्तर्ह्येतस्याः स्त्रिया अङ्के उदकपूर्णं शरावं निधाय भर्ता गर्भिण्या उदरं अनामिकाग्रेण स्पृशन् गर्भमभिमन्त्रयेत्।

ॐ सुपर्णोऽसि गरुमांस्त्रिवृत्ते शिरो गायत्रञ्चक्षुर्बृहद्रथन्तरे पक्षौ॥ स्तोम आत्माच्छन्दा ᳪस्यङ्गानि यजूᳪषि नाम॥ साम ते तनूर्व्वामदेव्यं यज्ञा यज्ञियं पुच्छन्धिष्ण्याः शफाः॥ सुपर्णोऽसि गरुन्मान् दिवङ्गच्छत स्वः पत। तत्पश्चात् कृतस्य च कर्मणः साङ्गतासिद्धये स्मृत्युक्तान् दशसङ्ख्याकान् ब्राह्मणान् भोजयित्वा तेभ्यश्चाशिषो गृहीत्वा **यान्तु मातृगणाः सर्वे**ऽइति मातॄणां विसर्जनं कुर्यात्।

॥ इति पुंसवन[२] संस्कारविधिः ॥

---

१. वपनं मैथुनं तीर्थं वर्जयेद् गुर्विणीपतिः।
श्राद्धं च सप्तमान्मासादूर्ध्वं चान्यच्च वेदवित्॥ (आश्वलायनः)
दहनं वपनं चैव चौलं वै गिरिरोहणम्।
नाव आरोहणं चैव वर्जयेद् गुर्विणीपतिः॥ (गालवः)
प्रव्यक्तगर्भापतिरब्धियानं मृतस्य वाहं क्षुरकर्मसङ्गम्॥
तस्यां तु यत्नेन गयादितीर्थं यागादिकं वास्तुविधिं न कुर्यात्॥
सिन्धुस्नानं द्रुमच्छेदं वपनं प्रेतवाहनम्।
विदेशगमनं चैव न कुर्याद् गर्भिणीपतिः॥

२. द्वितीये वा तृतीये वा मासि पुंसवनं भवेत्।
व्यक्ते गर्भेऽथवा कार्यं सीमन्तेन सहाऽथवा॥ (जातुकर्ण्यः)
भूम्यां चैवाच्चनीचायामारोहश्चावरोहणम्। नदीप्रतरणं चैव शकटारोहणं तथा॥
उग्रौषधं तथा क्षारं मैथुनं भारवाहनम्। कृते पुंसवने चैव गर्भिणी परिवर्जयेत्॥

अथ सीमन्तोन्नयन[१] संस्कारः

कृतनित्यक्रियः शुभे[२] मुहूर्ते पत्न्या सह मङ्गलस्नापितोऽहतवासोयुगलालङ्कृतो सपत्नीको वहिः शालायां शुभासने- उपविश्याचम्य प्राणानायम्य देशकालकीर्तनान्ते- **अस्या मम भार्य्यायाः[३] गर्भावयवेभ्यस्तेजोवृद्ध्यर्थं क्षेत्रगर्भयोः संस्कारार्थं प्रतिगर्भसमुद्भवपापनिर्वहणेन बीजकोत्पत्यतिशयद्वारा श्रीपरमेश्वरप्रीत्यर्थं सीमन्तोन्नयनाख्यं संस्कारकर्म करिष्ये, तत्र निर्विघ्नार्थं गणपतिपूजनं स्वस्तिपुण्याहवाचनं गणेशपूजनं मण्डपस्थापनं मातृकापूजनं वसोर्धारमायुष्यमन्त्रजपं नान्दीमुखश्राद्धं च करिष्ये**, इति सङ्कल्प्य विधिवत्तत्सर्वं च कर्म सम्पाद्य तत्र वहिः शालायां स्थण्डिले पञ्चभूसंस्कारं कृत्वा मङ्गलनामाग्नेः स्थापनं कुर्यात्। ततो दक्षिणवतो ब्रह्मासनादिआज्यतण्डुलतिलमुद्गानामासादनम्। अनन्तरमुपकल्पनीयानि वस्तूनि यथा मृदुपीठम्। युग्मान्यौदुम्बरफलान्यपक्वानिएकस्तबकनिबद्धानि। त्रयोदशपरिमाणकास्त्रयो- दर्भपिञ्जूलाः त्र्येणी शलली। त्रिस्थानेकर्बुरा शल्यस्य भाषायां सेही इति शाही वा नाम्नः पशोर्लोम, वीरतरशंकुर्लोके गांडर इति ख्यातस्य तृणस्य कीलम्। सूत्रपूर्णं लोहकीलकम् सूत्रकर्तकसाधन-

---

१. सीमन्तोन्नयनं कर्म तत्स्त्रीसंस्कार इष्यते।
केचिद्गर्भस्य संस्काराद् गर्भंगर्भं प्रयुज्यते॥ (स्मृतिचन्द्रिका)
सकृत्संस्कृतसंस्काराः सीमन्तेन द्विजस्त्रियः।
यं यं गर्भं प्रसूयन्ते स सर्वः संस्कृतो भवेत्॥ (हारीतः)

२. सीमन्तोन्नयनं कार्यं शुभांशे शुभलग्नके।
कुलीरमृगकन्याश्च वर्ज्याः शेषाश्च शोभनाः॥ (गर्गः)

३. गर्भिणी कुञ्जराश्वादिशैलहर्म्यादिरोहणम्।
व्यायामं शीघ्रगमनं शकटारोहणं त्यजेत्॥
शोकं रक्तविमोक्षं च साध्वसं कुक्कुटासनम्।
व्यवसायं दिवास्वापं रात्रौ जागरणं त्यजेत्॥
अतिक्षारं तु नाश्नीयादत्यम्लमतिभूरि च।
अत्युष्णमतिशीतं च गुर्वाहारं परित्यजेत्॥
यस्तु तस्या भवेत्पुत्रः स्थिरायुर्वृद्धिसंयुतः।
अन्यथा गर्भपतनं सा चाप्नोति न संशयः॥ (मत्स्यपुराणे)

मित्यर्थः वीणागाथिनौ (वीणावादनपुरस्सरं तेजस्विनां राज्ञां नलादीनां कीर्तिगानरतौ द्वौ गायकौ च समुपवेश्य) ततः पवित्रच्छेदनादि पर्युक्षणान्तं कर्म कृत्वा चरुमधिश्रयेत्। अर्द्धश्रितेषु मुद्‌गेषु तिलमिश्रित- तण्डुलान् क्षिपेत्। एवं चरुं श्रपयित्वा चरुमाज्यञ्चोद्वास्य तत आहुतीर्जुहुयात्। **ॐ अस्मिन् सीमन्तहोमकर्मणि आज्येन आधाराज्यभागदेवताभ्यः तिलमिश्रित-मुद्ग स्थालीपाकेन प्रजापतिं स्विष्टकृतं, तथाज्येन भूरादिनवाहुतीर्यक्ष्ये,** इति सङ्कल्पं कृत्वा मङ्गलनामानमग्निं प्रतिष्ठाप्य **ॐ मङ्गलपावकाय नमः इति पाद्यादिभिः सम्पूज्य, आधारावाज्यभागौ स्रुवेण जुहुयात्, ॐ प्रजापतये स्वाहा, इदं प्रजापतये।** इति मनसा। **ॐ इन्द्राय स्वाहा, इदमिन्द्राय। ॐ अग्नये स्वाहा, इदमग्नये॥ ॐ सोमाय स्वाहा, इदं सोमाय।** ततश्चरुं घृतेनाभिधार्य स्रुवेण जुहुयात्। **ॐ प्रजापतये स्वाहा, इदं प्रजापतये। ॐ अग्नये स्विष्टकृते स्वाहा, इदमग्नये स्विष्टकृते।** ततो भूराद्या नवाहुतयो देयाः। **ॐ भूः स्वाहा, इदमग्नये॥१॥ ॐ भुवः स्वाहा, इदं वायवे॥२॥ ॐ स्वः स्वाहा, इदं सूर्याय॥३॥ ॐ त्वन्नोऽअग्ने वरुणस्य विद्वान् देवस्य हेडोऽअव यासि सीष्ठाः॥ यजिष्ठो वह्नितमः शोशुचानो विश्वा द्वेषाꣳसि प्रमुमुग्ध्यस्मत् स्वाहा॥४॥ इदमग्नीवरुणाभ्यां न मम। ॐ सत्वन्नोऽअग्नेऽव्वमो भवोतीनेदिष्ठोऽ-अस्याऽउषसो व्युष्टौ॥ अवयक्ष्व नो व्वरुणꣳरराणो व्वीहि मृडीकꣳसुहवो न एधि स्वाहा॥५॥ इदमग्नीवरुणाभ्यां न मम। ॐ अयाश्चाग्नेस्यनभिशस्ति पाश्च सत्य- मित्वमयाऽअसि॥ अयानो यज्ञं वहास्ययानो धेहि भेषजꣳस्वाहा॥६॥ इदंमरुद्‌भ्यो न मम। ॐ ये ते शतं वरुण ये सहस्रं यज्ञियाः पाशा वितता महान्तः। तेभिर्नोऽद्य सवितोत- विष्णुर्विश्वे मुञ्चन्तु मरुतः स्वर्क्काः स्वाहा॥७॥ इदं वरुणाय सवित्रे विष्णवे विश्वेभ्यो देवेभ्यो मरुद्‌भ्यः स्वर्केभ्यश्च न मम।**

ॐ उदुत्तमं वरुण पाशमस्मदवाधमं व्विमद्धमꣳश्रथाय। अथाव्वयमादित्यव्रते तवानागसोऽदितये स्याम स्वाहा॥८॥ इदं वरुणायाऽदितये च न मम। ॐ प्रजापतये स्वाहा इति मनसा इदं प्रजापतये न मम। इति नवाहुतीर्हुत्वा ततः संस्रवप्राशनादिप्रणीताविमोकान्तं

होमशेषं समापयेत्। ततः पश्चादग्नेर्भद्रपीठे मृद्वासनं संस्थाप्य तदुपरि [1]गर्भिणीमुपवेशयेत्। ततो भर्तुर्वामभागे उपविष्टायाः गर्भिण्याः सीमन्तकेशं भर्ता, अपक्वौदुम्बरफलयुग्मेन, एकगुच्छेन, त्रिभिर्वेण्याकृतिदर्भपिञ्जूलैः, त्र्येण्या शलल्या, वीरतरशङ्कुना, सूत्रपूर्णलोहकीलेन चेत्येतैः सर्वैः पुञ्जीकृतैः सीमन्तं मूर्ध्निविनयेत्, ललाटान्तरमारभ्य केशान् द्विधा कुर्यात्। ततो विनयने मन्त्रपाठः करणीयः **ॐ भूर्विनयामि॥ ॐ भुवर्विनयामि॥ ॐ स्वर्विनयामि॥** तत औदुम्बरादिपञ्चकस्य वेण्यां बन्धनम्। तत्र मन्त्रः पठनीयः। **ॐ अयमूर्जावतो वृक्ष ऊर्जीव फलिनी भव**, इति पठित्वा बध्नीयात्। ततो वीणागाथिनौ राजवर्णनसम्बन्धि अथवा नलादिसम्बन्धिगानं कुरुताम्। तत इमं मन्त्रं पठेत्। **ॐ सोम एव नो राजेमाः मानुषीः प्रजाः। अवियुक्तचक्र आसीत्तत्ते तुभ्यमसौ** इति। ततो [2]गर्भिणीसमीपे गङ्गादिनदीनां नाम गृह्णीयात्। अथवा गर्भवती स्वयमेव, गङ्गा, यमुना, सरस्वतीत्येवमादिप्रथमानां नाम गृह्णीयात्। ततो दक्षिणा-दानसङ्कल्पः कार्यः। **अद्येहामुकोऽहं अस्याः मम भार्य्यायाः सीमन्तोन्नयनकर्मणः साद्गुण्यार्थं इमां दक्षिणां भोजनं च ब्राह्मणेभ्यो विभज्य सम्प्रददे** इति दक्षिणाभोजनंदत्त्वाऽभिषेक-तिलकरक्षाबन्धनघृतच्छायात्र्यायुष्यमन्त्रपाठादिकं च कारयेत्। इति **सीमन्तोन्नयन[3]संस्कारविधिः।।**

---

१. गर्भिणीवाञ्छितं द्रव्यं तस्यै दद्याद् यथोचितम्।
सूते चिरायुषं पुत्रमन्यथा दोषमर्हति॥ (प्रयोगपरिजाते)

२. अङ्गारभस्मास्थिकपालचुल्ली शूर्पादिकेषूपविशेन्न नारी।
सोलूखलाद्ये दृषदादिके वा यन्त्रे तुषाद्ये न तथोपविष्टा॥
नो मार्जनी गोमयपिण्डकादौ मूत्रं पुरीषं शयनं च कुर्यात्।
नो मुक्तकेशी विवशाऽथवा स्याद् भुङ्क्ते न सन्ध्यावसरे न शेते॥
नामङ्गलं वाक्यमुदीरयेत् सा शून्यालयं वृक्षतलं न यायात्॥ (गदाधरपद्धति)

३. स्त्री यदाऽकृतसीमन्ता प्रसूयेत कदाचन।
गृहीतपुत्रा विधिवत् पुनः संस्कारमर्हति॥
गर्भलम्भनमारभ्य यावन्न प्रसवस्तथा।
सीमन्तोन्नयनं कुर्याच्छङ्खस्य वचनं यथा॥

अथ जात[१]कर्ममेधाजननसंस्कारः

पुत्रे जाते पिता शीघ्रं सचैलं स्नानं कृत्वा तत्र सङ्कल्पं कुर्यात् - **अद्येहामुकोऽहं पुत्रजनननिमित्तकं सचैलं**[२] **स्नानं करिष्ये** इति सङ्कल्प्य स्नात्वा शुभे नवे धौते वाससी परिधायाचम्य प्राङ्मुख उपविश्याचम्य नालच्छेदनात्पूर्वं पूजासामग्रीं सम्पाद्य, **अद्येहामुकोऽहं जातस्य पुत्रस्य दीर्घायुरारोग्यावाप्तये करिष्यमाणजातकर्मकर्मणि निर्विघ्नताकार्यसिद्धये पूर्वाङ्गत्वेन श्रीगणेशपूजनं करिष्ये** इति सङ्कल्प्य यथाविधि गणेशं पूजयित्वा प्रधानसङ्कल्पं कुर्यात्। देशकालौ सङ्कीर्त्य, **अमुकोऽहं, अस्य कुमारस्य गर्भाम्बुपान**[३] **जनितसकलदोषनिवर्हणायुर्मेधाभिवृद्धये बीजगर्भ-समुद्भवेनोनिवर्हणद्वारा श्रीपरमेश्वरप्रीत्यर्थं जातकर्माख्यं संस्कारं करिष्ये तदङ्गत्वेन च गौर्यादिषोडशमातृपूजन, वसोर्धारा, नवग्रहपूजन-पुण्याहवाचनपूर्वकमाभ्युदयिकश्राद्धञ्च**[४] **करिष्ये** इति सङ्कल्प्य सर्वं च कर्मजातं यथाविधि सम्पाद्य पुत्रस्य मेधाजननकर्म कुर्यात्। तद्यथा सुवर्णादिपात्रे मधुघृते मिश्रिते कृत्वा केवलं घृतं वा सुवर्णान्तर्हितयानामिकयादाय जातं कुमारं सकृत्प्राशयति तत्र मन्त्रः - **ॐ भूस्त्वयि दधामि ॐ भुवस्त्वयि दधामि ॐ स्वस्त्वयि दधामि ॐ भूर्भुवः स्वः सर्वं त्वयि दधामि** इति सकृत्प्राशयेत्। अस्य च प्राशनेन जातस्य शिशोर्मेधाजननम्भवति। ततः आयुष्यकरणं कार्यं तद्यथाजातस्य नाभिसमीपे, दक्षिणकर्णसमीपे वा जपनीयो मन्त्रः **ॐ अग्निरायुष्मान् सवनस्पतिभिरायुष्मान् तेन त्वायुषायुष्मन्तं करोमि॥१॥ ॐ सोम आयुष्मान् स ओषधीभिरायुष्मान्, तेन त्वायुषायुष्मन्तं**

---

१. जातमात्रकुमारस्य जातकर्म विधीयते। स्तनप्राशनतः पूर्वं नाभिकर्तनतोऽपि वा॥(गर्गः)
प्राङ्नाभिवर्धनात्पुंसो जातकर्म विधीयते। मन्त्रवत्प्राशयेदस्य हिरण्यं मधुसर्पिषा॥(मनुः)

२. जाते पुत्रे पितुः स्नानं सचैलं च विधीयते। (संवर्तः)

३. गर्भाम्बुपानदोषाणामपनुत्त्यै शिशुं पिता।
प्राशयेन्मधुना सार्धं साज्यं हैमरसं शुभम्॥ (आश्वलायनः)

४. देवाश्च पितरश्चैव पुत्रे जाते द्विजन्मनाम्।
आयान्ति तस्मात्तदहः पुण्यं पूज्यं च सर्वतः॥ (आदिपुराणे)
पुत्रजन्मनि कुर्वीत श्राद्धं हेम्नैव बुद्धिमान्।
न पक्वेन न चामेन कल्याणान्यभिकामयन्॥ (संवर्तः)

करोमि॥२॥ ॐ ब्रह्मायुष्मन् तद् ब्राह्मणैरायुष्मत्, तेन त्वायुषायुष्मन्तं करोमि॥३॥ ॐ देवाआयुष्मन्तस्तेऽमृतैरायुष्मन्तस्तेन त्वायुषायुष्मन्तं करोमि॥४॥ ॐ ऋषयआयुष्मन्तस्ते व्रतैरायुष्मन्तस्तेन त्वायुषायुष्मन्तं करोमि॥५॥ ॐ पितरआयुष्मन्तस्ते स्वधाभिरायुष्मन्तस्तेन त्वायुषायुष्मन्तं करोमि॥६॥ ॐ यज्ञआयुष्मान् स दक्षिणाभिरायुष्मान् तेन त्वायुषायुष्मन्तं करोमि॥७॥ ॐ समुद्र आयुष्मान् स स्रवन्तीभिरायुष्मान्, तेन त्वायुषायुष्मन्तं करोमि॥८॥ एतावत्पर्यन्तमग्निरायुष्मानित्यारभ्य त्रिर्जपेत्। तथा **ॐ त्र्यायुषञ्जमदग्नेः कश्यपस्य त्र्यायुषम्। यद्देवेषु त्र्यायुषं तन्नोऽअस्तु त्र्यायुषम्।** त्र्यायुषमित्येतमपि मन्त्रं त्रिर्जयेत्। अथ कुमारस्य पूर्वादिचतुर्दिक्षु मध्ये च पञ्च ब्राह्मणान् संस्थापयेत्। चत्वारश्चतुर्दिक्षु पञ्चमो मध्ये नैर्ऋत्ये वा स्थाप्यः। ततः पिता तान् ब्राह्मणान् ब्रूयात् **यद् इममनुप्राणित** इति। ततः पूर्वदिक्स्थितो विप्रः कुमारसम्मुखं तिष्ठन् तं लक्ष्यीकृत्य **प्राण** इति तारस्वरं ब्रूयात्। दक्षिणादिक्स्थितोऽपि तथा तिष्ठन् **व्यान** इति तथा ब्रूयात्। पश्चिमदिक्स्थितोऽपि तथैव, **अपान** इति ब्रूयात्। उत्तरदिक् स्थितः **उदान** इति ब्रूयात्। मध्यमस्तूपरिष्टादवेक्षमाणः **समान** इति ब्रूयात्। पञ्चब्राह्मणाभावे स्वयमेव तत्र तत्र मत्वा कुमाराभिमुखः **प्राणः** इत्यादि ब्रूयात्। यस्मिन् सूतिकागारे कुमारो जातस्तत्स्थानमभिमन्त्रयेत अनामिकया। तत्र मन्त्रः **ॐ वेद ते भूमिर्हृद्यमित्यस्य पङ्क्तिश्छन्दः पृथिवीदेवता जन्मभूम्यभिमन्त्रणे विनियोगः। ॐ वेद ते भूमिर्हृदयं दिवि चन्द्रमसि श्रितम्॥ वेदाहं तन्मां तद् विद्यात् पश्येम शरदः शतञ्जीवेम शरदः शतꣳशृणुयाम शरदः शतम्।** अथ पितैनं कुमारमभिमृशति॥ **ॐ अश्मा भव परशुर्भव हिरण्यममृतं भव॥ आत्मा वै पुत्रनामासि सञ्जीव शरदः शतम्॥** अथास्य मातरमभिमन्त्रयते॥ **ॐ इडासि मैत्रावरुणी वीरे वीरमजीजनथाः॥ सा त्वं वीरवती भव यास्मान् वीरवतोऽकरत्॥** इति मन्त्रेण। अथ मातुर्दक्षिणं स्तनं प्रक्षाल्य कुमाराय प्रयच्छति पिता। तत्र मन्त्रः। **ॐ इमꣳस्तनमूर्जस्वन्तमिति परमेष्ठी ऋषिस्त्रिष्टुप् छन्दोऽग्निर्देवता स्तनदाने विनियोगः॥ ॐ इमꣳस्तनमूर्जस्वन्तं धयापां प्रपीनमग्ने सरिरस्य मध्ये। उत्सञ्जुषस्व मधुमन्तमर्वन् समुद्रिय ꣳसदनमाविशस्व** इति। ततो वामं

स्तनं प्रक्षाल्य प्रयच्छति। ॐ **यस्ते स्तन इति दीर्घतमा ऋषि स्त्रिष्टुप् छन्दः गौर्देवता स्तनप्रदाने विनियोगः॥ ॐ यस्ते स्तनः शशयो योमयोभूर्य्यो रत्नधा वसुविद्यः सुदत्रः॥ येन विश्वा पुष्यसि वार्य्याणि सरस्वति तमिह धातवेऽकः॥ उर्वन्तरिक्षमन्वेमि॥** इति। अथ कुमारस्य शिरः प्रदेशे जलपूर्णकुम्भं दशदिनपर्यन्तं विदधाति। ॐ **आपो देवेष्वित्यस्य प्रजापतिर्ऋषिरनुष्टुप्छन्द आपो देवता सूतिकायाः**[१] **शिरप्रदेशे रक्षार्थोदककुम्भस्थापने विनियोगः। ॐ आपो देवेषु जाग्रथ यथा देवेषु जाग्रथ एवमस्याꣳसूतिकाया ꣳसपुत्रिकायां जाग्रथ** इति। ततः सूतिकाद्वारदेशे वेदीं कृत्वा सूतिकाग्निमुपसमाधाय पञ्चभूसंस्कारपूर्वकमग्निं संस्थाप्य अत्र पञ्चभूसंस्कारमेव विधाय प्रणीताप्रणयनादिकमकृत्वा ॐ **भूर्भुवः स्वरिति** प्रगल्भनामाग्निमावाह्य ॐ **अग्नये नमः** इति पाद्यादिभिः सम्पूज्य होमं कुर्यात्। तण्डुल- फलिकाणतुषमिश्रान् सर्षपान् गृहीत्वा ॐ **शण्डामर्केति प्रजापतिर्ऋषिरनुष्टुप् छन्दोऽग्निर्देवता सूतिकाद्वाराग्नौ तण्डुलफलिकातुषमिश्रसर्षपहोमेविनियोगः। ॐ शण्डामर्का उपवीरः शौण्डिकेयऽउलूखलः। मलिम्लुचो द्रोणासश्च्यवनो नश्यतादितः स्वाहा। इदं शंडामर्काय उपवीराय शौण्डिकेयाय उलूखलाय मलिम्लुचा द्रोणासश्च्यवनोनश्यतादितेभ्यश्च न मम॥१॥**

ॐ **आलिखन्नेति प्रजापतिर्ऋषिरनुष्टुप् छन्दोऽग्निर्देवता सूतिकाग्नौ तण्डुलफलिकाकणतुषमिश्रसर्षपहोमे विनियोगः॥ ॐ आलिखन्न निमिषः किं वदन्त उपश्रुतिः॥ हर्य्यक्षः कुम्भीशत्रुः पात्रपाणिर्नृमणिर्हंत्रीमुखः सर्षपारुणश्च्यवनो नश्यतादितः स्वाहा। इदमालिखन्न निमिषाय किंवद्धय उपश्रुतये हर्यक्षाय कुम्भीशत्रवे पात्रपाणये नृमणये हंत्रीमुखाय सर्षपारुणाय च्यवनाय च न मम॥** इत्याहुतिद्वयं जुहुयात्। अस्मिन् होमे कुशकण्डिका न करणीया। एषोऽग्निर्दशदिनावधि यथा न निर्वापितो भवेत्तथा प्रयतनीयम्। उत्थापनञ्च दशमदिन एव कार्यम्। एता आहुतयो दशदिन-पर्य्यन्तं प्रत्यहं सायं प्रातराहुतिद्वयेन

---

१. यावन्न छिद्यते नालं तावन्नाप्नोति सूतकम्।
छिन्ने नाले ततः पश्चात् सूतकं च विधीयते॥ (जैमिनिः)

चत्वारिंशत्सङ्ख्याका भवन्ति। ततो दक्षिणासङ्कल्पं कुर्यात्। **अद्येहामुकोऽहं जातस्य पुत्रस्य कृतैतज्जातकर्मकर्मणः साङ्गताप्त्यै साद्गुण्यार्थञ्चेमां दक्षिणां नानानामगोत्रेभ्यो ब्राह्मणेभ्यो विभज्य दास्ये ॐ तत्सन्न मम।** ततो भूयसीं दक्षिणां सङ्कल्प्य ब्राह्मणेभ्यो दद्यात्। **''प्रथमेऽह्नि तथा षष्ठे दाता नाप्नोति सूतकम्''** इति वचनात्तत्र दानप्रतिग्रहौ न दोषायेति ज्ञेयम् ततोऽष्टाङ्गुलं परित्यज्य नालच्छेदनं कुर्यात्। अभिषेक- तिलकमन्त्रपाठादि विधाय समापयेत्। **इति जातकर्मसंस्कारः॥**

अथ षष्ठीकर्मविधिः

जन्मदिनतः षष्ठे दिने पिता प्रातरुत्थाय शुचिं श्रौतस्मार्तक्रियापरं सपत्नीकं ब्राह्मणं विनयेनोपसृत्य, **अद्य षष्ठीमहोत्सवार्थं युवामहं निमन्त्रये,** इति तावुक्त्वा तथास्त्विवति ताभ्यामुक्तः स्वगृहमागच्छेत् तौ चोपोषितौ तिष्ठेताम्। तयोर्हस्तेन षष्ठीमहोत्सवं कारयेत्। दक्षिणादानाशक्तौ स्वयं कार्यः। ततोऽपराह्णसमये ब्राह्मणो गोमयमृत्तिकाभिः काष्ठपीठे स्कन्दप्रद्युम्नयोर्मध्ये षष्ठीदेव्याः प्रतिमां विधाय शुक्लतण्डुलैर्यवैर्वा पूरयित्वा षष्ठ्याः कर्णप्रदेशे दूर्वापल्लवैः कुण्डले सर्वाङ्गेषु षोडश कपर्दिका दद्यात्। ततः प्रदोषसमये पिता स्नात्वा सन्ध्यादि विधाय पूजासामग्रीं सम्पाद्य द्वारसमीपमागत्य द्वारमातृ-पूजनं कुर्यात्, आचम्य, अर्घ्यं संस्थाप्य, पूजासङ्कल्पं कुर्यात्। **अद्येहामुकराशिरमुकोऽहं, अमुकराशेर्बालकस्य करिष्यमाणषष्ठी-महोत्सवकर्मणि पूर्वाङ्गत्वेन द्वारमातृणां पूजनं करिष्ये।** इति प्रतिष्ठाप्य, **ॐ भूर्भुवः स्वः द्वारमातरः सुप्रतिष्ठिता वरदा भवन्तु। ततो ध्यानं कुर्यात् कुमारी धनदा नन्दा विपुला मङ्गलाचला। पद्मा चैव तु नामोक्ताः सप्तैता द्वारमातरः।** इति ध्यात्वा **ॐ कुमार्य्यै नमः ॐ धनदायै नमः ॐ नन्दायै नमः ॐ विपुलायै नमः ॐ मङ्गलायै नमः ॐ अचलायै नमः ॐ पद्मायै नमः** इति नाममन्त्रैरावाहनासन-पाद्यादिनीराजनान्तं सम्पूज्य दक्षिणां दत्त्वा स्वस्तिवाचनं पठेत्। ततोऽभ्यन्तरं गच्छेत् तत्र प्रथमं गव्यघृतसर्षप सैन्धवनिम्बपत्राहित्वग्भिः सूतिकासमीपे धूपो देयः। ततो गणेशं पूजयेत्। आचम्य, अर्घ्यं संस्थाप्य पूजासङ्कल्पः कार्यः-

अद्येहेत्यादि देशकालौ स्मृत्वा, **अमुकराशिरमुकशर्माहं जातस्य पुत्रस्य करिष्यमाणषष्ठीमहोत्सवकर्मणि पूर्वाङ्गत्वेन निर्विघ्नतासिद्धये भगवतो गणेशस्य पूजनं करिष्ये**-इति सङ्कल्प्य पूर्वोक्तप्रकारेण गणेशं सम्पूज्य दक्षिणां दत्त्वा प्रार्थयेत।

विघ्नराज नमस्तुभ्यं सर्वोपद्रवनाशन।
त्वत्प्रसादादविघ्नेन चिरञ्जीवतु मे सुतः॥

ततः प्रधानसङ्कल्पं कुर्यात्, अद्येहेत्यादि देशकालौ सङ्कीर्त्य **अमुकगोत्रोऽमुकराशिरमुकशर्माहं, अमुकराशेरस्य बालकस्य दीर्घायुरारोग्यावाप्तये सर्वोपद्रवशान्तये श्रीपरमेश्वरप्रीत्यर्थं षष्ठीमहोत्सवकर्म करिष्ये तत्पूर्वाङ्गत्वेन सर्वाभ्युदयप्राप्तये गौर्य्यादिषोडशमातृणां पूजनं करिष्ये** इति सङ्कल्प्य पूर्वोक्तप्रकारेणमातृकाः पूजयित्वा वसोर्द्धाराः पातयित्वा दक्षिणां दद्यात्। ततः पुण्याहवाचनसङ्कल्पः करणीयः **अद्येहामुकोऽहं जातस्य पुत्रस्य षष्ठीमहोत्सवकर्मणि सर्वाभ्युदयप्राप्तये ब्राह्मणद्वारा पुण्याहं वाचयिष्ये तत्पूर्वाङ्गत्वेन च चतुर्णां ब्राह्मणानां पूजनं वरणञ्च करिष्ये** इति सङ्कल्प्य वरणं कृत्वा पूर्वोक्तप्रकारेण पुण्याहं वाचयित्वा कलशं संस्थाप्य तत्र नवग्रहानावाह्य सम्पूज्य दक्षिणां दत्त्वा स्कन्दप्रद्युम्नपूजनं कुर्यात्। अर्घ्यं संस्थाप्य पूजासङ्कल्पः कार्यः, **अद्येहामुकोऽहं जातस्य पुत्रस्यायुरारोग्यावाप्तये सर्वोपद्रवशान्त्यर्थं गोमयप्रतिमासु स्कन्दप्रद्युम्नषष्ठीनां जलं जन्मदानां च षोडशोपचारैः पूजनं करिष्ये**-इति सङ्कल्प्य **एतन्ते॰** इति प्रतिष्ठाप्य **ॐ भूर्भुवः स्वः, गोमयप्रतिमासु स्कन्ददेव। प्रद्युम्नदेव। षष्ठि। देवि, जले जन्मदा देव्यः, इहागच्छत, इह तिष्ठत सुप्रतिष्ठिताः वरदाः भवत।** ततः स्कन्दध्यानं कुर्यात्-

मयूरवरमारूढो द्विभुजो वालरूपधृक्।
मुद्गरं वामहस्ते तु शक्तिं दक्षिणतो न्यसेत्॥
वराभयकरः साक्षाद् द्विभुजः शिखिलाच्छनः।
किरीटी कुण्डली देवो दिव्याभरणभूषितः।

ततः प्रद्युम्नं ध्यायेत्

प्रद्युम्नस्तु महाबाहुः शङ्खचक्रगदाधरः।
चक्रं दक्षिणहस्ते स्याद् वामहस्ते धनुस्तथा॥
शंङ्खं च दक्षिणे दद्याद् गदां वामे प्रदापयेत्।
प्रद्युम्नं कारयेद् देवं सर्वभूषणसंयुतम्॥
स्त्रियौ चैवास्य कर्तव्ये सर्वलक्षणसंयुते।

इति ध्यात्वा ॐ स्कन्दाय नमः इति नाममन्त्रेण पूजनम् ॐ प्रद्युम्नाय नमः इति नाममन्त्रेण पूजनम्। नीराजनं कृत्वा पुष्पाञ्जलिं समर्प्य प्रार्थयेत। तत्र स्कन्दप्रार्थना एवं विधा।

नमः कुमाराय महाप्रभाय स्कन्दाय ते स्कन्दितदानवाय।
नवार्कबिम्बद्युतये नमोऽस्तु नमोऽस्त्वमोघोद्यतशक्तिपाणये॥१॥
नमो विशालाय विचारिणेऽस्तु नमोऽस्तु ते षण्मुखकामरूपिणे।
गुहाय गूढाभरणाय धर्त्रे नमोऽस्तु ते दानवदारणाय॥२॥
नमोऽस्तु तेऽर्कप्रतिमप्रभाय नमोऽस्तु गुह्याय गुहाय तुभ्यम्।
नमोऽस्तु ते लोकभयापहाय नमोऽस्तु ते बालपराक्रमाय॥३॥
नमो विशालायतलोचनाय नमो विशाखाय महाव्रताय।
नमो नमस्तेऽस्तु शिवात्मजाय नमो नमस्तेऽस्तु करोत्कटाय॥४॥
नमो मयूरोज्ज्वलवाहनाय नमो धृतोदग्रपताकिनेऽस्तु।
नमोऽस्तु केयूरधराय तुभ्यं नमः प्रभाय प्रणताय तुभ्यम्॥५॥
सेनानये पावकिने नमोऽस्तु कृपापरीतामलदिव्यमूर्तये।
कृपामयो यज्ञ इवामलस्त्वं नमोऽस्तु षष्ठीश नमो नमस्ते॥६॥

एवं द्वात्रिंशन्नामभिः स्कन्दं सम्प्रार्थ्य, ॐ काण्डात्काण्डात् प्ररोहन्ती परुषः परुषस्परि। एवानो दूर्वे प्रतनु सहस्रेण शतेन च। इति मन्त्रेण स्कन्दोपरि दूर्वां समर्प्य प्रद्युम्नं प्रार्थयेत।

भो प्रद्युम्न महाबाहो लक्ष्मीहृदयनन्दन।
कुमारं रक्ष मे भीतेः प्रद्युम्नाय नमो नमः॥१॥

त्रैलोक्यपूजितः श्रीमान् सदा विजयवर्द्धनः।
शान्तिं कुरु गदापाणे प्रद्युम्नाय नमो नमः॥२॥

इति प्रद्युम्नं सम्प्रार्थ्य षट् कृत्तिकाः पूजयेत्।

तत्र पूजासङ्कल्पः करणीयः। **अद्येहेत्यादि जातस्य पुत्रस्य षष्ठीमहोत्सवे सर्वोपद्रवशान्त्यर्थं दध्यक्षतपुञ्जेषु षट् कृत्तिकानां पूजनं करिष्ये। एतन्ते०** इति प्रतिष्ठाप्य **ॐ भूर्भुवः स्वः शिवे इहागच्छेह तिष्ठ, सुप्रतिष्ठिता वरदा भव। ॐ सम्भूते इहा० ॐ सन्नते इहा० ॐ प्रीते इहा० ॐ अनुसूये इहा० ॐ क्षमे इहा०॥ नाममन्त्रैर्गन्धादिभिः पूजनम्। ॐ शिवायै नमः, ॐ सम्भूत्यै नमः ॐ सन्नत्यै नमः ॐ प्रीत्यै नमः ॐ अनुसूयायै नमः ॐ क्षमायै नमः** इति सम्पूज्य प्रार्थयेत। **जगन्मातर्जगद्धात्रि जगदानन्दकारिणि। नमस्ते देवि कल्याणि प्रसीद मम कृत्तिके॥ ॐ कार्तिकेयाय नमः ॐ, कार्तिकेय महाबाहो गौरीहृदयनन्दन। कुमारं रक्ष मे भीतेः कार्तिकेय नमोऽस्तुते॥** ततो विष्णुं प्रार्थयेत। **त्रैलोक्यपूजितः श्रीमान् सदा विजयवर्द्धनः। शान्तिं कुरु गदापाणे नारायण नमोऽस्तु ते॥ ॐ खड्गाय नमः ॐ शङ्खाय नमः ॐ मन्थनाय नमः ॐ वंशाय नमः** इति सम्पूज्य षष्ठीं पूजयेत्। अर्घ्यं संस्थाप्य प्राणानायम्य पूजासङ्कल्पः कार्यः, **अद्येहामुकराशिरमुकशर्माहं, अमुकराशेर्जातस्य पुत्रस्य दीर्घायुरारोग्यावाप्तये सर्वोपद्रवशान्त्यर्थं गोमयनिर्मितप्रतिमायां षष्ठीपूजनं करिष्ये। एतन्ते०** इति प्रतिष्ठाप्य **ॐ भूर्भुवः स्वः गोमयप्रतिमायां षष्ठीदेवि इहागच्छेह तिष्ठ सुप्रतिष्ठिता वरदा भव ॐ आँ ह्रीं क्रौं यँ रँ लँ वँ शँ षँ सँ हँ क्षँ हंसः सोऽहं षष्ठीदेव्याः प्राण इहागत्य सुखं चिरं तिष्ठन्तु जीव इह तिष्ठतु सर्वेन्द्रियाणीह तिष्ठन्तु** इति प्राणप्रतिष्ठां विधाय आत्मनि देवे च न्यासं कुर्यात् **ॐ खां हृदयाय नमः ॐ खीं शिरसे स्वाहा ॐ खूं शिखायै वषट् ॐ खैं कवचाय हुम् ॐ खौं नेत्रत्रयाय वौषट् ॐ खः अस्त्राय फट्** इति न्यासं विधाय ध्यायेत्। **चतुर्भुजां महादेवीं तुङ्गपीनस्तनीं शिवाम्। मयूरवरमारूढां रक्तवस्त्रधरां शुभाम्। शूलशक्तिवराभीतिहस्तां ध्यायेन्महेश्वरीम्। प्रफुल्लपद्मवदनामर्धपद्मासनस्थिताम्। सर्वाङ्गभूषितां**

देवीं पीनोन्नतपयोधराम्। स्रवत्पीयूषवदनां पीतकौशेयवाससम्। चतुर्भुजां दक्षिणेन धृतमन्थानवंशकाम्। नीलोत्पलं तु वामेन स्कन्दन्तु दधतीं तथा। अधःस्थितकराभ्यां तु महाषष्ठीं विचिन्तयेत्॥ अथावाहनम् आयाहि पूज्यसे देवि महाषष्ठीति विश्रुते। शक्तिरूपेण मे बालं रक्ष जागरवासरे। इत्यावाह्य ॐ अम्बेऽअम्बिकेऽअम्बालिके न मानयति कश्चन। ससस्त्यश्वकः सुभद्रिकां काम्पीलवासिनीम् इति मन्त्रेण नाम मन्त्रेण वा पूजयेत्। ॐ षष्ठीदेव्यै नमः इति नाममन्त्रेण पूजनं विधाय, अष्टौ दीपान् प्रज्वाल्य, नीराजनं कुर्यात्। गव्येनाज्येन संयुक्तान् वर्त्या कर्पूरगर्भया। दीपान् देवि मया दत्तान् गृहाणेमान् नमोऽस्तु ते। ततो द्वारदेशे बटकापूपाष्टकमालायुतमजं कर्णताडनादिना भूतादिविद्रावणाय पुनः पुनः शब्दं कारयेत्। ततो नैवेद्यम्। मोदकानि विचित्राणि शुद्धतण्डुलकं दधि। विचित्रपक्वान्नयुतं तथापूपसमन्वितम्। फेणिकाघृतपूराढ्यं नैवेद्यं प्रतिगृह्यताम्। इति निवेद्य ॐ षष्ठ्यै देव्यै नमः इति मन्त्रेण जपं विधाय नीराजनं कुर्यात्–अन्तस्तेजो बहिस्तेज एकीकृत्यामितप्रभम्। आरार्तिकमिदं देवि गृहाण परमेश्वरि। नमस्कारः। जय देवि जगन्मातर्जगदानन्द-कारिणि। प्रसीदि मम कल्याणि महाषष्ठि नमोऽस्तु ते। ततः पुष्पाणि सङ्गृह्य प्रार्थयेत्– देवानां च ऋषीणां च मनुष्याणां च वत्सले। अमुं मम सुतं रक्ष षष्ठि देवि नमोऽस्तु ते। पुरा देवैः पूजितासि ब्रह्मविष्णुशिवादिभिः। आवाभ्यामपि देवि त्वं पूज्यसे भक्तिपूर्वकम्। देह्यस्य बालकस्यायुर्दीर्घं तुभ्यं नमोऽस्तु ते। ततः बालकस्य पिता षष्ठीदेव्याः पुरः स्थित बद्धाञ्जलिर्भक्तिनम्रो वाक्यमुच्चारयेदिदम्॥ त्वं देवमातादितिरब्धिजा त्वं गौरी त्वमेवासि धृतिः क्षमा त्वम्। कीर्तिः समृद्धिर्भुवनस्य धात्री त्वमेव देवि प्रणतोऽस्मि तुभ्यम्।

यथा सर्वाणि भूतानि त्वयि स्यूतानि रत्नवत्।
चराचराणि भूतानि त्वत्तो जातान्यनेकशः॥
पुमान् साक्षीभवत्येष तेन सत्येन बुद्धिमान्।
स्वस्ति मेऽस्तु गृहे नित्यं त्वत्प्रसादात्सुरेश्वरि।
त्वं सृष्टिराद्या सृजसि प्रजास्त्वं स्थितिस्तथैताः सकला बिभर्षि।

त्वामेव वाङ्मानसकर्मभिस्तु समर्चयाम्यस्तु शिशुश्चिरायुः॥
पुत्रोत्सवमहं नित्यं पश्येयं त्वदनुग्रहात्॥
ततोऽर्भकस्य जननी प्रार्थयेत्तामतन्द्रिता।
तव प्रसादात्तनयस्य वक्त्रं दृष्टं मया देवि नमोऽस्तु तुभ्यम्।
सौभाग्यमारोग्यमभीष्टसिद्धिं देहि प्रजायाश्चिरजीवितं च॥
गौर्या पुत्रो यथा स्कन्दः शिशुः संरक्षितस्त्वया।
तथा ममाप्ययं बालो रक्ष्यतां षष्ठिके त्वया॥
षष्ठि देवि नमस्तुभ्यं सूतिकागृहवासिनि।
पूजितासि मया भक्त्या सबालां रक्ष सूतिकाम्।

पुनः पिता प्रार्थयेत

जननी सर्वभूतानां बालानां च विशेषतः।
नारायणीस्वरूपेण बालं मे रक्ष सर्वतः॥
शक्तिस्त्वं सर्वदेवानां लोकानां हितकारिणी।
मातृवद्रक्ष मे बालं महाषष्ठि नमोऽस्तु ते।
अमुं मम कुलोत्पन्नं रक्ष त्वं देवि बालकम्।
पूजितासि महाभागे चिरं जीवतु मे सुतः॥
धात्री त्वं कार्तिकेयस्य स्त्रीरूपं मदनस्य च।
त्वत्प्रसादादविघ्नेन चिरं जीवतु मे सुतः॥

ततोऽञ्जलिं बद्ध्वा प्रार्थयेत

चन्द्रार्कयोर्दिगीशानां दिशां च गगनस्य च।
निक्षेपार्थं मया दत्तं ते मे रक्षन्तु बालकम्॥
रक्ष त्वं वसुधे देवि सन्ध्ये च जगत् प्रिये।
आयुः प्रमाणं सकलं देहि देवि नमोऽस्तु ते॥
ततोऽथर्ववेदोक्तां रक्षां शिशोः समीपे पठेत्।
कृत्यानां परिरक्षार्थं तथा रक्षोभयस्य च।

रक्षाकर्म करिष्यामि ब्रह्मा तदनुमन्यताम्॥
नागाः पिशाचा गन्धर्वाः पितरो यक्षराक्षसाः।
अभिभवन्ति ये मे त्वां ब्रह्माद्या घ्नन्तु तान् सदा॥
पृथिव्यामन्तरिक्षे च ये चरन्ति निशाचराः।
विदिक्षु दिक्षु ये चान्ते यान्तु त्वां ते नमस्कृताः॥
अग्नी रक्षतु ते जिह्वां प्राणान् रक्षन्तु वायवः।
सोमो व्यानमपानन्तु पर्जन्यः परिरक्षतु॥
उदानं विद्युतः पान्तु समानं स्तनयित्नवः।
बलमित्ते बलं पातु वाचं वाचस्पतिस्तथा॥
कामं ते पान्तु गन्धर्वाः सत्यमिन्द्रोऽभिरक्षतु।
प्रज्ञां च वरुणो राजा समुद्रो नाभिमण्डलम्॥
चक्षुः सूर्यो दिशः श्रोत्रं चन्द्रमाः पातु ते मनः।
रेतस्ते पान्त्विमा आपो रोमाण्योषधयस्तथा॥
आकाशं ते निशा पातु देहं तव वसुन्धरा।
वैश्वानरस्तव शिरः पातु विष्णुः पराक्रमम्॥
पौरुषं पुरुषश्रेष्ठो ब्रह्मा पातु भ्रुवौ तव।
देहं देहविशेषेण तव पातु वसुन्धरा॥
एतैर्वेदात्मकैर्मन्त्रैः कृत्याव्याधिविनाशिभिः।
मयैवं कृतरक्षस्त्वं दीर्घमायुरवाप्नुहि॥

इति रक्षां पठित्वा बालकं कङ्कणादिभिर्विभूष्य स्वाङ्के निधाय सपत्नीकमाचार्यं वस्त्रालङ्कारादिभिः सम्पूज्य भूयसीं दक्षिणां सङ्कल्पयेत्। **अद्येहेत्यादि जातस्य पुत्रस्य दीर्घायुरारोग्याभ्युदयप्राप्तये षष्ठीमहोत्सव-कर्मणि कृतायाः स्कन्दप्रद्युम्नयोः जन्मदानां षट्कृत्तिकानां षष्ठीदेव्याश्च पूजायाः साद्गुण्यार्थं स्कन्दादीनां नवग्रहाणां च प्रीतये इमां भूयसीं दक्षिणां नानानामगोत्रेभ्यो ब्राह्मणेभ्यो दातुमहमुत्सृजे** ततोभूयसी दक्षिणां विभज्य सिद्धान्नेन ब्राह्मणांश्च भोजयित्वा, अभिषेकतिलकमन्त्रपाठादि कारयित्वा यथाशक्ति स्वबन्धुजनान् स्त्रीजनाँश्चापि भोजयेत्।

अत्र तु षष्ठीमहोत्सवेऽह्नि जातकर्मणि चाशौचदोषो भवितुमेव नार्हति[१]। एतेन जननाशौचमध्ये प्रथमषष्ठदशमदिनेषु दाने प्रतिग्रहे च न दोषः। अत्र पञ्चमषष्ठदिनयोः पुरुषाः आयुधपाणयः स्त्रियश्च नृत्यगीतकारिण्यो रात्रौ जागरणं[२] कुर्युः। सूतिकागारं सधूपाग्निदीपं शस्त्रमुसलाम्बुविभूतियुतं कार्यम्। सर्षपांश्च सर्वतो विकिरेत्। अन्यदपि लोकानुरूपं यथाचारं कार्यम्। विप्राश्च शान्तिपाठं कुर्युः[३]।

॥ इति जातकर्मणि षष्ठीकर्मविधिः ॥

अथ नाम[४]करणसंस्कारः

जन्मतो दशमे नामकरणदिवसे[५] कुमारपिता मङ्गलस्नातः धृतवासाः धृतमङ्गलतिलकः, सबालां सूतिकां संस्नाप्य, दीपं प्रज्वाल्य, शुभासने

---

१. सूतिकावासनिलया जन्मदा नाम देवताः।
तासां यागनिमित्तं तु शुद्धिर्जन्मनि कीर्तिता॥
प्रथमे दिवसे षष्ठे दशमे चैव सर्वदा।
त्रिष्वेतेषु न कुर्वीत सूतकं पुत्रजन्मनि॥ (व्यासः)

२. रात्रौ जागरणं कार्यं जन्मदानां तथा बलिः।
रक्षणीया तथा षष्ठी निशा तत्र विशेषतः॥
पुरुषाः शस्त्रहस्ताश्च नृत्यगीतैश्च योषितः।
रात्रौ जागरणं कुर्युर्दशम्यां चैव सूतके॥ (मार्कण्डेयः)

३. जननात्सप्तमे चाह्निर्मृत्युरायाति घातकः।
दिने दिने च रक्षेयं कर्त्तव्यायुर्विवर्द्धये॥ (नारदः)

४. नाम्ना प्रसिद्धिं लभते मनुष्यस्ततः प्रशस्तं खलु नामकर्म।
आयुर्वर्चोऽभिवृद्धिश्च सिद्धिर्व्यवहृतिस्तथा।
नामकर्म फलं त्वेतत्समुद्दिष्टं मनीषिभिः॥ (याज्ञवल्क्यस्मृतौ)

५. नामधेयं दशम्यां तु द्वादश्यां वापि कारयेत्।
पुण्ये तिथौ मुहूर्त्ते वा नक्षत्रे वा गुणान्विते॥ (मनुः)
नामधेयं दशम्यां तु केचिदिच्छन्ति पार्थिव।
द्वादश्यामपरे रात्र्यां मासे पूर्णे तथा परे॥
अष्टादशेऽहनि तथा वदन्त्यन्ये मनीषिणः॥ (भविष्यपुराणे)
पूर्वाह्णः श्रेष्ठ इत्युक्तो मध्याह्नो मध्यमः स्मृतः।
अपराह्नं च रात्रिं च वर्जयेन्नामकर्मणि॥ (बृहस्पतिः)

उपविश्याचम्य, प्राणानायम्य देशकालकीर्तनान्ते, **अस्यशिशोः बीजगर्भसमुद्भवैनोनिवर्हणायुरभिवृद्धिद्वारा श्रीपरमेश्वरप्रीत्यर्थं नामकरणं करिष्ये तत्र निर्विघ्नार्थं गणपतिपूजनं, स्वस्तिपुण्याहवाचनं, मातृकापूजनं नान्दीश्राद्धञ्च करिष्ये**, इति कृत्वा, अत्र पुण्याहवाचनान्ते **प्रजापतिः प्रीयतामिति** वदेत्। नामकरणेऽधिकारार्थञ्च त्रीन् ब्राह्मणान् भोजयेत्। अत्र शिष्टाचारप्राप्तं नामदेवतापूजनं भवति। तद्यथा-कांस्यपात्रे तण्डुलान् प्रसार्य तदुपरिसुवर्णशलाकया कुलदेवताप्रयुक्तमादावमुकदेवताभक्त इति नाम, मासनाम, नक्षत्रनाम, व्यवहारनाम[१] एवं नामचतुष्टयं लिखित्वा, **अस्य शिशोर्बह्वायुष्यप्राप्त्यर्थं नामदेवतापूजनं करिष्ये** इति। सङ्कल्प्य, **मनोजूतिरिति** प्रतिष्ठाप्य, **श्रीश्च ते** इति मन्त्रेण **नामदेवताभ्यो नम** इति षोडशोपचारैः सम्पूज्य, ततो दक्षिणतः मातुरुत्सङ्गस्थस्य शिशोर्दक्षिणकर्णे कथयेत्। **हे कुमार त्वं गणपतिभक्तोऽसि, हे कुमार त्वं कुलदेव्या भक्तो नाम्नामार्तण्डोऽसि, हे कुमार त्वं मासनाम्ना कृष्णोऽसि, हे कुमार त्वं नक्षत्रनाम्ना चूडामणिरसि, हे कुमार त्वं व्यवहारनाम्ना रामचन्द्रोऽसि**, इतिकथयित्वा, **मनोजूतिरिति** मन्त्रपठनान्ते विप्रैर्नाम सुप्रतिष्ठितमिति वाचयित्वा, ब्राह्मणानभिवादयेत्। तद्यथा-पिता- **हे कुमार त्वं गणपतिभक्तोऽसि सर्वान् ब्राह्मणानभिवादय**, इत्युपांशु[२] पिता वदेत्। द्विजाश्च ब्रूयुः-**आयुष्मान् भव सौम्य गणपतिभक्तः**। पिता-**हे कुमार त्वं मार्तण्डशर्मा कुलदेव्या**

---

१. मङ्गल्यं ब्राह्मणस्य स्यात् क्षत्रियस्य बलान्वितम्।
वैश्यस्य धनसंयुक्तं शूद्रस्य तु जुगुप्सितम्॥
शर्मवद् ब्राह्मस्य स्याद् राज्ञो रक्षा समन्वितम्।
वैश्यस्य पुष्टिसंयुक्तं शूद्रस्य प्रेष्यसंयुतम्॥
स्त्रीणां सुखोद्यमक्रूरं विस्पष्टार्थं मनोहरम्।
मङ्गल्यं दीर्घवर्णान्तमाशीर्वादाभिधानवत्॥

२. अभिवादननामेदमस्येत्यालोच्य चेतसा।
उपांशु निर्विशेच्चैनं न जानीयुः परे यथा॥

भक्तोऽसि, सर्वान् ब्राह्मणानभिवादय, द्विजाः-आयुष्मान् भव सौम्य मार्तण्डशर्मा। पिता-हे कुमार त्वं मासनाम्ना कृष्णशर्मा सर्वान् ब्राह्मणानभिवादय, द्विजाः-आयुष्मान् भव सौम्य कृष्णशर्मा। पिता-हे कुमार त्वं नक्षत्रनाम्ना चूडामणिशर्मा, सर्वान् ब्राह्मणानभिवादय। द्विजाः-आयुष्मान् भव सौम्य चूडामणिशर्मा। पिता-हे कुमार त्वं व्यवहारनाम्ना रामचन्द्रशर्माऽसि सर्वान् ब्राह्मणानभिवादय। द्विजाः-आयुष्मान् भव सौम्य रामचन्द्रशर्मा। ततो विप्राः वेदोऽसीति मन्त्रेणाशिषं शिशवे दद्युः। मन्त्रो यथा- ॐ व्वेदोऽसि येन त्वं देव व्वेद देवेब्भ्यो व्वेदो भव स्तेन मह्यं व्वेदो भूयाः। अथ पिता कुमारस्य दक्षिणकर्णे-आयुष्यं कुर्यात्-ॐ अग्निरायुष्मान् स वनस्पतिभिरायुष्माँस्तेन त्वायुषायुष्मन्तं करोमि। ॐ सोम आयुष्मान् स ओषधीभिरायुष्माँस्तेन त्वायुषायुष्मन्तं करोमि। ॐ ब्रह्म आयुष्मान् तद् ब्राह्मणैरायुष्मत्तेन त्वायुषायुष्मन्तं करोमि। ॐ देवा आयु-ष्मन्तस्तेऽमृतेनायुष्मन्तस्तेन त्वायुषायुष्मन्तं करोमि! ॐ ऋषय आयुष्मन्तस्ते व्रतैरायुष्मन्तः तेन त्वायुषायुष्मन्तं करोमि। ॐ पितर आयुष्मन्तस्ते स्वधाभिरायुष्मन्तस्तेन त्वायुषायुष्मन्तं करोमि। ॐ यज्ञ आयुष्मान् स दक्षिणाभिरायुष्माँस्तेन त्वायुषायुष्मन्तं करोमि। ॐ समुद्र आयुष्मान् स स्रवन्तीभिरायुष्माँस्तेन त्वायुषायुष्मन्तं करोमि। त्र्यायुषञ्जमदग्नेरिति मन्त्रं त्रिः पठेत्। अथास्य पिता दधिमधुघृतमेकीकृत्य प्राशयेत् तत्र मन्त्रः - ॐ भूस्त्वयि दधामि ॐ भुवस्त्वयि दधामि ॐ स्वस्त्वयि दधामि ॐ भूर्भुवः स्वः सर्वं त्वयि दधामि। अथैनमभिमृशेत्। ॐ अश्मा भव परशुर्भव हिरण्यमस्रुतम्भव। आत्मा वै पुत्रनामासि सञ्जीवशरदः शतम्। अथास्य मातरमभिमन्त्रयेत, मन्त्रेणाऽनेन-

ॐ इडासि मैत्रावरुणी वीरे वीरमजीजनथाः।
सा त्वं वीरवती भव यास्मान् वीरवतोऽकरत्॥

ततः पञ्चगव्यं[१] होमार्थं पानार्थञ्च कुर्यात्।

तन्मन्त्राः, **ॐ तत्सवितुरित्यादिकया गायत्र्या गोमूत्रं गृहीत्वा वरुणं ध्यायन् रजतपात्रे मृन्मयपात्रे वा स्थापयेत्। ॐ गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम्। ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम्।** इति मन्त्रेण गोमयं सङ्गृह्य, अग्निं ध्यायन् तत्रैव स्थापयेत्। ततः **ॐ आप्यायस्व समेतु ते विश्वतः सोम वृष्ण्यम्। भवा वाजस्य सङ्गथे।** इति दुग्धं सङ्गृह्य सोमं ध्यायन् तत्रैव स्थापयेत्। **ॐ दधिक्राब्णोऽअकारिषं जिष्णोरश्वस्य वाजिनः। सुरभिनो मुखाकरत्प्रण आयूꣳषि तारिषत्।** इति दधि गृहीत्वा वायुं ध्यायन् तत्रैव स्थापयेत्। **ॐ तेजोऽसि शुक्रमस्यमृतमसि धामनामासि प्रियं देवानामनाधृष्टं देवयजनमसि।** इति घृतं गृहीत्वा रविं ध्यायन् तत्रैव स्थापयेत्। **ॐ देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम्।** इति कुशोदकं सङ्गृह्य हरिं ध्यायन् तत्रैव स्थापयेत्। **ॐ आपोहिष्ठा**

---

१. अथातः संप्रवक्ष्यामि पञ्चगव्यं यथाविधि॥
पावनार्थे द्विजातीनामिहलोके परत्र च॥
गोमूत्रं गोमयं क्षीरं दधि सर्पिः कुशोदकम्।
निर्दिष्टं पञ्चगव्यञ्च पवित्रं कायशोधनम्॥
गोमूत्रे वरुणोदेवो हव्यवाहस्तु गोमये।
क्षीरे चन्द्रश्च भगवान् वायुर्दध्नि समाश्रितः॥
भानुराज्ये स्थितस्तद्वज्जले हरिरुदाहृतः।
दर्भेदेवाः स्थिताः सर्वे पवित्रं तेन नित्यशः॥
मूत्रं तु नीलवर्णायाः कृष्णायाः गोमयं स्मृतम्।
पयश्च ताम्रवर्णायाः श्वेतायाः दधि चोच्यते॥
कपिलाया घृतं ग्राह्यं महापातकनाशनम्।
अलाभे सर्ववर्णानां कपिलैका प्रशस्यते॥
मूत्रस्यैकपलं दद्यात्तदर्धं गोमयं स्मृतम्।
क्षीरं सप्तपलं दद्याद्दधि त्रिपलमुच्यते॥
आज्यस्यैकपलं दद्यात्पलमेकं कुशोदकम्।
सर्पिः कुशोदकञ्चैव पृथङ्मन्त्रैर्विधीयते॥
गायत्र्यागृह्य गोमूत्रं गन्धद्वारेति गोमयम्।
आप्यायस्वेति वै क्षीरं दधि क्राब्णेति वै दधि।
तेजोऽसि शुक्रमित्याज्यं देवस्यत्वा कुशोदकम्॥

मयोभुव: इत्यादिभि: तिसृभि: ऋग्भिरालोड्य, ॐ कारेण कुशत्रयं साग्रं समूलं गृहीत्वा पुनरोङ्कारेण तत् पञ्चगव्यं गृहीत्वा पार्थिवनामाग्निमावाह्याधारावाज्यभागौ हुत्वा पञ्चगव्यहोमं[१] कुर्यात्। **ॐ इरावती धेनुमती हि भूतꣳसूयवसिनी मनवे दशस्या। व्यस्कम्ना रोदसी विष्णवे ते दाधर्थ पृथिवीमभितो मयूखै: स्वाहा। इदमग्नये ॐ इदं विष्णुर्विचक्रमे त्रेधानिदधे पदम्। समूढमस्य पाꣳसुरे स्वाहा। इदं विष्णवे। मा नस्तोके तनये मान आयुषि मानो गोषु मा नोऽअश्वेषु रीरिष:। मा नो वीरान् रुद्र भामिनौ वधीर्हविष्मन्त सदमित्वा हवामहे स्वाहा इदं रुद्राय शं नो देवीरभिष्टय आपो भवन्तु पीतये शं योरभिस्रवन्तु न: स्वाहा, इदमद्भ्य: ॐ तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि। धियो यो न: प्रचोदयात्। स्वाहा। इदं सवित्रे। ॐ प्रजापते न त्वदेतान्यन्यो विश्वा रूपाणि परिता बभूव। यत्कामास्ते जुहुम स्तन्नौअस्तु। वयꣳस्याम पतयो रयीणाम्। स्वाहा। इदं प्रजापतये। ॐ अग्नये स्विष्टकृते स्वाहा इदमग्नये स्विष्टकृते।** इति पञ्चगव्यहोमं विधाय हुतशेषं पञ्चगव्यं सूतिकायै दद्यात्। ततो भोजनदक्षिणादिभिर्विप्रान् सन्तोष्य विसर्जयेत्। अत्र यथाकुलाचारं बान्धवानपि भोजयेत् मङ्गलगीतवाद्यान्यपि वादयेत्।

॥ इति नामकरण[२] संस्कार: ॥

अथ निष्क्र[३]मणसंस्कार:

मङ्गलस्नात: पिता, कृताभिषेकया गृहीतोत्सङ्गार्भकया जायया सह शुभासने उपविश्याचम्य प्राणानायम्य देशकालकीर्तनान्ते, **ममास्य शिशोरायुर-**

---

१. सप्तपत्राश्च ये दर्भा अच्छिन्नाग्रा: शुकत्विष:।
तेभिर्गृहीत्वा होतव्यं पञ्चगव्यं यथाविधि॥
इरावती, इदं विष्णुर्मानस्तोके च शंवती।
गायत्री, प्रजापतेनत्वेता आहुतय: स्मृता:॥

२. देवतानां विशेषेण पित्रोर्वा नाम शस्यते। नैव कार्यं नृपादीनां नामजीवनहेतुत:। पूर्व: परस्य वर्णस्य हीनस्यापि न धारयेत्। (कपिलसंहिता)

३. चतुर्थे मासि कर्त्तव्यं बालस्यादित्यदर्शनम्। (शङ्ख:)
सूर्यावलोकनादायुरभिवृद्धिर्भवेद्ध्रुवा।
निष्क्रमादायु: श्रीवृद्धिरप्युद्दिष्टा मनीषिभि:॥ (याज्ञवल्क्यस्मृतौ)

भिवृद्धिव्यवहारसिद्धिद्वारा श्रीपरमेश्वरप्रीत्यर्थं गृहान्निष्क्रमणं करिष्ये। स्वस्तिवाचनादिमातृपूजनपूर्वकनान्दीश्राद्धञ्चं कृत्वा (अत्र पुण्याहवाचनान्ते **सविता ते प्रीयतामिति** वाच्यम्) ततः पितालङ्कृतं शिशुं मातृगृहीतं शुभे मुहूर्त्ते गृहान्निष्क्रम्य सूर्यावलोकनं कारयेत्। तत्र मन्त्रः - **ॐ तच्चक्षुर्देवहितं पुरस्ताच्छुक्रमुच्चरत्। पश्येम शरदः शतञ्जीवेम शरदः शतꣳ शृणुयाम शरदः शतं प्रब्रवाम शरदः शतमदीनाः स्याम शरदः शतम्भूयश्च शरदः शतात्।** इति सूर्योदीक्षणं कारयित्वा देवायतनं गच्छेत्। गृहमागत्य सुवासिनीभिर्नीराजनं कारयित्वा दशब्राह्मणान् भोजयित्वा तेभ्यो दक्षिणां दत्त्वा, तैराशिषो गृहीत्वा **यान्तु मातृगणाः सर्वे**-इति मातॄणां विसर्जनंकार्यम्। अस्मिन्नेव दिने रात्रौ कुमारस्य शुभवेलायां चन्द्रदर्शनमपि कारयितव्यम्। तद्यथा **चन्द्रार्कयोर्दिगीशानां दिशां च वरुणस्य च। निक्षेपार्थमिदं दद्मि ते त्वां रक्षन्तु सर्वदा॥**

प्रमत्तं वा प्रसुप्तं वा दिवारात्रमथापि वा।
रक्षन्तु सततं ते त्वां देवाः शक्रपुरोगमाः॥

ततो मातृश्च प्रार्थयेत।

ब्रह्माणीकमलेन्दुसौम्यवदना माहेश्वरी लीलया,
कौमारीरिपुदर्पनाशनकरी चक्रायुधा वैष्णवी।
वाराही घनघोरघर्घरमुखी चैन्द्री च वज्रायुधा,
चामुण्डा गणनाथरुद्रसहिता रक्षन्तु नो मातरः॥

ततः स्वेष्टबन्धुवर्गादीन् भोजयित्वा स्वयं भोजनं कुर्यात्।

॥ इति निष्क्रमणसंस्कारः ॥

अथा[१]न्नप्राशनसंस्कारः

पिता सदारः शिशुना सह मङ्गलं स्नात्वाहते वाससी धारयित्वा

---

१. ततोऽन्नप्राशनं मासि षष्ठे कार्यं यथाविधि।
अष्टमे वाऽथ कर्त्तव्यं यदैव मङ्गलं गृहे॥ (यमः)

तिलकं धृत्वा शुभासने चोपविश्याचम्य प्राणानायम्य देशकालकीर्तनान्ते, **ममास्य शिशोर्मातृगर्भामङ्गलनाशनशुद्ध्य**[१]**र्थमन्नाद्यब्रह्मवर्चसतेज इन्द्रियायुर्बललक्षणफलसिद्धिबीजगर्भसमुद्भवैनो निवर्हणद्वारा परमेश्वरप्रीत्यर्थमन्नप्राशनाख्यं कर्म करिष्ये, तत्र निर्विघ्नार्थं गणपतिपूजनं स्वस्ति पुण्याहवाचनं मातृकापूजनं नान्दीश्राद्धञ्च करिष्ये** इति सङ्कल्प्य विधिवच्च तत्सर्वं कृत्यजातं सम्पाद्यात्र च पुण्याहवाचनान्ते **सविता प्रीयतामिति** स्पष्टमुदित्वा ततः स्थण्डिले पञ्चभूसंस्कारपूर्वकं शुचिनामानमग्निं प्रतिष्ठाप्य षोडशोपचारैः सम्पूजयेत्। ततो ब्रह्मोपवेशनादिकर्म कुर्यात् सर्वान् षड्रसान्, क्षारकटुतिक्तकषायमधुराम्लान्, पेयलेह्यचोष्यखाद्यं यवशाल्यादिनिर्मितं घृतादिपाचितमन्नं[२] तैजस्पात्रे धृतं प्रकल्पयेत्। एकत्र पुस्तकशस्त्रादिशिल्पं क्रीडनकादि च विन्यसेत् पवित्रच्छेदनादि, आज्यभागान्तं कृत्वानन्तरमाज्येना-हुतिद्वयं जुहुयात्। तत्र मन्त्रौ- **ॐ देवीं वाचमजनयन्त देवास्तां विश्वरूपाः पशवो वदन्ति॥ सा नो मन्द्रेष मूर्ज्जं दुहाना धेनुर्वा- गस्मानुपसुष्टुतैतु स्वाहा। इदं वाचे न मम।** पुनरपि **ॐ देवीं वाचं॰ नुपसुष्टुतैतु स्वाहा** इति मन्त्रंपठित्वा **ॐ बाजो नाऽअद्य प्रसुवातिदानं व्वाजो देवांऽऋतुभिः कल्पयाति। व्वाजो हिम सर्व्ववीरञ्जजान व्विश्वाऽआशा व्वाजपतिर्जयेयर्ठ॰स्वाहा॥२॥ इदं वाचे वाजाय न मम।** ततः स्थालीपाकेन पायसेनाहुतिचतुष्टयं दद्यात्-तद्यथा- **ॐ प्राणेनान्नमशीय स्वाहा इदं प्राणाय। ॐ अपानेन गन्धानशीय स्वाहा, इदमपानाय। ॐ चक्षुषा रूपाण्यशीय स्वाहा, इदं चक्षुषे। ॐ श्रोत्रेण यशोऽशीय स्वाहा, इदं श्रोत्राय।** ततः स्थालीपाकेन स्विष्टकृत्, महाव्याहृत्यादि नवाहुतयो देयाः। ततः संस्रवप्राशनादिप्रणीतामोकान्तं होमशेषं समाप्य स्थाल्यामासादित- सर्वरसान् मधुदधिघृतमिश्रितानि शाल्यादीन्यन्नानि चानीयैकस्मिन् पात्रे प्रत्येकमुद्धृत्य सकृदेव शिशुं प्राशयेत् पञ्चवारं वा तत्र मन्त्रः **हन्त हन्त** इति, **हन्तकारं मनुष्याः** इति श्रुतेः। ततो माता त्रिवारं कुमारस्य मुखं विशोध्य स्वोत्सङ्गादुज्झेत्

१. अन्नाशनान्मातृगर्भे मलाशी च विशुध्यति॥ (याज्ञवल्क्यः)

२. देवतापुरतस्तस्य धात्र्युत्सङ्गगतस्य च। अलङ्कृतस्य दातव्यमन्नं पात्रेऽथ काञ्चने॥
मध्वाऽज्यकनकोपेतं प्राशयेत्पायसं तु तम्॥ (मार्कण्डेयः)

तदा स बालकः स्वपार्श्वस्थापितं वस्त्रशस्त्रलेखनी पुस्तकादि, यत्प्रथमं गृह्णाति तेन तस्य जीविका[1] भवेदिति ज्ञातव्यम्।

अत्र, शिशुः स्वेच्छया प्रथमं यद्वस्तु स्पृशेत् तेनैव तस्य जीविका भविष्यतीति ज्ञायेत। ततो दशब्राह्मणान् भोजयित्वा तेभ्यो दक्षिणां दत्त्वा तैराशिषो गृहीत्वा मातॄणामग्नेश्च विसर्जनं कुर्यात्। यथाचारं स्ववान्धवान् वनिताश्च भोजयेत्, मङ्गलगीतवाद्यानि च कारयेदिति॥

॥ इत्यन्नप्राशनसंस्कारः ॥

अथ चौल[2] कर्मसंस्कारः

ज्योतिःशास्त्रोक्ते[3] शुभमुहूर्ते माताकुमारमादायाप्लाव्याहते वाससी परिधाप्याङ्के चाधाय पश्चादग्नेरुपविशति, मङ्गलस्नातः पिता चाचम्य

---

१. देवाग्रतोऽथ विन्यस्य शिल्पभाण्डानि सर्वशः।
वस्त्राणि चैव शस्त्राणि ततः पश्येत्तु लक्षणम्॥
प्रथमं यत् स्पृशेद्बालस्ततो भाण्डं स्वयं तदा।
जीविका तस्य बालस्य तेनैव तु भविष्यति॥

२. चूडाकर्म द्विजातीनां सर्वेषामेव धर्मतः।
प्रथमेऽब्दे तृतीये वा कर्त्तव्यं श्रुतिचोदनात्॥ (मनुः)
तृतीये वत्सरे चौलं कुर्वीताऽस्योत्तरायणे।
शुक्लपक्षे शुभर्क्षे तु कृत्वाऽभ्युदयिकं तथा॥ (आश्वलायनस्मृतौ)
जन्मतस्तु तृतीयेऽब्दे श्रेष्ठमिच्छन्ति पण्डिताः।
पञ्चमे सप्तमे वापि जन्मतो मध्यमं भवेत्।
अधमं गर्भतः स्यात्तु नवमैकादशेऽपि वा॥ (नारदः)

३. उत्तरायणे सूर्ये विशेषात्सौम्यगोलके।
शुक्लपक्षे शुभं प्रोक्तं कृष्णपक्षे शुभेतरम्॥ (बृहस्पतिः)
द्वित्रिपञ्चमसप्तम्यामेकादश्यां तथैव च।
दशम्यां च त्रयोदश्यां कार्यं क्षौरं विजानता॥ (वशिष्ठः)
रवेरङ्गारकस्यैव सूर्यपुत्रस्य चैव हि।
निन्दिता दिवसाः क्षौरे शेषाः कार्यकराः स्मृताः॥
नक्षत्रे तु न कुर्वीत यस्मिञ्जातो भवेन्नरः। (वशिष्ठः)
प्रौष्ठपदयोः कार्यं नैवाऽऽग्नेये च भारत॥
तिथिं प्रतिपदं रिक्तां विष्टिं चैव विवर्जयेत्।

प्राणानायम्य, देशकालौ स्मृत्वा, **अस्य कुमारस्य बीजगर्भसमुद्भवैनोनिवर्हणेन वलायुर्वर्चोऽभिवृद्धिव्यवहारसिद्धिद्वारा श्रीपरमेश्वरप्रीत्यर्थं चौलकर्म करिष्ये, तत्र निर्विघ्नार्थं गणपतिपूजनं स्वस्तिपुण्याहवाचनं मण्डपस्थापनं मातृकापूजनं वसोर्द्धारानान्दीश्राद्धञ्च करिष्ये**-इति सङ्कल्प्य, विधिवत्सर्वं कर्मजातं सम्पाद्य चात्र पुण्याहवाचनान्ते प्रजापतिः प्रीयतामित्याभाष्य, चूडाकरणाधिकारार्थञ्च त्रीन् ब्राह्मणान्भोजयित्वा ततः स्थण्डिले पञ्चभूसंस्कारान् कृत्वा सभ्यनाम्नोऽग्नेःस्थापनम्। ततो ब्रह्मोपवेशनादिपात्रासादनादि कार्यम्। नात्र चरुः। पात्रासादनानन्तरमुपकल्पनीयानि द्रव्याणियथा-शीतोदकम्। उष्णोदकम्। नवनीतपिण्डः घृतपिण्डो दधिपिण्डो वा। द्वादशाङ्गुलदीर्घा त्र्येणी (त्रिस्थाने श्वेता) शलली, (शाही पशोः कीलरूपकः शङ्कुः)। साग्राणि द्वादशाङ्गुलदीर्घाणि सप्तविंशतिः कुशतरुणानि। ताम्रपरिष्कृत आयसः क्षुरः। आनडुहगोमयपिण्डः। नापितश्च। ततः पवित्रीकरणाद्याज्यभागानन्तरं महाव्याहृत्यादिप्राजापत्यन्ताः नवाहुतयः। तद्यथा। **ॐ प्रजापतये स्वाहा, इदं प्रजापतये, ॐ इन्द्राय स्वाहा इदमिन्द्राय। ॐ अग्नये स्वाहा, इदमग्नये। ॐ सोमाय स्वाहा, इदं सोमाय। ॐ भूः स्वाहा, इदमग्नये। ॐ भुवः स्वाहा, इदं वायवे। ॐ स्वः स्वाहा, इदं सूर्याय। ॐ त्वन्नोऽअग्ने॰ स्वाहा॥ इदमग्नीवरुणाभ्याम् न मम। ॐ सत्वन्नोऽअग्ने॰ स्वाहा, इदमग्नीवरुणाभ्यां न मम। ॐ अयाश्चाग्ने॰ स्वाहा। इदमग्नये न मम ॐ ये ते शतं वरुण॰ स्वाहा, इदमग्नये स्विष्टकृते।** ततः संस्रवप्राशनादिप्रणीताविमोकान्तं होमशेषं समाप्य, ततः एकस्मिन् पात्रे शीतास्वप्सु, उष्ण अपः आसिञ्चेत् तत्र मन्त्रः-**ॐ उष्णेन वाय उदकेनेह्यदिते केशान्वप॥** अथात्र-उदके नवनीतपिण्डं, घृतपिण्डं,

---

अश्विनी श्रवणः स्वाती चित्रा पुष्यः पुनर्वसुः।
धनिष्ठारेवतीज्येष्ठामृगहस्तेषु कारयेत्॥ (व्यासः)
मार्गे मासि तथा ज्येष्ठे क्षौरं परिणयं व्रतम्।
ज्येष्ठपुत्रदुहित्रोस्तु यत्नेन परिवर्जयेत्॥ (विवाहचण्डेश्वरे)
न जन्मधिष्ण्ये न जन्ममासे, न जन्मकालीयदिने विदध्यात्।
ज्येष्ठे न मासे प्रथमस्य सूनोस्त्वाद्याः सुताया अपि मङ्गलानि॥

दधिपिण्डं प्रास्येत्। तदुदकमादाय शिरसः दक्षिणभागस्थं केशखण्डन[१] मुन्देत् तथा चोक्तम्। **उन्दनं केशमूले तु केशमध्ये विनीयनम्। छेदनं चैव केशाग्रे एष एव क्रमो भवेत्।** उन्दनमनेनार्द्रीकरणं, विनीयनमनेन च द्विधाकरणं गृह्यते। ततः आर्द्रीकरणे मन्त्रः-ॐ **सवित्राप्रसूता दैव्याआप उदन्तु ते तनूम्। दीर्घायुत्वाय बलाय वर्चसे** इति ततस्त्र्येण्या शलल्या विनीयकेशान् क्रियते, ततः त्रीणि कुशतरूणान्यन्तर्दध्यात्। **ॐ औषधे त्रायस्व**, इतिमन्त्रेण। ततः **ॐ शिवोनामासि स्वधितिस्ते पिता नमस्तेऽअस्तु मामाहिꣳसीः।** इति मन्त्रेण लोहक्षुरमादाय **ॐ निवर्तयाम्यायुषेऽन्नाद्याय प्रजननाय रायस्पोषाय सुप्रजास्त्वाय सुवीर्याय**, इति मन्त्रेण केशकुशक्षुर-संलग्नीकरणम्। केशच्छेदने मन्त्रः **ॐ येनावपत्सविता क्षुरेण सोमस्य राज्ञो वरुणस्य विद्वान्॥ तेन ब्राह्मणो वपतेदमस्यायुष्यं जरदृष्टिर्यथासम्॥** अनेन मन्त्रेण सकेशानि कुशतरुणानि प्रच्छिद्यानडुहे गोमयपिण्डे प्रास्य, अग्नेरुत्तरतः गोमयपिण्डं स्थापयेत्। ततस्तस्मिन्नेव दक्षिणे गोदाने (केशकर्तने) एवमेवापरं वारद्वयं तूष्णीं कर्तव्यम्। तद्यथा-उन्दनम्, विनयनम्, त्रिकुशतरुणान्तर्धानम्। सँल्लग्नीकरणम् छेदनम्। गोमयपिण्डे प्रासनम्। एवमुक्तेन प्रकारेण पुनरेकवारं कर्तव्यम्। उत्तरभागस्थकेशच्छेदनेऽप्येवमेव कर्म कार्यम् यथाहि **ॐ सवित्राप्रसूता** इत्यादिमन्त्रेण पश्चिमगोदाने उन्दनम्। त्र्येण्या शलल्या विनयनम्। **ॐ ओषधे त्रायस्वेति** त्रिकुशतरुणान्तर्धानम्। **ॐ शिवोनामेति** लोहक्षुरग्रहणम्। **ॐ निवर्तयामीति** संल्लग्नीकरणम्। परमत्र छेदने मन्त्रविशेषस्तद्यथा- **ॐ त्र्यायुषं जमदग्नेः कश्यपस्य त्र्यायुषम्। यद्देवेषु त्र्यायुषं तन्नोअस्तु त्र्यायुषम्॥** ततः गोमयपिण्डे प्रासनम्। पुनः पश्चिमगोदाने एवमेवापरं वारद्वयं तूष्णीं कर्तव्यम्। परमत्र केशच्छेदने मन्त्रविशेषः। तद्यथा- **ॐ येन भूरिश्चरा दिवं ज्योक् च पश्चाद्धि सूर्यम्। तेन ते वपामि ब्रह्मणाजीवातवे जीवनाय सुश्लोक्याय स्वस्तये।** इति मन्त्रेण सकुशतरूणकेशान् छित्त्वा गोमयपिण्डे प्रासनम्। पुनरुत्तरगोदाने

---

१. शिशोर्मातरि गर्भिण्यां चूडाकर्म न कारयेत्।
पञ्चमाब्दादथोर्ध्वं तु गभिण्यामपि कारयेत्॥
सहोपनीत्या कुर्याच्चेत्तत्र दोषो न विद्यते।
पञ्चमासादधः कुर्यादत उर्ध्वं न कारयेत्॥ (नारदवृहस्पती)

एवमेवापरमुक्तप्रकारेण वारद्वयं तूष्णीं कर्तव्यम्। ततस्त्रिः क्षुरेण शिरः प्रदक्षिणं परिहर्तव्यम्। तत्र मन्त्रः - **ॐ यत्क्षुरेणमज्जयिता सुपेशसावप्तावा वपति केशा-ञ्छिन्धि शिरो मास्यायुः प्रमोषीः**। सकृन्मन्त्रेण द्विस्तूष्णीं शिरसः समन्तात्क्षुरभ्रामणं कार्यम्। नतस्ताभिरद्भिः शिरः समुन्द्य (आर्द्रीकृत्य) नापिताय क्षुरं प्रयच्छेत्। **ॐ अक्षण्वं परिवप** इति मन्त्रेण। स च नापित उदङ्मुखस्थितस्य कुमारस्य प्राक्संस्थं शिरः प्राङ्मुखस्थितस्य उदक्संस्थं शिरो वपेत्। यथामङ्गलं केशशेषकरणमत्र अस्य तु प्रयोजनमिदं यत् कुलव्यवस्थया[1] शिखास्थापनम् यथाहि केषाञ्चित्कुलेषु पञ्चशिखाः धार्य्यन्ते केषाञ्चित्त्वेकैव शिखा धार्यते। परं येषां गोत्रेषु पञ्चशिखाः भवन्ति ततस्तेषामुपनयनकाले चतस्रो विच्छिद्यन्तेऽतस्तस्यैकैव शिष्यते। यस्य यथा। प्रसिद्धिस्तस्य तथा शिखास्थापन[2]- मिष्यते। ततो वपनान्ते सर्वान् केशान् गोमयपिण्डे वस्त्रादिनावेष्ट्यानुगुप्तं कृत्वा गवां गोष्ठे नद्यास्तीरं वा पल्वलस्य जलान्तिके निधापयेत्। ततः स्मृत्युक्तान् दशसङ्ख्याकान् ब्राह्मणान् सम्भोज्या-चार्यादिभ्यो दक्षिणाञ्च दत्वा - **यान्तु देवगणा०** इति विसर्जनं कृत्वा यथा कुलाचारं बान्धवान् भोजयेत्, मङ्गलस्तवपाठान् गीतं वाद्यादिकञ्च कुर्यात्।

॥ इति चौलकर्मसंस्कारः ॥

अथ कर्णवेधसंस्कारः

यजमानो विहितस्नानोऽहते वाससी परिधाय धृतमङ्गलतिलकः शुभासने प्राङ्मुख उपविश्याचम्य प्राणानायम्य देशकालकीर्तनं विधाय **ममास्य**

---

१. यावन्तः प्रवरास्तस्य शिखामध्ये च पार्श्वयोः।
पश्चात्पूर्वे तथा पञ्चप्रवराणां शिखाः स्मृताः॥ (आश्वलायनः)
मध्ये शिरसि चूडा स्यात् वशिष्ठानां तु दक्षिणे।
उभयोः पार्श्वयोरत्रिकश्यपानां शिखा मता॥ (निर्णयसिन्धौ)

२. केशशेषं ततः कुर्याद्यस्मिन् गोत्रे यथोचितम्।
कुर्वन्त्यन्ये शिखामत्र मङ्गलार्थमिह क्वचित्॥
काम्बोजानां वशिष्ठानां दक्षिणे कारयेच्छिखाम्।
द्विभागेऽत्रिकश्यपानां मुण्डाश्च भृगवो मताः॥
पञ्चचूडा आङ्गिरस एका वाजसनेयिनाम्॥

कुमारस्यायुरभिवृद्धिव्यवहारसिद्धिद्वारा श्रीपरमेश्वरप्रीत्यर्थं कर्णवेधं करिष्ये तदङ्गत्वेन च गणपतिपूजनं पुण्याहवाचनं मातृपूजनं वसोर्द्धारापूजनं नान्दीश्राद्धञ्च करिष्ये। इति सङ्कल्प्य सर्वं कृत्यं सम्यक् सम्पाद्य ततः कलशे आदित्यादिनवग्रहान् जले च केशवादिदेवान् प्रतिष्ठाप्य पूजयित्वा ततः स्वेष्टदेवं विप्रान्, भिषग्वरं सौचिकञ्च नमस्कृत्य मातुरुत्सङ्ग-स्थितं भूषणवस्त्रादिभिरलङ्कृतं बालकं प्राङ्मुखं शुभासने समुपवेश्य तद्धस्ते मोदकादि भोजनार्थं दत्त्वा ततो दैवज्ञबोधिते[१] शुभे लग्ने, पिता, सौचिको भिषग्वरो[२] वान्यः कोऽपि पटुः सुवर्णसूच्या, रजतसूच्या वायस[३] सूच्या कुमारस्य दक्षिणं कर्णं वेधयेत् तत्र मन्त्रः - **ॐ भद्रं कर्णेभिरिति मन्त्रस्य प्रजापतिर्ऋषिस्त्रिष्टुप् छन्दः लिङ्गोक्ता देवता दक्षिणकर्णाभिमन्त्रणे विनियोगः। ॐ भद्रं कर्णेभिः शृणुयाम देवा भद्रं पश्येमाक्षभिर्य्यजत्राः। स्थिरैरङ्गैस्तुष्टुवाꣳसस्तनूभिर्व्यशेमहि देवहितं यदायुः।** इति दक्षिणं कर्णं वेधयित्वा ततो वामकर्णाभिमन्त्रणम्। **ॐ वक्ष्यन्ती वेति मन्त्रस्य देवा ऋषय स्त्रिष्टुप् छन्दो लिङ्गोक्ता देवता वामकर्णाभिमन्त्रणे विनियोगः। ॐ वक्ष्यन्ती वेदागनीगन्ति कर्णम्प्रियꣳसखायं परिषस्वजाना:। योषेव शिङ्क्ते वितताधिधन्व- ज्ज्याऽइयꣳसमने पारयन्ती।** इति मन्त्रेणाभिमन्त्र्य वामं कर्णञ्चाभिवेध्य सम्मान्य च कर्णवेधकं फलादिभिर्यथाशक्ति विप्राश्च

---

२. मासे षष्ठे सप्तमे वाप्यष्टमे मासि वत्सरे।
कार्त्तिके पूर्णमासे वा चैत्रे वा फाल्गुनेऽपि वा॥
कर्णवेधं प्रशंसन्ति शुक्लपक्षे शुभे दिने॥ (गर्गः)
कृतचूडे च बाले तु कर्णवेधो विधीयते। (व्यासस्मृतौ)

२. शङ्खोपरि च कर्णान्ते त्यक्त्वा यत्नेन सेवनीयम्।
व्यत्यासाद् वा शिरां विध्येदन्त्रवृद्धिनिवृत्तये॥
तस्माद् भिषक् सकुशलः कर्णं विध्येद् विचक्षणः।
शिशोर्हर्षप्रमत्तस्य धर्मकामार्थसिद्धये॥ (सुश्रुतः)

३. शातकुम्भमयी सूची वेधने तु शुभप्रदा।
राजती वाऽऽयसी वापि यथाविभवतः शुभा॥

भोजयेत्। कुमारस्य प्रथमतः दक्षिणकर्णं कुमार्यास्तु पूर्वं वामकर्णं वेधयेत्। पुंसः सूर्यरश्मिप्रवेशपर्यन्तं रन्ध्रं वर्धयेत् स्त्रीणान्तु यथेच्छं विधेयम्।

॥ इति कर्णवेध[१] संस्कारः ॥

अथोपनयन[२] संस्कारः

तत्र प्रथमतः पूर्वेद्युः कुमारस्य पिताऽऽचार्यं वृत्वा मातृपूजा-पूर्वकमाभ्युदयिकश्राद्धं कृत्वा तदवधि अकृतानामन्येषां संस्काराणां करणजन्य प्रत्यवायनिवृत्तिपूर्वकमुपनयनसंस्कारौचित्यप्राप्तये प्रायश्चित्तस्थानीयं द्रव्यं गां वा सम्प्रदद्यात् अथोपनयनदिने[३] कुमारपिता कर्माङ्गत्वेन ब्राह्मणत्रयमष्टकुमारान् वटुं च भोजयेत्। ततो वटोर्मुण्डनं च कारयित्वा गणेशादिपूजनं कुर्यात्। वटुरपि कुर्यात्। तत आचार्यो बहिः शालायां तुषकेशशर्करादिरहितायां शुद्धायाम्भूमावग्निं प्रतिष्ठापयेत्। तद्यथा- तत्र हस्तमात्रपरिमितां चतुरस्त्रां भूमिं कुशकरणकसमूहनानन्तरं गोमयोदकेनोपलिप्य स्त्रुवमूलेन प्रागग्रप्रादेश-मात्रमुत्तरोत्तरक्रमेण त्रिरुल्लिख्य उल्लेखनक्रमेण अनामिकाङ्गुष्ठाभ्यां मृदमुद्धृत्य जलेनाभ्युक्ष्य नवीनकांस्यपात्रेणाग्निमानीय स्वाभिमुखं निधाय **ॐ शाण्डिल्यगोत्र पावकनामाग्ने इहागच्छ इह तिष्ठ** इति प्रार्थयेत्। ततः

---

१. कर्णव्यधे कृते बालो न ग्रहैरभिभूयते।
भूष्यतेऽस्य मुखं तस्मात्कार्यस्तत्कर्णयोर्व्यधः॥ (चक्रपाणिनिबन्धे)
जातकर्मादि कर्णवेधपर्यन्तं संस्कारजातं बालिकाया मन्त्ररहितं कार्यम्।
किन्तु होमो विधेयः समन्त्रकः।

२. गर्भाष्टमेऽब्दे कुर्वीत ब्राह्मणस्योपनायनम्। गर्भादेकादशे राज्ञो गर्भात्तु द्वादशे विशः॥
ब्रह्मवर्चसकामस्य कार्यं विप्रस्य पञ्चमे। राज्ञो बलार्थिनः षष्ठे वैश्यस्येहार्थिनोऽष्टमे॥
आषोडशाद् ब्राह्मणस्य सावित्री नातिवर्तते। आद्वाविंशात्क्षत्रबन्धोराचतुर्विंशतेर्विशः॥
अत ऊर्ध्वं त्रयोऽप्येते यथाकालमसंस्कृताः।
सावित्रीपतिता व्रात्या भवन्त्यार्यविगर्हिताः॥ (मनुः)

३. माघादिषु तु मासेषु मौञ्जी पञ्चसु शस्यते।
गुरुशुक्रबुधानां तु वाराः श्रेष्ठतमाः स्मृताः। अधमः सोमवारस्तु सूर्यवारस्तुमध्यमः॥
वारौ मन्दारयोर्वर्ज्यौ कृष्णे वर्ज्यो निशापतेः।
अस्तङ्गतस्य सौम्यस्य वारो वर्ज्यो द्विजन्मनाम्॥ (नारदः)

कुमारमाचार्योऽग्नेः पश्चाद्दक्षिणपार्श्वेऽवस्थाप्य बद्धाञ्जलिं तं सम्बोधयेत् **ॐ ब्रह्मचर्यमागाम्** इति ब्रूहीति प्रैषानन्तरं **ॐ ब्रह्मचर्यमागम्** इति कुमारो ब्रूयात्। ततः **ॐ ब्रह्मचर्यसानि** ब्रूहीत्याचार्येणोक्ते "**ॐ ब्रह्मचार्यसानि**" इति कुमारो ब्रूयात्। ततो माणवकमाचार्यो वासः[1] परिधापयन् **ॐ येनेन्द्राय बृहस्पतिर्वासः पर्यदधादमृतं तेन त्वा परिदधाम्यायुषे दीर्घायुत्वाय बलाय वर्चसे** इति पठेत्। ततो माणवकस्य द्विराचमनम्। अथ आचार्यो माणवकस्य कट्यां वेष्टनत्रयेण तत्प्रवरग्रन्थिमौञ्जीमेखलां[2] शिरोमार्गेणाबध्नीयात्। तत्र प्रथमं **इयं दुरुक्तामिति वामदेवऋषिर्मेखला देवता त्रिष्टुप्छन्दः मेखलाबन्धने विनियोगः** इति ऋष्यादिकं स्मृत्वा **ॐ इयं दुरुक्तं परिबाधमाना वर्णं पवित्रं पुनती म आगात्** इति पठेत्। ततः कुमारस्य शिखाबन्धनं प्रणवेन सावित्र्या वा कुर्यादाचार्यः। भाण्डाष्टकदानसकङ्ल्पः क्रियते– **ॐ अद्येत्यादि सङ्कीर्त्य स्वकीयोपनयनसंस्कारकर्मणि यज्ञोपवीतधारणाधिकारसिद्ध्यर्थं यज्ञोपवीतवस्त्रफलद्रव्यमिष्टान्नसहितं भाण्डाष्टकदानं बृहस्पतिसूर्य-प्रजापतिविष्णुदैवताकं यथानामगोत्रेभ्यो ब्राह्मणेभ्यो युष्मभ्यं दास्ये।** ततः सुप्रतिष्ठितयज्ञोपवीतमादाय **ॐ यज्ञोपवीतमिति मन्त्रस्य परमेष्ठी ऋषिर्लिङ्गोक्ता देवता त्रिष्टुप्छन्दो यज्ञोपवीतपरिधापने विनियोगः।** इति ऋष्यादिकं स्मृत्वा **ॐ यज्ञोपवीतं परमं पवित्रं प्रजापतेर्यत्सहजं पुरस्तात्। आयुष्यमग्रयं प्रतिमुञ्च शुभ्रं यज्ञोपवीतं बलमस्तु तेजः।** इति त्रिः पठित्वैकं यज्ञोपवीतं[3] परिधापयेदाचार्यः। ततो बटुर्द्विराचमनं कुर्यात्। अथाचार्यो माणवकस्य यज्ञोपवीतस्थाने कृष्णाजिनं परिधापयेत्। तत्र मन्त्रः **ॐ मित्रस्य चक्षुरिति प्रजापतिर्ऋषिरजिनं देवता त्रिष्टुप्छन्दः अजिनपरिधापने विनियोगः** इति ऋष्यादिकं स्मृत्वा **ॐ मित्रस्य चक्षुर्वरणं बलीयस्तेजो यशस्वी स्थविरं समिद्धम्। आवाहमस्मिन्**

---

१. कार्ष्णरौरववास्तानि चर्माणि ब्रह्मचारिणः।
वसीरन्नानुपूर्व्येण शाणक्षौमाविकानि च॥ (मनुः)

२. मौञ्जी त्रिवृत्समा श्लक्ष्णा कार्या विप्रस्य मेखला।
क्षत्रियस्य तु मौर्वाज्या वैश्यस्य शणतान्तवी॥ (मनुः)

३. कार्पासमुपवीतं स्याद्विप्रस्योर्ध्ववृतं त्रिवृत्।
शणसूत्रमयं राज्ञो वैश्याऽऽविकमुच्यते॥ (मनुः)

वरुणं च जिष्णुं कृष्णाजिनं[१] **परिमृज्याजिनं दधेयम्** इति पठेत्। अत्र तूष्णीमिति केचित् आचार्या परिधापयन्ति।

अथाचार्यो माणवकाय दण्ड[२] दद्यात्। ततो वटुः **ॐ यो मे दण्डं इति प्रजापतिर्ऋषिर्दण्डो देवता यजुः दण्डपरिग्रहणे विनियोगः।** इति ऋष्यादिकं स्मृत्वा **ॐ यो मे दण्डः परापतद्वैहायसोऽधिभूम्यां तमहं पुनराददाम्यायुषे ब्रह्मणे ब्रह्मवर्चसाय॥** इति पठन् ग्रहणं कुर्यात्। तत आचार्यो वारिणा स्वमञ्जलिं पूरयित्वा तेनैव जलेन च कुमारस्याञ्जलिं पूरयेत्। तत आचार्यः कुशत्रयेण तज्जलमानीय वटुं पावयेत् **ॐ आपो हि ष्ठा मयोभुवः ॐ ता न ऊर्जे दधातन ॐ महेरणाय चक्षसे ॐ यो वः शिवतमो रसः ॐ तस्य भाजयतेह नः ॐ उशतीरिव मातरः ॐ तस्माऽआरङ्गमाम वः ॐ यस्य क्षयाय जिन्वथ ॐ आपो जनयथा च नः** इति ऋचः पठेत्। ततः सूर्यमुदीक्षस्वेति आचार्यप्रैषानन्तरं वटुः सूर्यं पश्यन् **ॐ तच्चक्षुर्देवहितं पुरस्ताच्छुक्रमुच्चरत्। पश्येम शरदः शतं जीवेम शरदः शतꣳ शृणुयाम शरदः शतं प्रब्रवाम शरदः शतमदीनाः स्याम शरदः शतं भूयश्च शरदः शतात्।** इति पठेत्। अथ कुमारस्य दक्षिणांसं सहृदयं दक्षिणहस्तेन स्पृष्ट्वाऽऽचार्यः **"ॐ मम व्रते ते हृदयं दधामि मम चित्तमनुचित्तं तेऽस्तु। मम वाचमेकमना जुषस्व बृहस्पतिष्ट्वा नियुनक्तु मह्यम्।"** इति पठेत्। ततो वटोर्दक्षिणहस्तमाचार्यः स्वदक्षिणहस्तेन गृहीत्वा तं **"किन्नामासि भोः"** इति पृच्छेत्॥ कुमारश्च **"अमुकशर्माहं भोः"** इति स्वनाम निबोधयेत्। ततः आचार्येण **'कस्य ब्रह्मचार्यसि'** इति पृष्टः कुमारः **'भवत'** इति प्रतिब्रूयात्। अथाचार्यः **"ॐ इन्द्रस्य ब्रह्मचार्यस्यग्निराचार्यस्तवाहमाचार्यः श्रीअमुकशर्मन्** इति ब्रूयात्। अथ

---

१. अजिनं त्र्यङ्गुलं वापि चतुरङ्गुलविस्तृतम्। बहिः सरोम सङ्गृह्य धारयेदुपवीतकाम्॥

२. ब्राह्मणो बैल्वपालाशौ क्षत्रियो वाटखादिरौ।
पैप्पलौदुम्बरौ वैश्योदण्डानर्हन्ति धर्मतः॥ (मनुः)
एतेषामप्यलाभे तु सर्वेषां सर्वयज्ञियाः॥ (यमः)
ऋजवास्ते तु सर्वे स्युरव्रणाः सौम्यदर्शनाः।
अनुद्वेगकरा दण्डाः सत्वचो नाग्निदूषिताः॥ (गौतमः)

बद्धाञ्जलिं माणवकं पूर्वादिदिक्षु प्रदक्षिणमुपस्थानं कारयन्नाचार्यः **ॐ प्रजापतये त्वा परिददामि** इति प्राच्याम्। **ॐ देवाय त्वा सवित्रे परिददामि** इति दक्षिणस्याम्। **ॐ अद्भ्यस्त्वौषधीभ्यः परिददामि** इति प्रतीच्याम्। **ॐ द्यावापृथिवीभ्यां त्वा परिददामि** इति उदीच्याम् **ॐ विश्वेभ्यस्त्वा देवेभ्यः परिददामि** इत्यधः। **ॐ सर्वेभ्यस्त्वा भूतेभ्यः परिददाम्यरिष्टयै** इत्यूर्ध्वम्। ततः कुमारोऽग्निं प्रदक्षिणीकृत्य आचार्यदक्षिणदिशि उपविशेत्। अथ माणवकः सद्रव्याक्षतवस्त्रं जलमादाय **ॐ अद्येत्यादिना देशकालस्वात्मनामादि पठित्वा कर्त्तव्योपनयन[१]होमकर्मणि कृताकृतावेक्षणरूपब्रह्मकर्म कर्तुममुकगोत्रममुकशर्माणमेभिरक्षतवस्त्रद्रव्यैर्ब्रह्मत्वेन त्वामहं वृणे।** ततो ब्रह्मोपवेशनादिपर्युक्षणान्तं कृत्वा स्रुवेणाज्यहोमः। **ॐ प्रजापतये स्वाहा, इदं प्रजापतये। ॐ इन्द्राय स्वाहा, इदमिन्द्राय। ॐ अग्नये स्वाहा, इदमग्नये। ॐ सोमाय स्वाहा, इदं सोमाय। ॐ भूः स्वाहा, इदमग्नये। ॐ भुवः स्वाहा, इदं वायवे। ॐ स्वः स्वाहा, इदं सूर्याय। ॐ त्वन्नो अग्ने वरुणस्य विद्वान्देवस्य हेडो अवयासि सीष्ठाः। यजिष्ठो बह्नितमः शोशुचानो विश्वा द्वेषाꣳसि प्रमुमुग्ध्यस्मत् स्वाहा।** इदमग्नीवरुणाभ्याम्। **ॐ स त्वन्नो अग्ने अवमो भवोति नेदिष्ठो अस्या उषसो व्युष्टो अवयक्ष्व नो वरुणꣳरराणो व्रीहि मृडीकꣳसुहवो न एधि स्वाहा।**

---

१. यज्ञोपवीते नवसूत्राणि तद् यथा-

तिथिवारञ्च नक्षत्रं च तत्त्ववेदगुणान्वितम्।
कालत्रयं च मासाश्च ब्रह्मसूत्रं हि षण्णवम्॥
ओङ्कारोऽग्निश्च नागश्च सोमः पितृप्रजापती।
वायुः सूर्यश्च शर्वश्च तन्तुदेवा अमीनव॥
नाभेरुर्ध्वमनायुष्यमधो नाभेस्तपः क्षयः।
तस्मान्नाभिसमं कुर्यादुपवीतं विचक्षणः॥ (वशिष्ठः)
उपवीतं बटोरेकं द्वे तत्रेतरयोः स्मृते।
एकमेव यतीनां स्यादिति शास्त्रस्य निश्चयः॥ (भृगुः)
ग्रामान्निष्क्रम्य सङ्ख्याय षण्णवत्यङ्गुलीषु तत्।
तावत्त्रिगुणितं सूतं प्रक्षाल्याब्लिङ्गकैः शुभैः।
देवागारेऽथवा गोष्ठे नद्यां वाऽन्यत्रवा शुचौ॥
सावित्र्या त्रिवृतं कुर्यान्नवसूत्रं तु तद्भवेत्॥ (देवलः)

इदमग्नीवरुणाभ्याम्। ॐ अयाश्चाग्ने स्यनभिशस्तिपाश्च सत्वमित्वमयाऽसि। अया नो यज्ञं वहास्ययानो धेहि भेषजꣳस्वाहा इदमग्नये। ये ते शतं वरुण ये सहस्त्रं यज्ञियाः पाशा वितता महान्तः। तेभिर्नो अद्य सवितोत विष्णुर्विश्वे मुञ्चन्तु मरुतः स्वर्क्काः स्वाहा। इदं वरुणाय सवित्रे विष्णवे विश्वेभ्यो देवेभ्यो मरुद्भ्यः स्वर्क्केभ्यश्च। ॐ उदुत्तमं वरुण पाशमस्मदवाधमं विमध्यमꣳश्रथाय। अथावयमादित्यव्रते तवानागसो अदितये स्याम स्वाहा इदं वरुणाय। ॐ प्रजापतये स्वाहा इदं प्रजापतये। अग्नये स्विष्टकृते स्वाहा इदमग्नये स्विष्टकृते। ततः कुमारः संस्त्रवप्राशनं कृत्वाऽऽचम्य च ब्रह्मणे पूर्णपात्रं दद्यात्। तद्यथा अद्येत्यादि पठित्वा देशकालादि स्मृत्वा अमुकगोत्रोऽमुकशर्माहं एतस्मिन्नुपनयनहोमकर्मणि कृताकृतावेक्षण- रूपब्रह्म-कर्मप्रतिष्ठार्थमिदं पूर्णपात्रम् प्रजापतिदैवतम् अमुकगोत्रायामुकशर्मणे ब्रह्मणे दक्षिणां तुभ्यं सम्प्रददे। ततो ब्राह्मणः स्वस्ति इति प्रतिवदेत्। ब्रह्मग्रन्थिं विमोचयेत्। ॐ सुमित्रिया न आप ओषधयः सन्तु इति पठित्वा पवित्राभ्यां जलमानीय तेन कुमारस्य शिरः सम्मृज्य च दुर्मित्रियास्तस्मै सन्तु योऽस्मान् द्वेष्टिं यं च वयं द्विष्मः। इत्यैशान्यां प्रणीतां न्युब्जीकुर्यात्। तत आस्तरणक्रमेण बर्हिरुत्थाप्य घृतेनाभिघार्य हस्तेनैव जुहुयात्। तत्र मन्त्रः ॐ देवागातु विदोगातु वित्वा गातुमित मनसस्पत इमं देव यज्ञꣳस्वाहा वातेधाः स्वाहा। ततः आचार्यः कुमारस्यानुशासनं करोति। तत्राद्यमाचार्यस्य द्वितीयवटोश्च वचनं[१] तद्यथा- ॐ ब्रह्मचार्यसि, असानि, अपोऽशान, अशानि, कर्मकुरु,

१. वर्जयेन्मधुमासं च गन्धमाल्यरसान् स्त्रियः। शुल्कानि चैव सर्वाणि प्राणिनां च विहिंसनम्॥
अभ्यङ्गमञ्जनं चाक्ष्णोरुपानच्छत्रधारणम्। कामं क्रोधं च लोभं च नर्तनं गीतवादने॥
स्त्रीणां प्रेक्षणालम्भमुपघातं परस्य च॥ (मनुः)
भैक्षमाहृत्य भुञ्जीयात्सायं प्रातर्गुरौ वसन्। देवर्षिपितृपूजां च कुर्याद्वा गुर्वनुज्ञया॥
न भक्षयेच्च ताम्बूलमथ मैथुनमेव च। वर्जयेल्लशुनं लाजान् लाजापूपादिकान् व्रती॥
अङ्गवङ्गकलिङ्गांश्च सौराष्ट्रमगधांस्तथा। तीर्थयात्रां विना गत्वा पुनः संस्कारमर्हति॥
अञ्जनाभ्यञ्जने क्षौद्रं गन्धपुष्पाक्षतान्व्रती। वर्जयेत्पादुके छत्रं यानोष्णीषरथादिकान्॥
न शयीतान्तरिक्षे तु नाशुचौ न परैः सह।
न वासीत न नग्नश्च नालीकं विभृयाद्व्रती॥ (आश्वलायन)

करवाणि, मा दिवा सुषुप्स्व, न स्वपानि, वाचं, यच्छानि, समिधमाधेहि, आदधानि। अथाग्नेरुत्तरतः प्रत्यङ्मुखायोपविष्टाय स्वचरणोपसङ्ग्रहण-पूर्वकमुपसन्नाय स्वयमीक्षमाणायाचार्यः स्वयमपि समीक्षितायास्मै निवारितशङ्खतूर्यादिशब्दः सुशोभने लग्ने नवांशके सावित्री[१] दक्षिणकर्णे पीताम्बरमण्डपान्तरुपदिशेत्। तत्र **ॐ भूर्भुवः स्वः तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि धियो यो नः प्रचोदयात् ॐ।** इति उपदिशेत्। ततः शुष्कारण्यकगोमयेन्धनेन घृताक्तेन जुहुयात्। यथा **ॐ अग्ने सुश्रवः सुश्रवसं मां कुरु। ॐ यथा त्वमग्ने सुश्रवः सुश्रवा असि। ॐ एवं मां सुश्रवः सौश्रवसं कुरु। ॐ यथात्वमग्ने देवानां यज्ञस्य निधिपा असि। ॐ एवमहं मनुष्याणां वेदस्य निधिपो भूयासं स्वाहा।** इति। ततः पुनर्द्विवारमनेनैव मन्त्रेण जुहुयात्। अथ प्रदक्षिणमग्निं वारिणा पर्युक्ष्य उत्थाय स्वप्रादेशमितां घृताक्तां पलाशसमिध[२]मादाय जुहुयात्। तन्मन्त्र- **ॐ अग्नये समिधमाहार्षं बृहते जातवेदसे यथात्वमग्ने समिधा समिध्यस एवमहमायुषा मेधया वर्चसा प्रजया पशुभिर्ब्रह्मवर्चसेन समिन्धे जीवपुत्रो ममाचार्यो मेधाव्यह-मसान्यनिराकरिष्णुर्यशस्वी ब्रह्मवर्चस्यन्नादो भूयासं स्वाहा।** ततः **ॐ अग्ने सुश्रवः सौश्रवसं कुरु। ॐ यथात्वमग्ने देवानां यज्ञस्य निधिपा असि। ॐ एवमहं मनुष्याणां वेदस्य निधिपो भूयासꣳस्वाहा** इति। ततः प्रदक्षिणक्रमेणाग्निं पर्युक्ष्य तूष्णीं पाणी प्रतप्य कुमारः प्रतिमन्त्रपाठान्ते मुखमवमृशेत्। तत्र मन्त्राः **ॐ तनूपा अग्नेऽसि तन्वं मे पाहि। ॐ आयुर्दा अग्नेऽस्यायुर्मे देहि। ॐ वर्चोदा अग्नेऽसि वर्चो मे देहि। ॐ**

---

१. प्रणवं प्राक् प्रयुञ्जीत व्याहृतीस्तदनन्तरम्।
सावित याश्चानुवचनं ततो वृत्तान्तमारभेत्॥ (संवर्तः)
चतुर्वेदेषु गायत्री चतुर्विंशतिकाक्षरी।
तस्माच्चतुर्गुणं कृत्वा ब्रह्मतन्तुमुदीरयेत्॥

२. नाङ्गुष्ठादधिका कार्या समित्स्थूलतया क्वचित्।
न विहीना त्वचा चैव न सकीटा न पाटिता॥
प्रादेशान्नाधिका नोना तथा न स्याद् विशाखिका॥
विशीर्णा विदला ह्रस्वा वक्रा ससुषिरा कृशाः।
दीर्घाः स्थूलाश्च समिधो वर्जनीया प्रयत्नतः॥ (कात्यायनः)

अग्ने यन्मे तन्वा ऊनं तन्म आपृण ॐ मेधां मे देवः सविता आदधातु ॐ मेधां मेऽश्विनौ देवावाधत्तां पुष्करस्रजौ॥ ततः सर्वाणि गात्राणि दक्षिण पाणिना स्पृशेत्। तत्र मन्त्रो यथा **ॐ अङ्गानि च मे आप्यायन्ताम् ॐ वाक् च मे आप्यायताम् मुखे। ॐ प्राणश्च मे आप्याताम्** इति नासिका। **ॐ चतुश्च मे आप्यायताम्** इति। चक्षुषी। **ॐ श्रोत्रं च मे आप्यायताम्** इति श्रोत्रे च स्पृशेत्। ततः **ॐ यशोबलं च मे आप्यायताम्** इति पुनर्मन्त्रं पठेत्। ततो दक्षिणकरानामिकाग्रगृहीतभस्मना ललाटे ग्रीवायां दक्षिणबाहुमूले हृदि च त्र्यायुषं कुर्यात्। तद् यथा- **ॐ त्र्यायुषं जमदग्ने** इति ललाटे। **ॐ कश्यपस्य त्र्यायुषमिति** ग्रीवायाम्। **ॐ यद्देवेषु त्र्यायुषमिति** दक्षिणबाहुमूले। **ॐ तन्नोऽस्तु त्र्यायुषमिति** हृदि। ततो व्यस्तपाणिभ्यां पृथिवीं स्पृशन् कुमारोऽभिवादनं कुर्यात्। यथा **ॐ अमुकगोत्रोऽमुकप्रवरोऽमुकशर्माहं भो वैश्वानर त्वामभिवादये।** ततोऽनेनैव-क्रमेण सम्बोध्य वरुणमभिवाद्य आचार्यं तथैवाभिवादयेत्। ततः **आयुष्मान् भव सौम्येत्याचार्यो** ब्रूयात्। ततो वटुर्भिक्षापात्रमादाय प्रथमं मातुः सकाशात् भिक्षामादातुं सदण्डमृगचर्मा गत्वा **ॐ भवति भिक्षां मे देहि** अत्र यदि वटुः क्षत्रस्तदा **भिक्षां भवति मे देहि** इति, वैश्यश्चेत्- **भिक्षां मे देहि भवति** इति याचेत्।[1] तद्दत्तां भिक्षां चादायाचार्याय निवेदयेत्। ततः पुनस्तथैव भिक्षापात्रमादायान्यतोऽपि याचेत्। तत आचार्येण भुंक्ष्व इत्यनुज्ञात एव भिक्षां स्वीकुर्यात्। ततः सफलघृतपूर्णस्रुवेण ब्रह्मचारिदक्षिणकरस्पष्ट आचार्यः पूर्णाहुतिं दद्यात्। तत्र मन्त्रः **ॐ मूर्धानं दिवो अरतिं पृथिव्या वैश्वानरमृत आजातमग्निं कवि ँ सम्राजमतिथिं जनानामासन्ना पात्रं जनयन्त देवाः स्वाहा।** ततः स्रुवेण भस्मानीय पूर्ववत् त्र्यायुषं कुर्यात्। कुमारायाचार्यः ब्रह्मचारिनियमान् बोधयेत्। तद्यथाक्षारलवणमधुमांसादिनिवृत्तिः, उद्धृतजलस्नानं, दण्डकृष्णाजिनधारणम्, वृक्षारोहणविषमभूमिलङ्घन-नग्नस्त्रीनिरीक्षणत्यागोपसंभोगव्यसनरूपव्यावृत्तिश्चेति। ततो ब्रह्मचारी जलं

---

१. मातरं वा स्वसारं वा मातुर्वा भगिनीं निजाम्। भिक्षेद् भिक्षां तु प्रथमां या चैनं नावमानयेत्॥
भवत्पूर्वं चरेद् भैक्षं ब्राह्मणस्तु समाहितः।
भवन्मध्यस्तु राजन्यो वैश्यस्तु भवदुत्तरम्॥ (मनुः)

हस्त आदाय **कृतस्योपनयनकर्मणः साङ्गतासिद्ध्यर्थं दशसङ्ख्यकान् ब्राह्मणान् भोजयिष्ये** इति कथयित्वा ब्राह्मणभोजनं विदध्यात्। पुनश्च **कृतस्योपनयनकर्मणः साङ्गतासिद्ध्यर्थमाचार्याय दक्षिणां दातुमहमुत्सृजे।** भूयसी दक्षिणां च सङ्कल्प्य दद्यात्। ततः **प्रमादात्कुर्वतां कर्म प्रच्यवेताध्वरेषु यत्। स्मरणादेव तद्विष्णोः सम्पूर्णं स्यादिति श्रुतिः॥** इति पठित्वा क्षमाप्रार्थनां कुर्यात्।

॥ इत्युपनयन[2] संस्कारः ॥

अथ वेदारम्भसंस्कारः

तत आचार्यो द्वितीयवेद्यां कुशकण्डिकया संशोध्याऽग्निं संस्थाप्य ब्रह्मणः प्रतिष्ठां वरणं च कुर्यात्। तत्र सङ्कल्पे **वेदारम्भहोमकर्म करिष्ये** इति पठेत्। ततो ब्रह्मोपवेशनादिपर्युक्षणान्तं कृत्वा ब्रह्मणान्वारब्धः पातितजानुः समिद्धेऽग्नौ जुहुयात्। तत्र प्रथमे आहुतिचतुष्टये हुतशेषस्य प्रोक्षणीपात्रे प्रक्षेपः **ॐ प्रजापतये स्वाहा इदं प्रजापतये। ॐ इन्द्राय स्वाहा इदमिन्द्राय। ॐ अग्नये स्वाहा इदमग्नये। ॐ सोमाय स्वाहा इदं सोमाय।** अथ ब्रह्मणाऽनन्वारब्धो जुहुयात् **ॐ अन्तरिक्षाय स्वाहा इदमन्तरिक्षाय। ॐ वायवे स्वाहा इदं वायवे ॐ ब्रह्मणे स्वाहा इदं ब्रह्मणे। ॐ छन्दोभ्यः स्वाहा इदं छन्दोभ्यः ॐ प्रजापतये स्वाहा इदं प्रजापतये। ॐ देवेभ्य स्वाहा इदं देवेभ्यः। ॐ ऋषिभ्यः स्वाहा इदं ऋषिभ्यः। ॐ श्रद्धायै स्वाहा इदं श्रद्धायै। ॐ मेधायै स्वाहा। इदं मेधायै। ॐ सदसस्पतये स्वाहा इदं सदसस्पतये। ॐ अनुमतये स्वाहा इदमनुमतये। ॐ भूः स्वाहा इदमग्नये ॐ भुवः स्वाहा इदं वायवे। ॐ स्वः स्वाहा इदं सूर्याय।** ततः **ॐ त्वन्नो अग्ने वरुणस्य विद्वान्देवस्ये**त्यादिमन्त्रेण आहुतिं कुर्यात्। पुनः **ॐ सत्त्वन्नो अग्नेऽवमो** इत्यादिना **ॐ अयाश्चाग्नेस्येति**

---

१. पुराकल्पे तु नारीणां मौञ्जीबन्धनमिष्यते। अध्यापनं च वेदानां सावित्रीवाचनं तथा॥ पिता पितृव्यो भ्राता वा नैनामध्यापयेत्परः। स्वगृहे चैव कन्याया भैक्षचर्या विधीयते। वर्जयेदजिनं चीरं जटाधारणमेव च॥ (यमः)

मन्त्रेण। ॐ ये ते शतं वरुण ये सहस्त्रमित्यादि। ॐ उदुत्तमं वरुण पाशमस्मदवाधममित्यादि। पुनश्च प्राजापत्याहुतिं स्विष्टकृदाहुतिं च दत्त्वा संस्त्रवप्राशनं कृत्वाऽऽचम्य ब्रह्मणे पूर्णपात्रं दद्यात्। ततो ब्रह्मग्रन्थिं विमोच्याचार्यः पवित्राभ्यां प्रणीताजलमानीय तेन **ॐ सुमित्रिया न आप औषधयः सन्तु** इति मन्त्रेण कुमारस्य शिरोमार्जनं कृत्वा **ॐ दुर्मित्रियास्तस्मै सन्तु** इत्यादिना प्रणीतापात्रमैशान्यां न्युब्जीकुर्यात्। **ॐ देवागातु विदोगातु** इत्यादिना बर्हिर्हुत्वा लोकाचारतः काश्मीरकाश्यादि प्रति कुमारो वेदाभ्यासाय गच्छेत्। गुरुश्चात्रैव सर्वाणि शास्त्राण्यध्यापयिष्यामि इति पुनस्तं प्रत्यावर्त्य गायत्रीमन्त्रं पाठयेत्। ततः कुमारः **ॐ मूर्धानमिति** मन्त्रेण पूर्णाहुतिं दद्यात् उपविश्य च स्त्रुवेण भस्मानीय दक्षिणानामिकाग्रगृहीतभस्मना **ॐ त्र्यायुषं जमदग्नेरित्यादिना त्र्यायुषं** कुर्यात्। ततः **ॐ पावका नः सरस्वती वाजेभिर्वाजिनीवति। यज्ञं वष्टुधिया वसुः।** इति मन्त्रं पठित्वावेदसरस्वतीमावाह्य तत्र वेदसरस्वतीं प्रतिष्ठाप्य, **वेदोऽसि येन त्वम् श्रीश्च ते** इति ऋग्भिः षोडशोपचारैः सम्पूज्य, ततः प्रत्यङ्मुखायोपविष्टाय, पादोपसङ्ग्रहणपूर्वकमाचार्यमुखं समीक्षमाणाय हस्तौ जानुभ्यामुपरि कृतवते वेदं प्रयच्छति ब्रह्मचारिणे, आचार्यः। **ॐ भूर्भुवः स्वः, ॐ तत्सवितुः** इति पूर्वं गायत्रीमुच्चार्य प्रथमं यजुर्वेदं, **ॐ इषे त्वोर्जे त्वा व्वामवस्थ देवो वः सविता प्रार्पयतु श्रेष्ठतमाय कर्मणऽआप्यायध्व मध्न्याऽइन्द्राय भागमप्रजावती रनमीबाऽअयक्ष्मा मावस्तेनऽईशत माघशꣳसो ध्रुवाऽअस्मिन् गोपतौ स्यात् बह्वीर्यजमानस्य पशून् पाहि॥१॥** इति यजुर्वेदः **ॐ अग्निमीळे पुरोहितं यज्ञस्य देवमृत्विजम्॥ होतारं रत्नधातमम्॥१॥** इति ऋग्वेदः॥ **ॐ अग्नऽऽयाहि वीतये गृणानो हव्यदातये॥ निहोता सत्सि बर्हिषि॥१॥** इति सामवेदः। **ॐ शन्नो देवी रभिष्टय आपो भवन्तु पीतये॥ शंय्योरभिस्त्रवन्तु नः॥१॥** इत्यथर्ववेदः। **ॐ स्वस्ति।।** ततः सावित्रीमन्त्रं पठित्वा स्वशास्त्रानुसारं वेदानभ्यसेत्। अत्र वेदपुरुषसरस्वतीगणेशसावित्रीविष्णुलक्ष्मीत्यादीनां पूजनमपि केचिद् वदन्ति। तत्सर्वं कुलाचारानुसारं सम्पादनीयम्। ततो **वेदारम्भकर्मणः साङ्गतासिद्ध्यर्थं दशब्राह्मणान् भोजयिष्ये तथा च कृतस्याऽस्य**

वेदारम्भकर्मणः साङ्गतासिद्ध्यर्थं तन्मध्ये न्यूनातिरिक्तदोषपरिहारार्थं नानानामगोत्रेभ्यो ब्राह्मणेभ्यो भूयसीं दक्षिणां दातुमहमुत्सृजे इति सङ्कल्प्य विप्रभोजनभूयसीदक्षिणादिकं कृत्यं विदध्यात्। पुनश्च '**प्रमादात्कुर्वतां कर्मे**' ति पठित्वा क्षमाप्रार्थनां कुर्यात्॥

॥ इति [१]वेदारम्भसंस्कारः ॥

अथ केशान्तसंस्कारः

वेदव्रतविसर्गात्पूर्वं कालापकर्षणं कृत्वा, उदगयने शुक्लपक्षे चौलोक्ततिथ्यादौ गोदानं केशानां खण्डनं वपनं वा कुर्यात्। तत आचार्यो बहिः शालायां पत्न्या सह शुभासने उपविश्य, तद्दक्षिणतो ब्रह्मचारिणमुपवेश्य, आचम्य प्राणानायम्य, देशकालकीर्त्तनान्ते, **अस्य ब्रह्मचारिणः केशान्तकर्म करिष्ये, तदङ्गविहितं गणपतिपूजनं, स्वस्तिपुण्याहवाचनमविघ्नपूजनं, मण्डपस्थापनं, मातृकापूजनं, वसोर्द्धारा आयुष्यमन्त्रजपं, नान्दीश्राद्धञ्च करिष्ये** इति सङ्कल्प्य, तन्निखिलञ्च कर्म कृत्वा, बहिः शालायां स्थण्डिले पञ्चभूसंस्कारपूर्वकं सूर्यनामाग्निं प्रतिष्ठाप्य ततो ब्रह्मोपवेशनादिपात्रासादनं कर्म विधाय, वस्तून्येतान्युपकल्पनीयानि–तद्यथा शीतोदकम्, नवनीतपिण्डः घृतपिण्डो वा। गोदानकुशलो नापितः त्रेणी शलली, सप्तविंशतितरुणकुशानि, आनडुहगोमयपिण्डश्चैतानि वस्तून्युपकल्प्य, पवित्रच्छेदनादि पर्युक्षणान्ते, आधारावाज्यभागौ च हुत्वा, ततो महाव्याहृत्यादिस्विष्टकृदन्तं दशाहुतयः– तद्यथा– **ॐ प्रजापतये स्वाहा, इदं प्रजापतये। ॐ इन्द्राय स्वाहा, इदमिन्द्राय। ॐ अग्नये स्वाहा, इदमग्नये। ॐ भूः स्वाहा इदमग्नये। ॐ भुवः स्वाहा, इदं वायवे। ॐ स्वः स्वाहा, इदं सूर्याय। ॐ त्वन्नोअग्ने॰ इदमग्नीवरुणाभ्याम्। ॐ सत्वन्नोऽअग्ने॰ इदमग्नीवरुणा- भ्याम्। ॐ अयाश्चाग्ने॰ इदमग्नये। ॐ ये ते शतं॰ इदं वरुणाय, सवित्रे। ॐ**

---

१. योऽनधीत्य द्विजो वेदमन्यत्र कुरुते श्रमम्।
स जीवन्नेव शूद्रत्वमाशु गच्छति सान्वयः॥ (मनुः)

उदुत्तमं इदं॰ वरुणायादित्याय। **ॐ प्रजापतये स्वाहा, इदं प्रजापतये। ॐ अग्नये स्विष्टकृते स्वाहा, इदमग्नये स्विष्टकृते।** ततः संस्रवप्राशनादिप्रणीताविमोकान्तं होमशेषं समाप्य, ततो मातुरङ्के ब्रह्मचारिणमुपवेश्य, एकस्मिन् पात्रे शीतासु-अप्सु-उष्णा आप आसिञ्च्य, शिरसि नवनीतपिण्डं प्रास्य, तत उदकमादाय, **ॐ सवित्रा प्रसूता॰** इति मन्त्रेण दक्षिणगोदानमुन्दति, ततः त्रेण्या शलल्या विनीय, त्रीणि कुशतरुणान्यन्तर्धाय, **ॐ ओषधे त्रायस्व** इति मन्त्रेण, ततः **ॐ शिवो नामासि**, इति मन्त्रेण क्षुरग्रहणम्। ततः **ॐ निवर्तयाम्या॰** इति मन्त्रेण केशकुशसंलग्नीकरणम्। **ॐ येनापवत्॰** इति मन्त्रेण केशान् प्रच्छिद्य आनडुहे गोमयपिण्डे प्रास्येत्। एवमेवापरं वारद्वयं दक्षिणगोदाने तूष्णीं कर्म कर्तव्यम्। ततः पश्चिमगोदाने उन्दनादि संलग्नीकरणान्तमेकवारं पूर्ववत् समन्त्रकं कुर्यात्। **ॐ येन भूरिश्च॰**, मन्त्रेण प्रच्छिद्यानडुहे गोमयपिण्डे प्रास्य, पुनरुत्तरगोदाने पुनर्वारद्वयमेवं तूष्णीं कर्म कर्तव्यम्। ततः शिरः समन्तान्मुखान्तं क्षुरं त्रिवारं - **ॐ यत्क्षुरेण मज्ज॰, शिरोमास्यायुः प्रमोषी मुखम्**- इति मन्त्रेण भ्रामयित्वा, ततः शिरः समुन्द्य नापिताय क्षुरं प्रयच्छेत्, तन्मन्त्रः **ॐ अक्षण्वं वपति।** नापितः शिखां रक्षित्वा केशश्मश्रुवपनं कुर्यात्। ततो ब्रह्मचारिणः स्नानं विहितम् सर्वेषु संस्कारकर्मस्वाधानादिविवाहान्तेषु पितैव कर्ता, तदभावेऽन्यः। यथाशक्ति ब्राह्मणान्भोजयित्वा, मातृणां विसर्जनं कुर्यात्।

॥ इति केशान्तसंस्कारः ॥

अथ समावर्त्तनसंस्कारः

अधीतवेदेन कुमारेण स्नास्यामिति प्रार्थित आचार्यः स्नाहि इति अनु[१]जानीयात्। ततः कुमारे स्नाते आचार्यः वेदीसंस्कारान् कृत्वा

---

१. गुरवे तु वरं दत्त्वा स्नायीत तदनुज्ञया। वेदं व्रतानि वा पारं नीत्वा ह्युभयमेव वा॥
(याज्ञवल्क्यः)

वेदं वेदौ तथावेदान् वा चतुरो द्विजः। अधीत्य अधिगम्यार्थं ततः स्नायाद् द्विजोत्तमः॥

अग्निस्थापनपूर्वकं ब्रह्मणो वरणं कुमारद्वारेण कारयेत्। तत्र च सङ्कल्पे "समावर्त्तनहोमकर्मणि" इति विशेषपाठः। ततश्च ब्रह्मोपवेशनादि अग्निपर्युक्षणान्तं विधिं कारयित्वा कुशेन ब्रह्मणा[१]न्वारब्धः स्रुवेणाज्याहुतिं जुहुयात्। हुतशेषस्य प्रोक्षणीपात्रे प्रक्षेपः, केवलमाहुतिप्रथमचतुष्टये। **ॐ प्रजापतये स्वाहा इदं प्रजापतये। ॐ इन्द्राय स्वाहा इदमिन्द्राय। ॐ अग्नये स्वाहा इदमग्नये। ॐ सोमाय स्वाहा इदं सोमाय।** ततोऽनन्वारब्धः। **ॐ अन्तरिक्षाय स्वाहा इदमन्तरिक्षाय। ॐ वायवे स्वाहा इदं वायवे। ॐ ब्रह्मणे स्वाहा इदं ब्रह्मणे। ॐ देवेभ्यः स्वाहा इदं देवेभ्यः। ॐ ऋषिभ्यः स्वाहा इदं ऋषिभ्यः। ॐ श्रद्धायै स्वाहा इदं श्रद्धायै। ॐ मेधायै स्वाहा इदं मेधायै। ॐ सदसस्पतये स्वाहा इदं सदसस्पतये। ॐ अनुमतये स्वाहा इदमनुमतये। ॐ भूः स्वाहा इदमग्नये। ॐ भुवः स्वाहा इदं वायवे। ॐ स्वः स्वाहा इदं सूर्याय। ॐ त्वग्नोऽग्ने वरुणस्य विद्वान्देवस्येति** स्वाहा। **ॐ सत्त्वन्नो अग्नेऽवमो** इत्यादि स्वाहा। **ॐ अयाचाग्नेस्यनभिशस्तिपाश्च** इत्यादिना स्वाहा। **ॐ ये ते शतमित्यादिना** स्वाहा। **ॐ उदुत्तमम्** इत्यादि स्वाहा। ततश्च प्राजापत्याहुतिं स्विष्टकृताहुतिं

---

१. अन्वारम्भे कृते होमे ब्रह्मणे दक्षिणे करे। बहुकाष्ठैः समिन्धीयादर्चिष्मन्तं क्रिया क्षमम्॥
भूरादिनवसु स्विष्टकृतिस्वाद्यचतुष्ट्ये। अन्वारब्धो भवेत्तेषु सोऽन्वारम्भः कुशेन हि॥
स्नातकनियमाः- शुक्लाम्बरधरो नीचकेशश्मश्रुनखः शुचिः।
न भार्या दर्शनेऽश्नीयान्नैक वासा न संस्थितः॥
न संशयं प्रपद्येत नाकस्मादप्रियं वदेत्। नाहितं नानृतं चैव न स्तेनः स्यान्न वार्धुषी॥
स्नातक नियमाः – न तु मेहेन्नदीछायावर्त्मगोष्ठाम्बुभस्मसु।
न प्रत्यर्कगोसोमसन्ध्याम्बुस्त्रीद्विजन्मनः। नेक्षेतार्कं न नग्नां स्त्रीं न च संसृष्टमैथुनाम्॥
न च मूत्रं पुरीषं वा नाशुची राहुतारकाः। ष्ठीवनाऽसृक्शकृन्मूत्ररेतांस्यप्सु न निक्षिपेत्॥
पादौ प्रतापयेन्नाग्नौ न चैनमतिलङ्घयेत्। जलं पिवेन्नाञ्जलिना न शयानं प्रबोधयेत्॥
नाक्षैः क्रीडेन्न धर्मघ्नैर्व्याधितैर्वा न संविशेत्। विरुद्धं वर्जयेत्कर्म प्रेतधूमं नदीतरम्॥
केशभस्मतुषाङ्गारकपालेषु न संस्थितिम्। नाचक्षीत धयन्तीं गां नाऽद्वारेण विशेत्क्वचित्॥
न राज्ञः प्रतिगृह्णीयाल्लुब्धस्योच्छास्त्रवर्तिनः। श्रुतिस्मृत्युदितं कर्म नित्यं सम्यक् समाचरेत्॥
गोब्राह्मणानलान्नानि नोच्छिष्टो न पदा स्पृशेत्। न निन्दाताडने कुर्यात्पुत्रं शिष्यं च ताडयेत्॥
न म्लेच्छभाषां शिक्षेत न पश्येदात्मनः शकृत्। वर्जयेन्मार्जनीरेणुं नापेयं च पिवेद्द्विजः॥
नेक्षेतोद्यन्तमादित्यं नास्तंयन्तं कदाचन। नोपरक्तं न वारिस्थं न मध्यं नभसोगतम्॥

च दत्वा संस्रवं प्राश्याचम्य च ब्रह्मणे पूर्णपात्रदानं कर्त्तव्यम्। ब्राह्मणश्च स्वस्तीत्युक्त्वा ब्रह्मग्रन्थिं विमोच्य पवित्राभ्यां प्रणीताजलमादाय तेन च **ॐ सुमित्रिया न॰** इति कुमारस्य शिरः सम्मृज्य **ॐ दुर्मित्रिया॰** इति मन्त्रेण प्रणीता न्युब्जीकरणम् **ॐ देवागातु विदो गातुमित्यादिना** बर्हिर्होमः। ततो ब्रह्मणान्वारब्धोऽग्निपश्चिमे उपविष्टो ब्रह्मचारी तत्र घृताक्तशुष्कनिषिद्धेत-रेन्धनेन पञ्चाहुतीर्हस्तेनैव जुहुयात्। यथा- **ॐ अग्ने सुश्रवः सौश्रवसं मां कुरु ॐ यथात्वमग्ने सुश्रवः सुश्रवा असि ॐ एवं मां सुश्रवः सौश्रवसं कुरु ॐ यथात्वमग्ने देवानां यज्ञस्य निधिपा असि ॐ एवमहं मनुष्याणां वेदस्य निधिपो भूयासम्** ततः प्रदक्षिणमग्निं वारिणा पर्युक्ष्य उत्थाप्य घृताक्तां प्रादेशमितां समिधमादाय जुहुयात् **ॐ अग्नये समिधमहार्षं बृहते जातवेदसे यथा त्वमग्ने समिधा समिध्यसे एवमहमायुषा मेधया वर्चसा प्रजया पशुभिर्ब्रह्मवर्चसेन समिन्धे जीवपुत्रो ममाचार्यो मेधाव्यहमसान्यनिराकरिष्णुर्यशस्वी तेजस्वी ब्रह्मवर्चस्यन्नादो भूयास ᳪस्वाहा।** ततः समिदन्तद्वयमनेनैव क्रमेण प्रत्येकं हुत्वोपविश्य तेनैव क्रमेण पञ्चाहुतीर्घृताक्तशुष्कनिषिद्धेतरेन्धनेन जुहुयात्। **ॐ अग्ने सुश्रवः सौश्रवसं मां कुरु ॐ यथा त्वमग्ने सुश्रवः सुश्रवा असि ॐ एवं मां सुश्रवः सौश्रवसं कुरु ॐ यथा त्वमग्ने देवानां यज्ञस्य निधिपा असि ॐ एवमहं मनुष्याणां वेदस्य निधिपो भूयासं ᳪ स्वाहा।** ततः प्रदक्षिणमग्निं वारिणापर्युक्ष्य तूष्णीं पाणी प्रताप्य मुखं प्रतिमन्त्रान्तेऽवमृशेत्। यथा-**ॐ तनूपा अग्नेऽसि तन्वं मे पाहि ॐ आयुर्दा अग्नेऽस्यायुर्मे देहि। ॐ अग्ने यन्मे तन्वा ऊनं तन्मे आपृण। ॐ मेधां मे देवः सविता आदधातु। ॐ मेधां मे देवी सरस्वती आदधातु। ॐ मेधां मे अश्विनौ देवावाधत्तां पुष्करस्रजौ।** ततः सर्वेषु गात्रेषु दक्षिणपाणिना स्पर्शः। **ॐ अङ्गानि च मे आप्यायन्ताम्** इति पठेत्। तत एकैकं मुखाद्यङ्गं स्पृशन् **ॐ वाक् च मे आप्यायतामिति** मुखम्। **ॐ प्राणश्च मे आप्यायतामिति** नासिके। **ॐ चक्षुश्च मे आप्यायतामिति** चक्षुषी। **ॐ श्रोत्रं च मे आप्यायतामिति** श्रोत्रे। **ॐ यशो बलं च मे आप्यायन्तामिति** मन्त्रं केवलं पठेत्। ततो दक्षिणकरानामिकाग्रगृहीतभस्मना ललाटग्रीवायां

दक्षिणबाहुमूले हृदि च त्र्यायुषं कुर्यात्। **ॐ त्र्यायुषं जमदग्नेरिति** ललाटे **ॐ कश्यपस्य त्र्यायुषमिति** ग्रीवायाम्। **ॐ यद्देवेषु त्र्यायुषमिति** दक्षिणबाहुमूले। **ॐ तन्नोऽस्तु त्र्यायुषमिति** हृदि। ततो व्यस्ताभ्यां पाणिभ्यां भूमिं स्पृशन् संबोध्याग्न्यादीन् प्रणमेत्। यथा- **अमुकगोत्रोऽमुकशर्माहं भो वैश्वानर त्वामभिवादये।** एवं वरुणमाचार्यं चाभिवादयेत्। ततः **आयुष्मान् भव सौम्य,** इत्याचार्यो[१] ब्रूयात्। ततोऽग्नेरुत्तरतः प्रागग्रकुशोपरि दक्षिणोत्तरं वारिपूर्णपात्राष्टकं निधायाम्रपल्लवाग्रेणाद्यपात्रस्थजलमादाय कुमारोऽभि-षिञ्चेत्। तत्र मन्त्रः **ॐ येऽप्स्वतरग्नयः प्रविष्टा गोह्य उपगोह्यो मयूषो मनोहास्खलो विरुजस्तनूषदूषुरिन्द्रियहातान्विजहामि यो रोचनस्तमिह गृह्णामि।** इति मन्त्रेण। ततस्तेन **मामभिषिञ्चामि श्रिये यशसे ब्रह्मणे ब्रह्मवर्चसाय॥** ततो द्वितीयपात्रात्तथैवाम्रपल्लवेनाभिषिञ्चेत्। तत्र मन्त्रो यथा **ॐ येन श्रियमकृणुता येनावमृशता ँ सुरां येनाक्षावभ्यषिञ्चतां यद्वां तदश्विनो यशः।** एवं तृतीयादभिषिञ्चेत्। तत्र मन्त्रः प्रागुक्तः। **ॐ ये अप्स्वन्तरग्नयः॰** इति॥ **ॐ आपोहिष्ठा मयोभुवः ॐ तान ऊर्जे दधातन। ॐ महेरणाय चक्षसे।** इति च। ततश्चतुर्थाज्जलमादायाभिषेचने मन्त्रः- **ॐ येऽप्स्वन्तरग्नयः॰** इति। **ॐ यो वः शिवतमो रसः। ॐ तस्यभाजयतेह नः। ॐ उशतीरिव मातरः** इति च। ततस्तथैव पञ्चमात् पात्राज्जलमादायाभिषेचने मन्त्रो यथा - **ॐ येऽप्स्वन्तरग्नयः॰** इति। ॐ

१. अभिवादात्परं विप्रो ज्यायांसमभिवादयन्। असौ नामाहमस्मीति स्वं नाम परिकीर्त्तयेत्॥
भो शब्दं कीर्त्तयेदन्ते स्वस्य नाम्नोऽभिवादने। आयुष्मान् भव सौम्येति वाच्यो विप्रोऽभिवादने॥
मकारश्चैव नाम्नोऽन्ते वाच्यः पूर्वाक्षरः प्लुतः। व्यत्यस्तपाणिनाकार्यमुपसङ्ग्रहणंगुरोः॥
सव्येन सव्यः स्प्रष्टव्यो दक्षिणेन तु दक्षिणः। कामं तु गुरुपत्नीनां युवतीनां युवा भुवि॥
विधिवद् वन्दनं कुर्यादसावहमिति ब्रुवन्॥ (मनुः)
स्नातकनियमाः- न चोदनके निरीक्षेत स्वं रूपमिति धारणा।
नाश्नीयाद्भार्यया सार्द्धं नैनामीक्षते वाश्नतीम्। क्षुवन्तीं जृम्भमाणां वा न चासीनां यथासुखम्॥
नाञ्जयन्तीं स्वके नेत्रे न चाभ्यक्तामनावृताम्। नान्नमद्यादेकवासा न नग्नः स्नानमाचरेत्॥
न मूत्रं पथि कुर्वीत न भस्मनि न गोव्रजे। न फालकृष्टे न जले न चित्यां न च पर्वते॥
नोदक्ययाऽभिभाषेत यज्ञं गच्छेन्न चावृतः। न नृत्येदथवा गायेन्न वादित्राणि वादयेत्॥
न पादौ धावयेत्कांस्ये कदाचिदपि भाजने। न भिन्नभाण्डे भुञ्जीत न भावप्रतिदूषिते॥

तस्मा अरङ्गमाम वः ॐ यस्य क्षयाय जिन्वथ। ॐ आपो जनयथा च नः। इति च ततोऽवशिष्टात्पात्रत्रयात् **ॐ येप्स्वन्तरग्नयः॰** इति मन्त्रं पठित्वा जलमाम्रपल्लवाग्रेणादाय तूष्णीमेवात्मानमभिषिञ्चेत्।

एतदनन्तरं शिरोभागेन मेखलां निष्कासयन्- **ॐ उदुत्तमं वरुण पाशमस्मदवाधमं विमध्यमꣳश्रथाय। अथावयमादित्यव्रते तवानाग-सोऽदितये स्याम।** इति पठेत्। ततो दण्डं मृगचर्म च तूष्णीमेव भूमौ निधाय साञ्जलिरादित्यमुपतिष्ठेत्। यथा- **ॐ उद्यन् भ्राजिष्णुरिन्द्रो मरुद्भिरस्थात्। प्रातर्यावभिरस्थात्। दशसनिरसि दशसनिं मा कुर्वाविदन्मा गमयोद्यन् भ्राजिष्णुरिन्द्रो मरुद्भिरस्थात्। दिवा पावभिरस्थात्। शतसनिरसि शतसनिं मा कुर्वादिन्मा गमयोद्यन् भ्राजिष्णुरिन्द्रो मरुद्भिरस्थात्। सायंयावभिरस्थात्। सहस्रसनिरसि सहस्रसनि मा कुर्वा विदन्मागमय।** इति पठित्वा प्रणमेत्। ततो दधितिलं वा प्राश्याचम्योदुम्बरकाष्ठमादाय दन्तधावनं कुर्यात् तत्र मन्त्रो यथा - **ॐ आयुर्बलं यशो वर्चः प्रजा पशुवसुनि च। ब्रह्मप्रज्ञां च मेधां च त्वन्नो देहि वनस्पते। ॐ अन्नाद्यायव्यूहध्वं सोमोराजाय मागमम्। स मे मुख प्रामार्क्ष्यते यशसा च भगेन च। ॐ दन्तरूपमधो गन्धं दन्तधावनमुत्फलम्। कुर्वन्ति च त्रयो देवा मम दोषो न दीयताम्।** ततो दन्तधावनकाष्ठं परित्याज्याचम्य तैलाभ्यङ्गोद्वर्तनानन्तरं स्नात्वा द्विराचम्य चन्दनकुङ्कुमादिना नासिकारन्ध्रे नेत्रे कर्णे च लिम्पन् **ॐ प्राणापानौ मे तर्पय। ॐ चक्षुर्मे तर्पय। ॐ श्रोत्रं च मे तर्पय** इति पठेत्। ततः पाणी प्रक्षाल्य दक्षिणाभिमुखः पातितवामजानुः कृतापसव्यो द्विगुणभुग्नकुशत्रय- तिलजलान्यादाय आस्तृतकुशत्रयोपरि दिव्यपितॄंस्तर्पयेत्।

अत्र मन्त्रः पठनीयः- **ॐ पितरः शुन्धध्वम्।** ततः स्वयं आचम्यानुलिप्य। **ॐ सुचक्षा अहमक्षीभ्यां भूयासं सुवर्चा मुखेन सुश्रुत्कर्णाभ्यां भूयासम्।** इति पठेत्। ततोऽहतं शुद्धं धौतवस्त्रं परिदध्यात्। तत्र मन्त्रः- **ॐ परिधास्यै यशोधास्यै दीर्घायुत्वाय जरदष्टिरस्मि शतं च जीवामि शरदः पुरूची रायस्य पोषमभिसंव्ययिष्ये।** इति धौतवस्त्रं परिधाय **ॐ यज्ञोपवीतं परमं पवित्रं प्रजापतेर्यत्सहजं पुरस्तात्। आयुष्यमग्रयं प्रतिमुञ्च शुभ्रं यज्ञोपवीतं बलमस्तु तेजः।** इत्यनेन यज्ञोपवीतं

धारयेत्। तत उत्तरीयमहतवस्त्रमादाय **ॐ यशसा मा द्यावापृथिवी यशसेन्द्राबृहस्पतिर्यशो भगश्च मा विदधद्यशो मा प्रतिपद्यताम्।** इति पठित्वा स्कन्धोपरि निदध्यात्। ततः पुष्पमालां धारयन् **ॐ या आहरज्जमदग्निः श्रद्धायै कामेन्द्रियाय ता अहं प्रतिगृह्णामि यशसा च भगेन च। ॐ यशोऽप्सरसमिन्द्रश्चचार विपुलं पृथु। तेन संग्रथितासुमनस आबध्नामि यशो मयि॥** इति पठेत्। अथोष्णीषेण शिरो वेष्टयेत् **ॐ युवा सुवासा परिवीत आगात्। स उ श्रेयान् भवति जायमानः। तं धीरासः कवय उन्नयन्ति स्वाध्यो मनसा देवयन्तः।** इति पठेत्।

ततः कुण्डले परिदधाति। तत्र मन्त्रः **ॐ अलङ्करणमसि भूयोऽलङ्करणं भूयात्।** ततोऽञ्जनं नेत्रयोर्धारयति - **ॐ वृत्रस्यासि कनीनकश्चक्षुर्दा असि चक्षुर्मे देहि।** इति पठेत्। तत्र दर्पणे आत्मदर्शनं कुर्वन् **ॐ रोचिष्णुरसि** इति पठेत्। ततश्छत्रधारणम् तत्र मन्त्रः - **ॐ बृहस्पतेश्छदिरसि पाप्मना मामन्तर्धेहि।** इति पठेत्। ततो वैणवं [१]दण्डं धारयन्- **ॐ विश्वेभ्यो मानाष्ट्राभ्यः परिपाहि सर्वतः।** इति पठेत्। ततः पुष्पफलसमन्वितेन घृतपूर्णेन माणवकदक्षिणकरस्पृष्टेन स्रुवेण पूर्णाहुतिमाचार्यः कुर्यात्। तत्र मन्त्रः - **ॐ मूर्धानं दिवो अरति** इत्यादि प्रागुक्त एव।

स्नातकनियमाः - उपानहौ च वासश्च धृतमन्यैर्न धारयेत्।
उपवीतमलङ्कारं स्रजं करकमेव च। बालातपः प्रेतधूमो वर्ज्यं भिन्नं तथासनम्॥
रात्रौ वृक्षमूलानि दूरतः परिवर्जयेत्। सर्वं च तिलसम्बद्धं नाद्यादस्तमयं प्रति॥
आर्द्रपादस्तु भुञ्जीत नार्द्रपादस्तु संविशेत्। न शूद्राय मतिं दद्यान्नोच्छिष्टं न हविः कृतम्॥
न संहताभ्यां पाणिभ्यां कण्डूयेदात्मनः शिरः।
न स्पृशेच्चैतदुच्छिष्टो न च स्नायाद्विना ततः॥
भद्रं भद्रमिति ब्रूयाद्भद्रमित्येव वा वदेत्। शुष्कवैरं विवादं च न कुर्यात् केनचित्सह॥
नाऽज्ञातेन समं गच्छेन्नैको न वृषलैः सह। अनातुरः स्वानि खानि न स्पृशेदनिमित्ततः॥
त्रिसन्ध्यं जपता तेन सावित्रीं नेक्ष इत्ययम्। आदित्यं ध्यायता कार्यः सङ्कल्पः पापनाशनः॥
एषोदिता गृहस्थस्य वृत्तिर्विप्रस्य शाश्वती। स्नातकव्रतकल्पश्च सत्यवृत्तिकरः शुभः॥

१. यज्ञोपवीतद्वितयं सोदकं च कमण्डलुम्।
छत्रं चोष्णीषममलं पादुके चाप्युपानहौ॥ (कूर्मपुराणं)
दाक्षायणी ब्रह्मसूत्री वेणुमान् सकमण्डलुः।
कुर्यात् प्रदक्षिणं देवं मृद्गोविप्रवनस्पतीन्॥

ततः स्रुवेण भस्मानीय त्र्यायुषं कुर्यात्। तत्र मन्त्रः- **ॐ त्र्यायुषं जमदग्नेरिति** ललाटे **ॐ कश्यपस्य त्र्यायुषमिति** ग्रीवायाम्। **यद्देवेषु त्र्यायुषमिति** दक्षिणबाहुमूले। **तत्तेऽस्तु त्र्यायुषमिति** हृदि। ततः शिष्य आचार्यस्याग्रे श्रद्धापूर्वकं प्रणम्य यथाशक्ति सुवर्णादिद्रव्येण सह नारिकेलादि फलं समर्प्याशिषो गृह्णीयात्। ततः **कृतस्य समावर्तनकर्मणः साङ्गता-सिद्धयर्थं हिरण्यनिष्क्रयभूतं द्रव्यं रजतं चन्द्रदैवतम् आचार्याय तुभ्यमहं सम्प्रददे** इति सङ्कल्प्य दक्षिणां दद्यात्। पुनर्हस्ते जलमादाय **कृतस्य समावर्तनसंस्कारस्य साङ्गतासिद्धयर्थं यथासङ्ख्यकान् ब्राह्मणान् भोजयिष्ये** इति ब्राह्मणभोजनम्। तत्पश्चात् **कृतस्य समावर्तनकर्मणः साङ्गतासिद्धयर्थं तन्मध्ये न्यूनातिरिक्तदोषपरिहारार्थं नानानामगोत्रेभ्यो ब्राह्मणेभ्यो भूयसीं दक्षिणां विभज्य दातुमहमुत्सृजे।** इत्युक्त्वा भूयसी दक्षिणां च ब्राह्मणेभ्यो दद्यात्। ततः '**प्रमादात् कुर्वतां कर्मे**'ति पठित्वा **ॐ विष्णवे नमः, ॐ विष्णवे नमः ॐ विष्णवे नमः** इति त्रिवारमुक्त्वा क्षमाप्रार्थनां च कुर्यात्॥

॥ इति समावर्तनसंस्कारः ॥

अथ विवाहसंस्कारः

प्रथमतस्तु [१]कन्याहस्तेन षोडशहस्तपरिमितं मण्डपं विधाय तद्दक्षिणदिशि पश्चिमांदिशमाश्रित्य मण्डपसंलग्नमुत्तराभिमुखं कौतुकागारं

---

१. अविलुप्तब्रह्मचर्यो लक्षण्यां स्त्रियमुद्वहेत्। अनन्यपूर्विकां कान्तामसपिण्डां यवीयसीम्॥ अरोगिणीं भ्रातृमतीमसमानार्षगोत्रजाम्॥ (याज्ञवल्क्यस्मृतौ)

अव्यङ्गाङ्गीं सौम्यनाम्नीं हंसवारणगामिनीम्। तनुलोमकेशदन्तां मृद्वङ्गीमुद्वहेत् स्त्रियम्॥ नोद्वहेत् कपिलां कन्यां नाधिकाङ्गीं न रोगिणीम्। नर्क्षवृक्षनदीनाम्नीं नान्त्यपर्वतनामिकाम्। न पक्ष्यहिप्रेष्यनाम्नीं न विभीषणनामिकाम्॥ (मनुः)

यस्याश्च रोमशे जङ्घे गुल्फौ यस्यास्तथोन्नतौ। गण्डयोः कूपकौ यस्या हसन्त्यां तां च नोद्वहेत्॥ न वामनीं नातिदीर्घां नोद्वहेत्सङ्गतभ्रुवम्। न चातिछिद्रदशनां न करालमुखीं नरः॥

पञ्चमीं मातृपक्षात्तु पितृपक्षात्तु सप्तमीम्। गृहस्थ उद्वहेत्कन्यां न्याय्येन विधिना नृप॥ असपिण्डा च या मातुरसगोत्रा च या पितुः। सा प्रशस्ता द्विजातीनां दारकर्मणि मैथुने॥ यस्यास्तु न भवेद्भ्राता न च विज्ञायते पिता। नोपयच्छेत तां प्राज्ञः पुत्रिकाधर्मशङ्कया॥

मण्डपाद्बहिरैशान्यां दिशि जामातुर्हस्तपरिमितां सिकतादिपरिष्कृतां तुषकेशशर्करादिरहितां सुवस्त्रच्छादितां सुन्दरीं वेदीञ्च कारयेत्। आगतं वरं दृष्ट्वा गृहद्वारसमीपे सुभगाः स्त्रियो मङ्गलगायनपूर्वकं वरस्य ललाटे दधि सहितकुङ्कुमेन तिलकं कुर्युः। ततः स्थाल्यां चतुर्दिक् प्रज्वलितघृतदीपेनाऽऽर्तिकं कुर्युः। ततो वरः[१] मण्डपसमीपमागत्य उत्तिष्ठन् मण्डपोपरितिष्ठन्तं भगवन्तं मण्डपगणपतिं पुष्पाक्षतादिभिरभ्यर्च्य स्पृशेदभिवादयेच्च॥ ततः उपोषितः कन्यापिता स्नातः शुचिः अहते शुद्धे वाससी परिधाय कृतनित्यक्रियोऽर्हणवेलायां मण्डपे उत्तरमुखे उपविश्य कुशासने, वरं प्राङ्मुखं शुद्धासने काष्ठपीठे उपवेश्य पादयोरधः द्रव्यं निधाय आचम्य आसनशुद्धिं विधाय कुङ्कुमार्चित-साक्षतहस्तेन स्वस्तिवाचनं च कृत्वा प्रतिज्ञासङ्कल्पं कुर्यात्। तद्यथा – **ॐ तत्सदद्येत्यादि. अमुकस्य देवर्षिपितृऋणापनुत्तये एतस्याः कन्यायाः बीजगर्भसमुद्भवैनोनिबर्हणपूर्वकं भविष्यद्भर्त्रा सह दाम्पत्यैश्वर्य सिद्धिसम्पादकधर्मप्रजोत्पादनादिगार्हस्थ्यसुखावाप्तये श्रीयज्ञपुरुषस्य श्रीलक्ष्मीनारायणस्य प्रीतये गृहागतवरार्चनं करिष्ये। तदङ्गतया च विहितं निर्विध्नतार्थं यथालब्धोपचारैर्गणपत्यादीनहं पूजयिष्ये।**

ततो वरः स्वविवाहविध्नादिराहित्यमिच्छन् गणपत्यादिदेवपूजनस्य सङ्कल्पं विदध्यात् तद् यथा-**ॐ तत्सदद्येत्याद्युक्त्वा अमुकगोत्रोऽमुकशर्मा श्रीलक्ष्मीनारायणप्रसादकरणकं यावज्जीवं पत्न्या सहायुरारोग्यसम्पत्ति-समृद्धिपूर्वकं परमसुखावाप्तये धर्मार्थकामसिध्यर्थञ्च सत्संस्कारस्वकी-योद्वाहकर्माङ्गमहं करिष्ये।** इति जलं प्रक्षिप्यपुनर्जलं गृहीत्वा तन्निर्विध्नपरि-समाप्तिकामो **श्रीगणपत्यादीन्यथालब्धोपचारैरर्चयिष्ये।** इति सङ्कल्प्य श्रीगणेशोङ्कारषोडशमातृनवग्रहान् सर्पांश्चपूजयेत्।

---

१. विद्यावन्तं सुरूपं ह्युभयकुलशुचिं ज्ञातशीलं दृढाङ्गम्।
निर्व्याधिं शान्तियुक्तं द्विजसुरविनतौ किञ्चिदाढ्यं प्रयुक्तम्॥
सम्यक् पृष्ठोच्चपृच्छं प्रचुरतरधियं मूत्रधारं सुलिङ्गम्।
ह्येतद्रूपं वरिष्ठं वरमिह वरयेत्कन्यकायाः सुवेशम्॥ (ज्योतिर्निबन्धे)

कन्याप्रदातृकर्तृकवरार्ध्यदानम्

तत आदौ दाता साक्षतजलं गृहीत्वा **ॐ तत्सदित्यादिकायवाङ्मनःकरणकाचरितसमस्तैनोनिरसनानन्तरं विविधेप्सितभोगादिसुखसिद्ध्यै ज्योतिष्टोमातिरात्रयज्ञजन्यफलसमफलकभविष्यदात्मीय कन्याधिकरण-कस्वात्मनिरूपितस्वत्वध्वंसनोत्तराव्यवहितक्षणसङ्कुचितसमयसञ्जा-यमानवरनिरूपित-स्वत्वजनक-त्वात्मकन्यादानरूप-कर्मप्रधानाङ्गतया-मुकगोत्रं विष्णुरूपिणं वरमर्चयिष्ये।** इति सङ्कल्पं कुर्यात्। तत उत्थाय यजमानः वरमूर्ध्वजानु सम्बोध्य **ॐ साधु- भवानास्तामर्चयिष्यामो भवन्तम्।** इति ब्रूयात् ततः अर्चय इति वरेणोक्ते तदुपवेशनार्थ शुद्धमासनं दत्त्वा तस्योपरि सम्मानार्थं पुष्पाणि च क्षिपेत्। ततो गन्धादिभिर्वरस्य मुकुटार्चनं कृत्वा पुष्पमालां कण्ठे परिधापयेत् **ॐ विष्णुरूपिणे वराय नमः।** दाता पञ्चविंशति[1] कुशपत्ररचितं दूर्वामयं वा विष्टरमादाय **ओं विष्टरो विष्टरो विष्टर** इत्यन्येनोक्ते **ओं विष्टरः प्रतिगृह्यताम्** इति दाता वदेत्। ओं विष्टरं प्रतिगृह्णामि इत्यभिधाय वरो यजमानहस्ताद् विष्टरमुदग्रपाणिभ्यामादाय[2] **ॐ वर्ष्मोऽस्मि समानानामुद्यता- मिव सूर्यः। इमं तमभितिष्ठामि यो मां कश्चाभिदासति।** इति मन्त्रेण आसने उत्तराग्रं विष्टरं निधाय वर उपविशेत्। तत्रोपविष्टे वरे यजमानः स्वयमप्युपविश्य पाद्यपात्रे ईषदुष्णमुदकमादाय- **ओं पाद्यं पाद्यं पाद्यम्** इति अन्येनोक्ते **ओं पाद्यं प्रतिगृह्यतामिति** दाता वदेत्। **ओं पाद्यं प्रतिगृह्णामि** इत्यभिधाय वरः पाद्यपात्रं गृहीत्वा तत्पात्र भूमौ निधायाञ्जलिना जलमादाय **ओं विराजो**

---

१. पञ्चाशता भवेद् ब्रह्मा तदर्धंतु विष्टरः।
ऊर्ध्वकेशो भवेद् ब्रह्मा लम्बकेशस्तु विष्टरः॥
दक्षिणावर्तब्रह्मा च वामावर्तस्तु विष्टरः।
पञ्चविंशतिदर्भाणां वैण्यग्रे ग्रन्थिभूषिता।
विष्टरं सर्वयज्ञेषु लक्षणं परिकीर्त्तितम्॥

२. न च स्मरेदृषिच्छन्दः श्राद्धे वैतानिके मखे।
अग्निहोत्रे वैश्वदेवे विवाहादिविधौ तथा॥
होमकाले न दृश्यन्ते प्रायश्छन्दर्षिदेवताः।
शान्तिकादिषु कार्येषु मन्त्रपाठजपादिषु॥

दोहोऽसि विराजो दोहमशीय मयि पाद्यायै विराजो दोहः। इति मन्त्रेण विप्रस्य दक्षिणचरणं प्रक्षाल्य वामचरणं प्रक्षालयेत्। क्षत्रियादिश्चेत् प्रथमं वामं ततो दक्षिणं प्रक्षालयेत् ततः पूर्ववत् विष्टरान्तरं गृहीत्वा **ओं वर्ष्मोऽस्मि समानानामुद्यतामिव सूर्यः। इमन्तमभितिष्ठामि यो मां कश्चाभिदासति** इति मन्त्रं पठित्वा चरणयोरधस्तात् वरः उत्तराग्रं विष्टरं स्थापयेत्। ततो दाता हस्तौ प्रक्षाल्य दूर्वाक्षतफलपुष्पचन्दनयुतार्घपात्रंगृहीत्वा-**ओं अर्घो ऽर्घो ऽर्घः** इत्यन्येनोक्ते-**ॐ आगतोऽसि वरश्रेष्ठ सर्वकामार्थसिद्धये। प्रतिग्रहसमर्थोऽसि गृहाणार्घ्यं नमोऽस्तु ते।। ॐ अर्घः- प्रतिगृह्यताम्** इति दाता वदेत्। ओं अर्घं प्रतिगृह्णामि इत्यभिधाय वरो यजमानहस्तादर्घं गृहीत्वा- **ओं आपःस्थ युष्माभिः- सर्वान्कामान- वाप्नुवानि।** इति शिरसाभिवन्द्य शिरसि अक्षतादिकं च किञ्चिद्दत्वा- **ॐ समुद्रं वः प्राहिणोमि स्वां योनिमभिगच्छत। अरिष्टास्माकं वीरा मा परासेचिमत्पयः॥** इत्यर्घपात्रस्थं जलं ऐशान्यां त्यजन्पठेत्। ततः आचमनीयपात्रमादाय **ओं आचमनीयम्, आचमनीयम्, आचमनीयम्** इति केनचिदुक्ते **ॐ आचमनीयं प्रतिगृह्यताम्** इति दाता वदेत्। तत्पश्चाद् वरः **आचमनीयम् प्रतिगृह्णामि** इत्युक्त्वा यजमानहस्तादाचमनीयपात्रमादाय **ॐ आमागन् यशसा स ꣳसृज वर्च्चसा तन्मा कुरु प्रियं प्रजानामधिपतिं पशूनामरिष्टिं तनूनाम्॥** इत्यनेन सकृदाचामेत्। द्विस्तूष्णीम्। ततो वरो हस्तौ प्रक्षालयेत्॥

मधुपर्कविधिः

ततः कन्यापिता कास्यपात्रस्थदधिमधुघृतानि[१] कास्यपात्र-पिहितान्यादाय- **ॐ मधुपर्को मधुपर्को मधुपर्कः** इत्यन्येनोक्ते **ॐ मधुपर्कः प्रतिगृह्यतां** इति वदेत्॥ **ॐ मधुपर्कं प्रतिगृह्णामि** इति वरो[२] वदेत्। ततः **ॐ मित्रस्य त्वा चक्षुषा प्रतीक्षे** इति यजमानकरस्थमेव तत्पात्रमुदघाट्य निरीक्ष्य च **ॐ देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां**

---

१. सर्पिश्च पलमेकं तु द्विपलं मधुकीर्त्तितम्। दधि च त्रिपलं ज्ञेयं मधुपर्कविधिः स्मृतः॥
मधुनाऽऽज्येन वा युक्तं मधुपर्काभिधं दधि। दध्यलाभे पयो ग्राह्यं मध्वलाभे तु शर्करा॥

२. वरस्य या भवेच्छाखागृह्यचोदितस्तथा।।
मधुपर्कः प्रदातव्यो ह्यन्यशाखेऽपि दातरि॥

प्रतिगृह्णामि इति मन्त्रेण मधुपर्कपात्रं पाणिभ्यां गृहीत्वा वामहस्ते धृत्वा ॐ **नमः श्यावास्यायान्नशने यत्त आविद्धं तत्ते निष्कृन्तामि।** इति दक्षिणानामिकया त्रिः प्रदक्षिणमालोड्य अनामिकाङ्गुष्ठाभ्यां भूमौ किञ्चित् निक्षिप्य पुनस्तथैव द्विवारमालोड्य भूमौ प्रत्येकं किञ्चित् किञ्चित् निःक्षिपेत्। ततः आचारान्मधुपर्कं पात्रान्तरे किञ्चित् कन्यायै द्रष्टुं दद्यात् ततस्तं मधुपर्कं पूर्वस्मिन्नेव पात्रे निक्षिप्य- **ॐ यन्मधुनो मधव्यं परमं रूपमनाद्यम्। तेनाहं मधुनो मधव्येन परमेण रूपेणान्नाद्येन परमो मधुव्योऽन्नादोऽसानि।** इत्यनेन वारत्रयं प्राशयेत्। प्रतिप्राशनं चैतन्मन्त्रं पठेत्। ततो उच्छिष्टदूरीकरणार्थं हस्तौ प्रक्षाल्य उच्छिष्टशेषमधुपर्कमध्ये[1] दक्षिणां च क्षिप्त्वा असञ्चरदेशे[2] निनयेत्। द्विराचम्य वरः दक्षिणहस्ते पूगीफलं दक्षिणां च धृत्वा इन्द्रियाणि संस्पृशेत्। तद्यथा- **ॐ वाङ्मे आस्येऽस्तु इति करेण मुखस्पर्शः। ॐ नसोर्मे प्राणोऽस्तु** इति दक्षिणवामनासारन्ध्रद्वये। **ओं अक्ष्णोर्मे चक्षुरस्तु** इति दक्षिणोत्तर- चक्षुषी। **ॐ कर्णयोर्मे श्रोत्रमस्तु** इति दक्षिणवामकर्णौ। **ओं बाह्वोर्मे बलमस्तु** इति दक्षिणोत्तरौ बाहू। **ओं ऊर्वोर्मे ओजोऽस्तु** इति युगपदूरु। **ओं अरिष्टानि मेऽङ्गानि तनुस्तन्वा मे सन्तु** इति आशीर्षपादान्तं शरीरं उभाभ्यां हस्ताभ्यां संस्पृश्य दक्षिणां विप्राय दत्त्वाचमेत्।

मधुपर्कसम्बद्धगोदानम्

ततो वरस्य समीपे भूमावुदगग्रान् दर्भानास्तीर्य **ॐ गौर्गौर्गौः** इत्यभिहिते वरस्तृणं गृहीत्वा यजमानेन सह मन्त्रं पठेत् तद्यथा-**ॐ माता रुद्राणां दुहिता वसूनां स्वसादित्यानाममृतस्य नाभिःप्रणुवोचं चिकितुषे जनायमागामनागामदितिं वधिष्ट॥ मम च अमुकशर्म्मणः यजमानस्य च उभयोः पाप्माहतः ॐ उत्सृजत**[3] इति उपांशु पठित्वा, तृणान्यत्तु इत्युच्चैरुच्चार्य कुशपत्रस्योत्सर्जनं कृत्वा वराय शिष्टाचारात् मधुपर्कसम्बधि-

---

१. मधुपर्के च सोमे च अप्सु प्राणाहुतिषु च।
नोच्छिष्टस्तु भवेद् विप्रो यथाऽत्रेर्वचनं यथा॥

२. जले वा बालुकायां वा वने वा पर्वतेऽथवा। भवनोपरिदेशे वा ह्यसञ्चर इतीर्यते॥

३. यज्ञाधानं गवालम्भं सन्यासं पलपैतृकम्।
देवराच्च सुतोत्पत्तिः कलौ पञ्च विवर्जयेत्॥ (पराशरस्मृतौ)

गोदानं कुर्यात् अथवा गोनिष्क्रयद्रव्यं दद्यात्। तत्र दातृकर्तृकसङ्कल्प: ॐ **अद्येत्यादि० अमुकगोत्रोऽमुकशर्माहं महापातकनिवृत्तिपूर्वकश्रुत्युक्तफलप्राप्त्यर्थं स्वकीयकन्योद्वाहे**[१] **मधुपर्कसम्बन्धिगोप्रतिनिधिभूतमिदं द्रव्यं अमुकदैवतममुकशर्मणे वराय तुभ्यमहं सम्प्रददे।**

विवाहेऽग्निस्थापनम्

तत आचार्य्योऽन्यो ब्राह्मणो वा वेदिकायां तुषकेशशर्करादिरहितायां हस्तमात्रपरिमितायां चतुरस्त्रां भूमिं कुशैः परिसमुह्य तान् कुशानैशान्यां परित्यज्य गोमयोदकेनोपलिप्य स्फ्येन स्रुवमूलेन वा प्रागग्रप्रादेशमात्रमुत्तरोत्तरक्रमेण त्रिरुल्लिख्य उल्लेखनक्रमेणैवानामिकाङ्गुष्ठाभ्यां मृदमुद्धृत्य जलेनाभ्युक्ष्य तत्र तूष्णीं कांस्यपात्रस्थं द्वितीयकांस्यपिहितं योजकनामानं बह्निमग्निकोणादानीय प्राङ्मुखः प्रत्यङ्मुखमुपसमाधाय तद्रक्षार्थं किञ्चिद्यज्ञीयकाष्ठादिकं तत्र संयोज्य आनीताग्निपात्रे जलाक्षतादिप्रक्षेपःकार्यः। ततो हस्तेऽक्षतान् गृहीत्वाऽग्ने **योजकनाम शाण्डिल्यगोत्र शाण्डिल्यासितदेवलेति त्रिप्रवरान्वित भूमिमातः वरुणपितः मेषध्वज प्राङ्मुखं मम सम्मुखो भव** इत्यग्नौ अक्षतान् प्रक्षिप्य योजकनामाग्निं प्रतिष्ठापयेत्।

ततः कौतुकागाराद्वरः कुलाचारान्मातुलोऽन्यो वा कन्यामातृबन्धुः कन्यामानीय[२] मण्डपे ॐ **शुक्लाम्बरधरेति** मन्त्रद्वारा अक्षतप्रक्षेपपूर्वकं उपवेशयेत्। ततः कन्या द्वैमातुरोङ्कारलक्ष्मी- कुबेरानर्चयेत्। ततः कन्याशिरसि कुङ्कुमार्चितमुकुटं (मौड़ी) धार्यम्। **यम्ब्रह्म वेदान्तविदो, वदन्ति परमप्रधानं**

---

१. विवाहविहिते तन्त्रे होमकाले उपस्थिते।
कन्यामृतुमतीं दृष्ट्वा कथं कुर्वन्ति याज्ञिकाः॥
स्नापयित्वा तु तां कन्यामर्चयित्वा यथाविधि।
युञ्जानामाहुतिं हुत्वा ततः कर्मणियोजयेत्॥
ॐ युञ्जानः प्रथमं मनस्तत्त्वाय सविताधियम्।
अग्नेर्ज्योतर्निचाय्य पृथिव्या अद्याभरत् स्वाहा। इदं सवित्रे न मम।

१. मृद्वङ्गी गूढगुल्फा समकुचनयना वृत्तनासोरुवक्त्रा।
कृष्णभ्रूनेत्रकेशा स्थिरतरसुनखा दीर्घनेत्रा विलोमा॥
मृद्वीवाक् स्वल्पभाला लघुललितगमा पाणिपादोष्ठरक्तः।
सा कन्योद्वाहिता चेत्सुतधनविपुलानायुरारोग्यदा स्यात्॥ (ज्योतिर्निबन्धे)

पुरुषं तथान्ये। विश्वोद्गतेः कारणमीश्वरं वा तस्मै नमो विघ्नविनाशनाय। इति मन्त्रं पठेत्।

वरकन्ययोर्वस्त्रपरिधापनम्

ततः संस्कारलोपप्रायश्चितसङ्कल्पः **ॐ अद्येत्यादि० अस्याः कुमार्याः गर्भाधानादिसंस्काराणां स्वकालेऽकरणजनितप्रत्यवाय परिहारार्थं पादकृच्छ्ररूपं प्रायश्चित्तं रजतप्रत्याम्नायद्वाराऽहमाचरिष्ये।** प्रतिसंस्कारलोपे गोदानमथवा गोनिष्क्रयीभूतं यथाशक्ति रजतदानमपि कर्त्तव्यम्। **कृतैतत् प्रायश्चित्तेन गर्भाधानादिसंस्काराः सम्पद्यन्ताम्** इति पठेत्। ततः कन्यापिता[१] वराय वस्त्रचतुष्टयं प्रयच्छति तन्मध्ये वस्त्रद्वयं वरः क्रमेण मन्त्रपाठपूर्वकं कन्यायै प्रयच्छति। **ॐ जरां गच्छ परिधत्स्व वासोभवाकृष्टीनामभिशस्तिपावा। शतं च जीव शरदः सुवर्च्चा रयिञ्च पुत्राननु संव्ययस्वायुष्मतीदं परिधत्स्व वासः।** इति पठित्वा परिधानवस्त्रं तस्यै ददाति वरः। ततो द्वितीयोत्तरीयवस्त्रमादाय - **ॐ या अकृन्तन्नवयन्या अतन्वत याश्च देव्यस्तन्तूनभितस्ततन्थ। तास्त्वा देवीर्जरसे संव्ययस्वा-युष्मतीदं परिधत्स्व वासः।** इति पठित्वोत्तरीयं ददाति। वरः स्वयमप्येकवस्त्रमादाय **ॐ परिधास्यै यशोधास्यै दीर्घायुष्ट्वाय जरदष्टिरस्मि। शतं च जीवामि शरदः पुरीचो रायस्पोषमभिसंव्ययिष्ये।** इति पठित्वाऽधोवस्त्रं वरः परिदध्यात्[२]। ततः उत्तरीयवस्त्रमादाय- **ॐ यशसा मा द्यावा पृथिवी यशसेन्द्राबृहस्पती यशोभगश्च मा विदधद्यशो मा प्रतिपद्यताम्।** इति पठित्वोत्तरीयवस्त्रं परिदधाति वरः। ततो वरः कन्या च द्विराचामेताम्[३]। ततः कन्याप्रदेन परस्परं समीक्षेथामिति प्रेषितयोः कन्यावरयोः

---

१. पिता पितामहो भ्राता सकुल्यो जननी तथा।
कन्याप्रदः पूर्वनाशे प्रकृतिस्थः परः परः॥ (याज्ञवल्क्यस्मृतौ)

२. वासांसि परिधायैतावाचान्तौ यदि तिष्ठतः।
सम्मुखीकरणं कुर्यात्तयोस्तु दुहितुः पिता॥

३. स्नात्वा पीत्वा क्षुते सुप्ते भुक्त्वारथ्योपसर्पणे।
आचान्तः पुनराचामेत् वासो विपरिधाय च॥

परस्परं सम्मुखीकरणम्[१]। सम्मुखीभूतो वरः - **ॐ समञ्जन्तु विश्वेदेवाः समापो हृदयानि नौ। सम्मातरिश्वा सन्धाता समुदेष्ट्री दधातु नौ।** इति पठेत्। ततः आचार्यः **प्रतिष्ठासु प्रतिष्ठितमस्तु दम्पत्योरविच्छिन्ना प्रीतिरस्तु। ॐ रुक्मिणी कृष्णसौभाग्यमुमाशङ्करयोर्यथा। सावित्रीब्रह्मसौभाग्यं तदस्तु वरकन्ययोः।** इति पठित्वा दम्पत्युपरि साक्षतपुष्पाणि क्षिपेत्।[२] ततो दाता वरस्योत्तरीयवस्त्रं द्रव्याक्षतयुक्तं कन्यावस्त्रं तु दूर्वाक्षतपूगीफलादियुक्तं कृत्वा परस्परमुभयोर्ग्रन्थिबन्धनं कुर्यात्। तत्र मन्त्रः - **गणाधिपं नमस्कृत्य उमां लक्ष्मीं सरस्वतीम्। दम्पत्योः रक्षणार्थाय पटग्रन्थिं करोम्यहम्।** ततो वरः सर्वदोषदूरीकरणार्थं हस्ते द्रव्यं धृत्वा लग्नशुद्धि[३] सङ्कल्पं कुर्यात् तद्यथाग्रन्थिबन्धनादनन्तरं पाणिग्रहणात्पूर्वं लग्नशुद्ध्यर्थं यथाशक्ति-सुवर्णरजतादिदानं वरः कुर्यात्- **ॐ इहेत्यादि॰ अमुकगोत्रोऽमुकशर्म्मै-तत्पाञ्चभौतिकशरीरावच्छिन्नात्मसमवेतकायवाङ् मनः करणकाचरित-पातकोपपातकमहापातकनिवृत्तिपूर्वकं ममास्यां विवाहवेलायाम-मुकलग्नतो ह्यभिहितस्थानस्थिताशुभयुक्ताशुभदृष्टाशुभषड्वर्गगता-रियुक्तारिदृष्टारिषड्वर्गस्थित दिनमणिमुखनवखेटोपखेटजन्य पाप-क्रूरदृष्टि स्थानहोराद्रेष्काणनवांशद्वादशांशत्रिशांशायतवर्तमानै-तद्विवाहोचितलग्न जन्यमज्जनिनामयभप्रसिद्धनामहेतुकविपरीतवर्ग-गणयोनिनाडिप्रमुखविवाहोचितपरस्परसम्मेलनीकूटसञ्जातकुजकर्तृ-कजनिसमयवर्तमानलग्नाद्यनुचिताल्पस्थितिदृष्टिजारिष्टोपशमपूर्व-कैतल्लग्नज्योतिश्शास्त्रप्रसिद्धसमुचित विविधलग्नगुणित्वजनक-नानागुणाश्रयत्वसम्पत्यै वर्तमानैतल्लग्नाधिष्ठातृदेवप्रीतये श्रीसूर्यादि-प्रीतिकमैतदद्रव्यममुकदैवतं तुभ्यमहं सम्प्रददे न मम।** इति द्रव्यं ब्राह्मणाय दद्यात् ॥

---

१. पिता तु प्रेषणेनैव सम्मुखीकरणं चरेत्॥

२. वरस्य दक्षिणे कन्या कन्याया दक्षिणे पिता।
पितुश्च दक्षिणे ब्रह्मा विवाहे कर्म कारयेत्॥

३. पुण्ये मुहूर्त्ते कुर्वीत विवाहं विधिवद् द्विजः।
तत्राभ्युदयिकं श्राद्धं कुर्यात् स्वस्ति च वाचयेत्॥ (शौनकः)

कन्यादानं गोत्रोच्चारमङ्गलं च

एतदनन्तरं तत्र शुभलग्नवेलायां कन्यादाता[१] स्वदक्षिण[२]स्थितया पत्न्या सह कृतग्रन्थिबन्धनो वरस्य दक्षिणभागे शुभासने उदङ्मुख उपविश्य कन्यावरयोः कुङ्कुमादिना **शुक्लाम्बरधरेति** मन्त्रेण हस्तलेपनं कृत्वा कुशादीन्यादाय आदौ मङ्गलाष्टकोच्चारणमाचार्यद्वारा कारयेत्। ततः कन्यादानस्य प्रतिज्ञासङ्कल्पं कुर्यात्। तद्यथा- **ॐ विष्णुर्विष्णुर्विष्णुर-द्येत्यादिदेशकालौ सङ्कीर्त्य अस्मिन् पुण्याहे अमुकगोत्रोऽमुकशर्माहं समस्तपितॄणां निरतिशयसानन्दब्रह्मलोकप्राप्त्यर्थं श्रुतिस्मृतिपुराणादि-कल्पोक्तफलावाप्त्यर्थं द्वादशपूर्वान् द्वादशापरान् पुरुषान् पवित्रीकर्तुं आत्मनश्च श्रीलक्ष्मीनारायणप्रीतये ब्राह्मविवाहविधिना कन्यादानाख्य-महा[३]दानमहं करिष्ये** इति सङ्कल्प्य कन्यां गन्धाक्षतपुष्पमालाभिः सम्पूजयेत्।

ततः सपत्नीको दाता शङ्खस्थदूर्वाक्षतफलपुष्पचन्दनतुलसी-कुशजलान्यादाय कन्याहस्तयोर्द्रव्यगर्भं गोधूमपिष्टगोलकं धृत्वा जामातृदक्षिण-करोपरि कन्यादक्षिणकरं निधाय **ॐ दाताहं वरुणो राजा द्रव्यमादित्य-दैवतम्। वरोऽसौ विष्णुरूपेण प्रतिगृह्णात्वयं विधिः॥** इति दाता पठेत्॥ ततः **कन्यां सुलक्षणोपेतां कनकाभरणैर्युताम्। दास्यामि विष्णवे तुभ्यं ब्रह्मलोकजिगीषया।** अनेन वरं प्रार्थयेत्। अस्मिन्समये वरकन्यापक्षाश्रयिणौ पुरोहितौ क्रमशः मङ्गलस्तवगानं शाखोच्चारणम्वा[४] कुर्याताम्॥ ततः कन्याङ्गुष्ठं शङ्खपात्रे निधाय सङ्कल्पं कुर्यात्- **ॐ विष्णुर्विष्णुर्विष्णुः ॐ स्वस्ति श्रीमुकुन्देत्यादि देशकालादि स्मृत्वा मम समस्तपितॄणां निरतिशयसा-**

---

१. भुक्त्वा समुद्वहेत्कन्यां सावित्रीग्रहणं तथा।
उपोषितः सुतां दद्यादर्चिताय द्विजातये॥ (व्यासः)

२. व्रतबन्धेविवाहे च चतुर्थी सहभोजने। व्रते दाने मखे श्राद्धे पत्नी तिष्ठति दक्षिणे।
सर्वेषु धर्मकार्येषु पत्नी दक्षिणतः शुभा। अभिषेके विप्रपादक्षालने चैव वामतः॥
आशीर्वादेऽभिषेके च पादप्रक्षालने तथा। शयने भोजने चैव पत्नी तूत्तरतो भवेत्॥

३. अलङ्कृत्य तु यः कन्यां भूषणाच्छादनादिभिः।
दत्त्वा स्वर्गमवाप्नोति पूज्यते वासवादिभिः॥ (संवर्तः)

४. वरगोत्रं समुच्चार्य प्रपितामहपूर्वकम्।
नाम सङ्कीर्त्तयेद् विद्वान् कन्यायाश्चैवमेव हि॥ (ऋष्यशृङ्गः)

नन्दब्रह्मलोकावाप्त्यादिकरणाय ज्ञाताज्ञातमनोवाक्काय कर्म-जनिताखिलपापापनोदनाय च अस्यां कन्यायां वरादस्मात् समुत्पादयिष्यमाणसन्तत्या आत्मनो मातृपितृवंशजान् द्वादशपूर्वान् द्वादशापरान् पुरुषान् पवित्रीकर्तुमात्मनश्च श्रीलक्ष्मीनारायणप्रीतये (प्रथमं वरपक्षीयो विप्रः अस्मिन् दिने वा अस्यां रात्रौ अस्मिन्मण्डल-मण्डपाभ्यन्तरे स्वस्ति श्रीमन्नन्दनचरणकमलभक्तिविद्याविनीतकुल कमलकलिकाप्रकाशेनैकभास्करसदाचारसच्चरित्रसत्कुलसत्प्रतिष्ठा गरिष्ठस्य अमुकगोत्रस्य यथोक्तप्रवरस्य अमुकवेदिनोऽमुकशाखिनः अमुकसूत्रिणः श्रीमतोऽमुकशर्म्मणः (वर्मणः गुप्तस्य वा) प्रपौत्राय (एवमेव पौत्राय तथैव पुत्राया) अहं प्रयतपाणिः शरणं प्रपद्ये स्वस्ति संवादेष्वुभयं वो वृद्धिः वरकन्ययोर्मङ्गलमास्ताम् वरश्चिरञ्जीवी कन्या सावित्री भूयात् अथ कन्यापक्षीयो विप्रः अस्मिन् दिने अस्यां रात्रौ वा अस्मिन् मण्डलमण्डपाभ्यन्तरे स्वस्ति श्रीविद्याविनयसम्पन्नस्य-श्रीभगवच्चरणारविन्दसंलग्नमधुपस्वधर्मनिष्ठवंशवरिष्ठपरोपकार-परायणदानशीलस्य अमुकगोत्रस्य यथोक्तप्रवरस्य अमुकवेदिनो अमुकशाखिनः अमुकसूत्रिणः श्रीमतोऽमुकशर्मणः (वर्मणो गुप्तस्य वा) प्रपौत्री एवमेव पौत्रीं तथैव पुत्रीं प्रयतपाणिः शरणं प्रपद्ये स्वस्ति संवादेष्वुभयं वो वृद्धिः, कन्यावरयोर्मङ्गलमास्ताम् कन्या सावित्री वरश्चिरञ्जीवी भूयात्। इत्यनेन क्रमेण वरपक्षीयाः कन्यापक्षीयाश्च त्रिरावृत्य अमुकगोत्राय, अमुकवेदिने अमुकशाखिने अमुकसूत्रिणे अमुकशर्मणे (वर्मणे गुप्ताय वा) श्रीधरस्वरूपिणे कन्यार्थिने वराय अमुकगोत्रोत्पन्नां अमुकप्रवराम् आयुष्मतीं कन्यां यथाशक्त्यङ्कृतां परालङ्कारवर्जितां महद्वस्त्रद्वयावृतां विवाहदीक्षया-दीक्षितां प्रजापतिदैवत्यां शतगुणीकृतज्योतिष्टोमातिरात्रादियज्ञसमफलप्राप्तिकामो देवाग्नि-ब्राह्मणसाक्षित्वेन सहधर्माचरणाय प्रजोत्पादनार्थं च पत्नीत्वेन तुभ्यमहं सम्प्रददे। इति पठित्वा दाता सपत्नीक उत्थाय शङ्खस्थं सकुशाक्षततुलसीदलं जलं कन्यादक्षिणहस्तं च वर-दक्षिणहस्ते दद्यात् वरश्च भूमावुपरि निजवामहस्ताधः ताम्रमयमनल्पं द्रव्यं धृत्वा गृह्णीयात्। स्वस्तीति प्रतिवचन-मुक्त्वा- ॐ द्यौस्त्वा ददातु पृथिवी त्वा प्रतिगृह्णातु इति कन्यांहस्तं

प्रतिगृह्य- **ॐ कोऽदात् कामोऽदात्कामायादात्। कामो दाता कामः प्रतिग्रहीता कामैतत्ते।** इति पठेत्। ततो दाता-**मम श्रेष्ठकुले जाता पालिता च विवर्द्धिता। अद्य तुभ्यं मया दत्ता तव सन्ततिवृद्धये।** इति वरं सम्प्रार्थ्य [१]कन्यां देवीमिव ध्यायन् साञ्जलिः **कन्ये ममाग्रतो भूयाः कन्ये मे देवि पार्श्वयोः। कन्ये मे पृष्ठतो भूयास्त्वद्दानान्मोक्षमाप्नुयाम्।** इति प्रार्थयेत्। **त्रैलोक्यनाथ देवेश सर्वभूतदयानिधे। दानेनानेन मे प्रीतो भव शान्तिं प्रयच्छ मे॥ श्रुत्वा कन्याप्रदानं च पितरः प्रपितामहाः। विमुक्ता सर्वपापेभ्यो ब्रह्मलोके व्रजन्ति ते।** प्रभुं सम्प्रार्थ्य प्रतिवचनं वरेण कुर्यात्। **धर्मे चार्थे च कामे च त्वयेमतिचारतः। न त्याज्याऽऽज्याहुतिरिव भूमौ संसारभूतिदा॥ यस्त्वया धर्मश्चरितः कर्त्तव्यश्चानया सह। धर्मे चार्थे च कामे च नातिचार्या त्वया क्वचित्॥** ततो वरः **धर्मार्थकामकैः कार्यैर्देहच्छायेव सर्वदा। अहं नातिचरामीह यदुक्तं भवता मयि॥** इति कथयेत्।

तत्पश्चात् कन्याप्रदः साक्षतजलद्रव्यमादाय **ॐ अद्य कृतैतत् कन्यादानप्रतिष्ठार्थं सुवर्णमग्निदैवतम् अमुकगोत्राय अमुकनाम्ने वराय दक्षिणात्वेन तुभ्यमहम् सम्प्रददे।** इति दक्षिणां दद्यात्। अथ देशाचारात् स्वस्वसामर्थ्यानुसारेण कन्याद्रव्यं जलपात्रे सर्वे सामाजिकाः स्त्रियः पुरुषाश्च दद्युः। तच्च पुरोहितः गृह्णीयात्। ततो वरस्तां पाणौ गृहीत्वा - **ॐ यदेषि मनसा दूरं दिशो नु पवमानो वा हिरण्यपर्णो वैकर्णः सत्वा मन्मनसा करोतु।** श्री अमुकदेवीति वधूनाम पठन् प्रतिग्रहगृहात् निष्क्रामेत्। अस्मिन् समये कन्याया नामान्तरं विधेयम्।

ततो वेदिकाया दक्षिणस्यां दिशि परिपूर्णं दृढकलशं पुष्पाक्षतचन्दनकुशाम्रपत्रौषधिदक्षिणासमन्वितम् उर्ध्वं तिष्ठन् मौनी कश्चन दृढपुरुषः स्कन्धेऽभिषेकपर्यन्तं धारयेत्। ततोऽग्निसमीपगतौ वधूवरौ परस्परं समीक्षेथाम्। कन्याप्रदप्रैषानन्तरम्- **ॐ अघोरचक्षुरपतिध्न्येधि शिवा पशुभ्यः सुमनाः सुवर्च्चाः। वीरसूर्देवकामा स्योना शन्नो भव द्विपदे शं चतुष्पदे। ॐ**

---

१. सम्प्रदाने भवेत्कन्या घृतहोमे सुमङ्गली।
वामभागे भवेद्भार्या पत्नी चातुर्थ्यकर्मणि॥

सोमः प्रथमो विविदे गन्धर्वो विविद उत्तरस्तृतीयोऽग्निष्टे पतिस्तुरीयस्ते मनुष्यजः ॐ सोमोऽददद्गन्धर्वाय गन्धर्वोऽदददग्नये रयिं पुत्रांश्चादादग्निर्मह्यमथो इमाम्। ॐ सा नः पूषा शिवतमामीरय सा नः ऊरु उशती विहर यस्यामुशन्तः प्रहराम शेपं यस्यामुकामा बहवो निविष्टयै॥ इति वरः पठेत् मन्त्रान्ते च परस्परं निरीक्षेताम्। ततोऽग्निं प्रदक्षिणीकृत्य पश्चादग्नेरहतवस्त्रवेष्टितं तृणपूलके कटे वा दक्षिणपादं दत्त्वा वधूं दक्षिणतः कृत्वा तामुपवेश्य स्वयमुपविशेत्। अथ वरः पुष्प- चन्दनताम्बूलवस्त्राण्यादाय- **ॐ तत्सत् अद्य कर्त्तव्यविवाहहोमकर्मणि कृताकृतावेक्षणरूपब्रह्मकर्म कर्तुममुकगोत्रं अमुकशर्माणं ब्राह्मणं एभिः पुष्पचन्दनताम्बूलवासोभिर्ब्रह्मत्वेन त्वामहं वृणे॥** इति ब्रह्माणं वृणुयात् **वृतोऽस्मीति** प्रतिवचनम्। वरेण यथा विहितं **कर्म कुरु** इत्युक्ते **ओं करवाणीति** ब्रह्मा वदेत्। ततोऽग्नेर्दक्षिणतो ब्रह्मणोविशुद्धमासनं दत्त्वा तदुपरि प्रागग्रान्कुशानास्तीर्य उदङ्मुख उपविश्य गन्धाक्षतादिभिः सम्पूजयेत्। ततः प्रणीतापात्रं पुरतः कृत्वा वारिणा परिपूर्य कुशत्रयेणाच्छाद्य ब्रह्मणो मुखम- वलोक्याग्नितो वितस्त्यन्तरे उत्तरतः कुशोपरि निदध्यात् ततः परिस्तरणं बर्हिषश्चतुर्थभागं षोडशदर्भरूपमादाय चतुर्भिर्दर्भैराग्नेयादीशानान्तमुत्तराग्रैः। ब्रह्मणोऽग्निपर्यन्तं प्राग्रगैः परिस्तरणं कुर्यात्। ततोऽग्नेरुत्तरतः पश्चिमदिशि पवित्रच्छेदनार्थं कुशत्रयम्, पवित्रकरणार्थं साग्रमनन्तरगर्भकुशपत्रद्वयं, प्रोक्षणीपात्रं, आज्यस्थाली, सम्मार्जनार्थं कुशत्रयम् उपयमनार्थं वेणीरूपकुशत्रयं, समिधस्तिस्रः पालाश्यः स्रुवः खादिरो हस्तमात्रः, आज्यं गव्यं षट्पञ्चाशदुत्तरशतद्वयावच्छिन्नतण्डुलं पूर्णपात्रं दक्षिणावरो वा एतानि पवित्रच्छेदनकुशानां पूर्वपूर्वदिशि क्रमेणासादनीयानि। एवमन्यान्यपि सिन्दूरशमीपलाशमिश्रा लाजादृषदुपलं शूर्पः पूगीफलनारिकेलादीन्यसाधारणवस्तून्यासादनीयानि ततः पवित्रच्छेदनकुशैरग्रतः प्रादेशमात्रं विहाय पवित्रे छित्वा दक्षिणावर्तग्रन्थिं च दत्त्वा पवित्रच्छेदनं कुशोन्मूलं चोत्तरतः क्षिपेत्। ततः सपवित्रकरेण प्रणीतोदकं त्रिः प्रोक्षणीपात्रे निधाय व्यस्तानामिकाङ्गुष्ठाभ्यां उत्तराग्रे पवित्रे गृहीत्वा त्रिरुत्पवनं ततः प्रागग्रं प्रोक्षणीपात्रं वामहस्ते कृत्वा प्रणीतासन्निधौ निधायानामिकाङ्गुष्ठाभ्यां गृहीतपवित्राभ्यां तज्जलं किञ्चित् त्रिरुत्क्षित्य प्रणीतोदकेन पवित्रानीतेनोत्तान-

हस्तेन प्रोक्षणीमभिषिच्य प्रोक्षणीजलेन आज्यस्थाल्यादीन्यासितवस्तूनि पूर्णपात्रपर्यन्तानि क्रमेणैकैकशः प्रोक्ष्य असञ्चरे प्रणीताग्नयोरन्तराले प्रोक्षणीपात्रं निदध्यात्। आज्यस्थाल्यामाज्यनिर्वापः ततोऽधिश्रित्य ज्वलत्तृणादिकमादायाज्य-स्योपरि प्रदक्षिणं समन्ताद् भ्रामयित्वा तत्तृणादिकं बह्नौ क्षिपेत् ततो दक्षिणपाणिना स्रुवमादायाधोमुखमग्नौ त्रिस्तापयित्वा वामहस्ते कृत्वा सम्मार्जनकुशानामग्रैरन्तरतो मूलैर्बाह्यतः स्रुवमूर्ध्वमुखं सम्मृज्य प्रणीतोदकेनाभ्युक्ष्य पुनः पूर्ववत् प्रताप्य दक्षिणतो निधाय सम्पूजयेत्॥ **ओं आवाहयाम्यहं देवं स्रुवं शेवधिमुत्तमम्। स्वाहाकार-स्वधाकार-वषट्कार-समन्वितम्॥** इति सम्पूजयेत् ततः प्रदक्षिणक्रमेणाज्यमवतार्य अग्रतो निधाय प्रोक्षणीवदुत्पूयावेक्ष्य सत्यपद्रव्ये तन्निरसनं पुनः प्रोक्षणीमुत्पूय उत्थायोपयमनकुशान् वामहस्ते कृत्वा प्रजापतिं मनसा ध्यात्वा तूष्णीमग्नौ घृताक्ताः समिधस्तिस्रः क्षिपेत्। उपविश्य सपवित्रप्रोक्षण्युदकेनाग्निमीशानादि तत उदक्पर्यन्तं पर्युक्ष्य[१] प्रणीतापात्रे पवित्रे निधाय पातितदक्षिणजानुः कुशेन ब्रह्मणान्वारब्धः कुशसहितं प्रसारिताङ्गुलिहस्तं हृदि निधाय दक्षिणहस्तेन मूले चतुरङ्गुलं त्यक्त्वा शङ्खसन्निभमुद्रया स्रुवं गृहीत्वा समिद्धतमेऽग्नौ सन्ततघृतधारया मनसा प्रजापतिं ध्यायन् स्रुवेण तूष्णीं सशेषं जुहुयात्। तत्तदाहुत्यनन्तरं स्रुवावस्थितघृतशेषस्य सर्वत्र प्रोक्षणीपात्रे प्रक्षेपः[२]। **ॐ प्रजापतये स्वाहा इदं प्रजापतये।** इति मनसा प्रजापतिं ध्यात्वा **ॐ सोमाय स्वाहा इदं सोमाय।** इत्याज्यभागौ। ततो महाव्याहृतिहोमः **ॐ भूः स्वाहा इदमग्नये। ॐ भुवः स्वाहा इदं वायवे। ॐ स्वः स्वाहा इदं सूर्याय।** ततः सर्वप्रायश्चित्तहोमः **ॐ त्वन्नोऽग्ने वरुणस्य विद्वान् देवस्य हेडो अवयासि सीष्ठाः। यजिष्टो बह्नितमः शोशुचानो विश्वा द्वेषा ꣳसि प्रमुमुग्ध्यस्मत् स्वाहा इदमग्निवरुणाभ्याम्। ॐ सत्वन्नो अग्ने अवमो भवोती नेदिष्टो अस्या उषसो व्युष्टौ। अवयक्ष्व नो वरुणꣳरराणो व्रीहि मृडीकꣳसुहवो न एधि स्वाहा। इदमग्निवरुणाभ्याम्।**

---

१. अधोमुख उद्धर्वपादः प्राङ्मुखो हव्यवाहनः।
तिष्ठत्येव स्वभावेन आहुतिः कुत्र दीयते॥
सपवित्राम्बुहस्तेन वह्नेः कुर्यात् प्रदक्षिणम्।
हव्यवाट् सलिलं दृष्ट्वा विभेति सम्मुखोभवेत्॥

२. स्रुवहोमे सदा त्यागः प्रोक्षणीपात्रमध्यतः।

ॐ अयाश्चाग्नेऽस्य नभिशस्तिपाश्च सत्वमित्वमया असि। अयानो यज्ञं वहास्ययानो धेहि भेषज ॐस्वाहा इदमग्नये। ॐ ये ते शतं वरुण ये सहस्त्रं यज्ञियाः पाशा वितता महान्तः। तेभिर्नो अद्य सवितोत विष्णुर्विश्वे मुञ्चन्तु मरुतः स्वर्क्काः स्वाहा। इदं वरुणाय सवित्रे विष्णवे विश्वेभ्यो देवेभ्यो मरुद्भ्यः स्वर्केभ्यश्च। ॐ उदुत्तमं वरुण पाशमस्मदवाधमं विमध्यमॐश्रथाय अथावयमादित्यव्रते तवानागसो अदितये स्याम स्वाहा इदं वरुणाय। प्रणीतोदकोपस्पर्शनम्। ततोऽन्वारम्भं विना जुहुयात्।

अथ राष्ट्रभृद्होमः[१]

ॐ ऋताषाडृतधामाग्नि- र्गन्धर्वः स न इदं ब्रह्मक्षत्रं पातु तस्मै स्वाहा वाट्॥ इदमृतासाहे ऋतधाम्नेऽग्नये गन्धर्वाय॥ ॐ ऋताषाडृतधामाग्निर्गन्धर्वः तस्यौषधयोऽप्सरसो मुदो नाम ताभ्यः स्वाहा। इदमौषधिभ्योऽप्सरोभ्योमुद्भ्यः। ॐ स ॐ हितो विश्वसामा सूर्यो गन्धर्वः स न इदं ब्रह्मक्षत्रं पातु तस्मै स्वाहा वाट्। इदं सॐहिताय विश्वसाम्ने सूर्याय गन्धर्वाय। ॐ स ॐ हितो विश्वासामा सूर्यो गन्धर्वः तस्य मरीचोऽप्सरस आयुवो नाम ताभ्यः स्वाहा। इदं - मरीचिभ्योऽप्सरोभ्य आयुभ्यः। ॐ सुषुम्णः सूर्यरश्मिश्चन्द्रमा गन्धर्वः स न इदं ब्रह्मक्षत्रं पातु तस्मै स्वाहा वाट्। इदं सुषुम्णाय सूर्यरश्मये चन्द्रमसे गन्धर्वाय॥ ॐ सुषुम्णः सूर्यरश्मिश्चन्द्रमा गन्धर्वः तस्य नक्षत्राण्यप्सरसो भेकुरयो नाम ताभ्यः स्वाहा। इदं नक्षत्रेभ्योऽप्सरोभ्यो भेकुरिभ्यः। ॐ इषिरोविश्वव्यचो वातो गन्धर्वः स न इदं ब्रह्मक्षत्रं पातु तस्मै स्वाहा वाट्। इदमिषिराय विश्वव्यचसे वाताय गन्धर्वाय। ॐ इषिरो विश्वव्यचावातो गन्धर्वः तस्यापोऽअप्सरस ऊर्जो नाम ताभ्यः स्वाहा। इदमद्भ्योऽप्सरोभ्यः उर्ग्भ्यः। ॐ भुज्युः सुपर्णो यज्ञो गन्धर्वः स न इदं ब्रह्मक्षत्रं पातु तस्मै स्वाहा वाट्। इदं भुज्यवे सुपर्णाय यज्ञाय

---

१. विवाहे होमयेन्नित्यं राष्ट्रभृत् द्वादशाहुतिः।
जयाहुतीर्दश त्रींश्च होमयेत् तत्र चेच्छया॥

गन्धर्वाय॥ ॐ भुज्युः सुपर्णो यज्ञो गन्धर्वः तस्य दक्षिणा अप्सरसस्तावानाम ताभ्यः स्वाहा इदं दक्षिणाभ्योऽप्सरोभ्यस्तावाभ्यः। ॐ प्रजापतिर्विश्वकर्मा मनोगन्धर्वः स न इदं ब्रह्मक्षत्रं पातु तस्मै स्वाहा वाट्। इदं प्रजापतये विश्वकर्मणे मनसे गन्धर्वाय ॐ प्रजापतिर्विश्वकर्मा मनोगन्धर्वः तस्य ऋक्सामान्यप्सरस एष्ट्यो नाम ताभ्यः स्वाहा। इदमृक् सामभ्योऽप्सरोभ्य एष्टिभ्यः।

अथ जयाहोमः

ॐ चित्तं च स्वाहा इदं चित्ताय। ॐ चित्तिश्च स्वाहा इदं चित्यै। ॐ आकूतं च स्वाहा इदमाकूताय। ॐ आकूतिश्च स्वाहा। इदमाकूत्यै। ॐ विज्ञातं च स्वाहा, इदं विज्ञाताय। ॐ विज्ञातिश्च स्वाहा इदं विज्ञात्यै। ॐ मनश्च स्वाहा इदं मनसे। ॐ शक्वरीश्च स्वाहा, इदं शक्वरीभ्यः। ॐ दर्शश्च स्वाहा, इदं दर्शाय। ॐ पौर्णमासं च स्वाहा, इदं पौर्णमासाय। ॐ बृहच्च स्वाहा, इदं बृहते। ॐ रथन्तरं च स्वाहा, इदं रथन्तराय। ॐ प्रजापतिर्जयानिन्द्राय वृष्णो प्रायच्छदुग्रः पृतनाजयेषु। तस्मै विशः समनमन्त सर्वाः स उग्रः स इहव्यो बभूव स्वाहा। इदं प्रजापतये जयानिन्द्राय। उदकस्पर्शः। इति जयाहोमः॥

अथाभ्यातानहोम[१]:

ॐ अग्निर्भूतानामधिपतिः स मावत्वस्मिन् ब्रह्मण्यस्मिन् क्षत्रेऽस्या- माशिष्यस्यां पुरोधायामस्मिन् कर्मण्यस्यां देवहूत्या ँ स्वाहा इदमग्नये भूतानामधिपतये। ॐ इन्द्रो ज्येष्ठानामधिपतिः स मावत्वस्मिन् ब्रह्मण्यस्मिन् क्षत्रेऽस्यामाशिष्यस्यां पुरोधायामस्मिन् कर्मण्यस्यां देवहूत्या ँ स्वाहा इदमिन्द्राय ज्येष्ठानामधिपतये॥ ॐ यमः पृथिव्या अधिपतिः

---

१. अष्टादशाऽपि जुहुयादभ्यातानाहुतीस्तथा।
आहुतित्रितयं दद्याद् विवाहे साक्षिकाग्नये॥

स मावत्वस्मिन् ब्रह्मण्यस्मिन् क्षत्रेऽस्यामा- शिष्यस्यां पुरोधायामस्मिन् कर्मण्यस्यां देवहूत्या ॐ स्वाहा। इदं यमाय पृथिव्या अधिपतये॥ अत्र प्रणीतोदकस्पर्शः॥ ॐ वायुरन्तरिक्षस्याधिपतिः स मावत्वस्मिन् ब्रह्मण्यस्मिन् क्षत्रेऽस्यामाशिष्यस्यां पुरोधायामस्मिन् कर्मण्यस्यां देवहूत्याॐस्वाहा। इदं वायवेऽन्तरिक्षस्याधिपतये॥ ॐ सूर्यो दिवोऽधिपतिः स मावत्वस्मिन् ब्रह्मण्यस्मिन् क्षत्रेऽस्यामाशिष्यस्यां पुरोधायामस्मिन् कर्मण्यस्यां देवहूत्या ॐ स्वाहा। इदं सूर्याय दिवोऽधिपतये॥ ॐ चन्द्रमाः नक्षत्राणामधिपतिः स मावत्वस्मिन् ब्रह्मण्यस्मिन् क्षत्रेऽस्यामाशिष्यस्यां पुरोधायामस्मिन् कर्मण्यस्यां देवहूत्या ॐस्वाहा। इदं चन्द्रमसे नक्षत्राणामधिपतये॥ ॐ बृहस्पति र्ब्रह्मणोऽधि-पतिः स मावत्वस्मिन् ब्रह्मण्यस्मिन् क्षत्रेऽस्यामाशिष्यस्यां पुरोधायामस्मिन् कर्मण्यस्यां देवहूत्याॐस्वाहा। इदं बृहस्पतये ब्रह्मणोऽधिपतये॥ ॐ मित्रः सत्यानामधिपतिः स मावत्वस्मिन् ब्रह्मण्यस्मिन् क्षत्रेऽस्यामाशिष्यस्यां पुरोधायामस्मिन् कर्मण्यस्यां देवहूत्या ॐ स्वाहा। इदं मित्राय सत्यानामधिपतये॥ ॐ वरुणोऽपामधिपतिः स मावत्वस्मिन् ब्रह्मण्यस्मिन् क्षत्रेऽस्यामाशिष्यस्यां पुरोधायामस्मिन् कर्मण्यस्यां देवहूत्या ॐ स्वाहा। इदं वरुणायापामधिपतये। ॐ समुद्रः स्त्रोत्यानामधिपतिः स मावत्वस्मिन् ब्रह्मण्यस्मिन् क्षत्रेऽस्यामाशिष्यस्यां पुरोधायामस्मिन् कर्मण्यस्यां देवहूत्याॐस्वाहा। इदं समुद्राय स्त्रोत्यानामधिपतये॥ ॐ अन्न ॐ साम्राज्यानामधिपतिः स मावत्वस्मिन् ब्रह्मण्यस्मिन् क्षत्रेऽस्यामाशिष्यस्यां पुरोधायामस्मिन् कर्मण्यस्यां देवहूत्याॐस्वाहा। इदमन्नाय साम्राज्यानामधि पतये। ॐ सोम औषधीनामधिपतिः स मावत्वस्मिन् ब्रह्मण्यस्मिन् क्षत्रेऽस्यामाशिष्यस्यां पुरोधायामस्मिन् कर्मण्यस्यां देवहूत्या ॐ स्वाहा।। इदं सोमायौषधीनामधिपतये॥ ॐ सविता प्रसवानामधिपतिः स मावत्वस्मिन् ब्रह्मण्यस्मिन् क्षत्रेऽस्यामाशिष्यस्यां पुरोधायामस्मिन् कर्मण्यस्यां देवहूत्या ॐ स्वाहा। इदं प्रसवानामधिपतये॥ ॐ रुद्रः

पशूनामधिपतिः स मावत्वस्मिन् ब्रह्मण्यस्मिन् क्षत्रेऽस्यामशिष्यस्यां पुरोधायामस्मिन् कर्मण्यस्यां देवहूत्या ꣳ स्वाहा। इदं रुद्राय पशूनामधिपतये। अत्र प्रणीतोदकस्पर्शः। ॐ त्वष्टा रूपाणामधिपतिः स मावत्वस्मिन् ब्रह्मण्यस्मिन् क्षत्रेऽस्यामाशिष्यस्यां पुरोधायामस्मिन् कर्मण्यस्यां देवहूत्या ꣳ स्वाहा। इदं त्वष्ट्रे रूपाणामधिपतये। ॐ विष्णुः पर्वतानामधिपतिः स मावत्वस्मिन् ब्रह्मण्यस्मिन् क्षत्रेऽस्यामाशिष्यस्यां पुरोधायामस्मिन् कर्मण्यस्यां देवहूत्या ꣳ स्वाहा इदं विष्णवे पर्वतानामधिपतये॥ ॐ मरुतोगणानामधिपतयस्ते मावन्त्वस्मिन् ब्रह्मण्यस्मिन् क्षत्रेऽस्यामाशिष्यस्यां पुरोधायामस्मिन् कर्मण्यस्यां देवहूत्या ꣳ स्वाहा इदं मरुद्भ्योगणानामधिपतिभ्यः। ॐ पितरः पितामहा परेऽवरे ततास्ततामहाः इह मावन्त्वस्मिन् ब्रह्मण्यस्मिन् क्षत्रेऽस्यामाशिष्यस्यां पुरोधायामस्मिन् कर्मण्यस्यां देवहूत्याꣳस्वाहा। इदं पितृभ्यः पितामहेभ्यः परेभ्योऽवरेभ्यस्ततेभ्यस्तताम-हेभ्यश्च। अत्र प्रणीतोदक[१]स्पर्शः। इत्यभ्यातानहोमः।

अथाग्न्यादिपञ्चकहोमः

ॐ अग्निरेतु प्रथमो देवतानां सोऽस्यै प्रजां मुञ्चतु मृत्युपाशात्। तदय ꣳ राजा वरुणोऽनुमन्यतां यथेय ꣳ स्त्रीपौत्रमध्न्यनरोदात् स्वाहा। इदमग्नये। ॐ इमामग्निस्त्रायतां गार्हपत्यः प्रजामस्यै नयतु दीर्घमायुः। अशून्योपस्था जीवतामस्तु माता पौत्रमानन्दमभिबुध्यतामियꣳस्वाहा। इदमग्नये। ॐ स्वस्तिनो अग्ने दिव आ पृथिव्या विश्वा निधेह्यथा यजत्र। यदस्यां महि दिवि जातं प्रशस्तं तदस्मासु द्रविणं धेहि चित्रꣳस्वाहा। इदमग्नये। ॐ सुगन्नु पन्था प्रदिशन्न एहि ज्योतिष्मध्येह्यजरन्न आयुः। अपैतु मृत्युरमृन्न आगाद्वैवस्वतो नोऽभयं कृणोतु स्वाहा। इदं वैवस्वताय। ततः शिष्टाचाराद् वधूं पटेनान्तर्धाय

---

१. यमरुद्रपितृणां च मृतेश्चापि तथैव च। आहुत्यन्ते कर्त्तव्यो जलस्पर्शः सदा बुधैः॥ यमरुद्रादिकं हुत्वा स्पृशेत् प्राणीतकं जलम्॥

मनसा मन्त्रं पठन् मृत्यवे जुहोति **ॐ परं मृत्यो अनुपरो हि पन्थां यस्ते अन्य इतरो देवयानात्। चक्षुष्मते शृण्वते ते ब्रवीमि मा नः प्रजाᳪंरीरिषो मोत वीरान् स्वाहा।** इदं वैवस्व[1]ताय। ततः प्रणीतोदकस्पर्शः॥

लाजाहोमः

ततो [2]लाजाहोमः कार्यः, तत्र प्राङ्मुखी तिष्ठन्ती कुमारी अञ्जलिं तनोति। वरश्च अनुपृष्ठं परिक्रम्य वध्वा दक्षिणतो भूत्वा स्वेनाञ्जलिना दक्षिणकरेण वा कुमार्यञ्जलिमालभ्य उदङ्मुखस्तिष्ठति॥ अथ कुमार्या भ्राता[3] उपकल्पितान् शमीपलाशमिश्रॉंल्लाजान् घृतेनाभिघार्य नवीनशूर्पे चतुर्द्धा कृत्वा तेष्वेकं भागं प्रथमं स्वेनाञ्जलिना गृहीत्वा कुमार्या अञ्जलावावपति कुमारी तान् लाजान्[4] अञ्जलिना गृहीत्वा विवाहाग्नौ जुहुयात्। तत्र मन्त्रः **ॐ अर्यमणं देवं कन्या अग्निमयक्षत। स नो अर्यमा देवः प्रेतो मुञ्चतु मा पतेः स्वाहा।** इदमर्यम्णे। पुनः **ॐ इयं नार्युपब्रूते लाजानवपन्तिका। आयुष्मानस्तु मे पतिरेधन्तां ज्ञातयो मम स्वाहा** इदमग्नये। **ॐ इमांल्लाजानावपाम्यग्नौ समृद्धिकरणं तव, मम तुभ्यं च सवननं तदग्निरनुमन्यतामियᳪंस्वाहा।** इदमग्नये। ततो वरः कुमार्याः सांगुष्ठं दक्षिणहस्तमुत्तानं गृह्णाति वक्ष्यमाणमन्त्रांश्च पठति। **ॐ गृभ्णामि ते सौभगत्वाय हस्तं मया पत्या जरदष्टिर्यथा सः। भगो अर्यमा सविता पुरन्धिर्मह्यं त्वादुर्गार्हपत्याय देवाः। ॐ अमोहमस्मि सात्व ᳪं सात्वमस्यमो अहम्। सामाहमस्मि ऋक त्वं द्यौरहं पृथिवी त्वम् तावेव विवहावहै सहरेतो दधावहै प्रजां प्रजनयावहै पुत्रान् विन्दावहै बहून् ते सन्तु जरदष्टयः**

---

१. धूर्जटेस्त्यागमैशान्ये यमपित्रोस्तु दक्षिणे। आचार्यवरयोर्मध्ये मृत्युत्यागो विधीयते॥

२. लाजाहोमे समिद्होमे ऊर्ध्वहोमे तथैव च। तिष्ठतैव हि कर्त्तव्या स्वाहाकारा अपि ध्रुवम्॥

३. अन्यो भ्रातुरभावे स्याद्बान्धवो जातिरेव वा।
भ्रातृस्थाने भ्रातृव्यस्य मातुलस्य च यः सुतः।
मातुः स्वसुः सुतस्तद्वत् तद्वत् पितृस्वसुः सुतः॥

४. एकाहुतिं त्रिधाकृत्वा आपोशाने बलौ तथा। लाजाहोमं प्रकुर्वीत इति शातातपोऽब्रवीत्॥
तिष्ठन्त्यतिष्ठता पत्या गृहीताञ्जलिनैव सा। अञ्जलिस्थान् त्रिधासर्वान् प्राङ्मुखी प्रतिमन्त्रतः॥
लाजाः स्युर्व्रीहयो भ्राष्टाञ्जुहुयान्मुष्टिसम्मितम्। प्राजापत्येन तीर्थेन दैवेनैवेति बह्वृचाः॥

संप्रियौ रोचिष्णू सुमनस्यमानौ पश्येम शरदः शतं जीवेम शरदः शत ॐ शृणुयाम शरदः शतम्। अथ वधूमग्नेरुत्तरतः प्राङ्मुखीं पूर्वोपकल्पितदृषदुपलोपरि दक्षिणेपादेनारोहयति वरः॥ **ॐ आरोहेममश्मानमश्मेव त्वं ॐ स्थिरा भव। अभितिष्ठ पृतन्यतोऽव वाधस्व पृतनायतः।।** इति आरूढायामेव तस्यां वरो गाथां गायति। **ॐ सरस्वति प्रेदमव सुभगे वाजिनीवति यान्त्वा विश्वस्य भूतस्य प्रजायामस्याग्रतः। यस्यां भूत ॐ समभवद्यस्यां विश्वमिदं जगत् तामद्य गाथां गास्यामि या स्त्रीणामुत्तमं यशः।**

ततोऽग्रे वधूः[1] पश्चाद्वरः प्रणीताब्रह्मसहितमग्निं [2]प्रदक्षिणं-कुर्याताम् तत्र वरो मन्त्रं पठेत्- **ॐ तुभ्यमग्ने पर्यवहन्त्सूर्या वहतु ना सह। पुनः पतिभ्यो जायां दाग्ने प्रजया सह।** तत पश्चादग्नेः प्राङ्मुखौ स्थित्वा लाजाहोमसाङ्गुष्ठ-पाणिग्रहण-अश्मारोहण[3]-गाथागान-अग्निप्रदक्षिणानि पुनरपि तथैव द्विः कर्तव्यानि। एवं नव लाजाहुतयः, साङ्गुष्ठपाणिग्रहणत्रयं गाथागानत्रयं अग्निपरिक्रमणत्रयं च सम्पद्यते। ततस्तृतीयपरिक्रमणानन्तरं भ्रातृदत्तान् शूर्पकोणप्रदेशेन सर्वाल्लाजांस्तिष्ठन्ती कुमारी जुहोति तन्मन्त्रः - **ॐ भगाय स्वाहा इदं भगाय।** ततोऽग्रे वरः पश्चाद्वधूस्तूष्णीमेव चतुर्थपरिक्रमणं कुरुतः। ततो वर उपविश्य ब्रह्मणान्वारब्ध आज्येन **ॐ प्रजापतये स्वाहा इदं प्रजापतये।** इति मनसा प्रजापतिं ध्यात्वा जुहुयात्। अत्र प्रोक्षणीपात्रे हुतशेषस्य प्रक्षेपः कार्यः॥

अथ सप्तपदीविधानम्[4]

तदनन्तरं हरिद्रया लाजाभिर्वा उत्तरोत्तरक्रमेण विहितसप्तमण्डलेषु प्रत्येकं वध्वा सप्तपदाक्रमणं वरोऽग्राङ्कितमन्त्रैः कारयेत्। अत्रोभयोः समयपरिपालनमप्युक्तम्। प्रथमपदेऽत्र कन्यावाक्यम्- **मिष्ठान्नं धनधान्यं च भक्ष्यभोज्यादिकं गृहे। मदधीनं च कर्त्तव्यं मानसंरक्षणाय मे॥ ॐ**

---

१. कामस्त्वमोघबाणै स्वैः प्रहरेदतिदारुणैः। तस्मादग्रे भवेत् कन्या वाणभीतिप्रशान्तये॥
कन्यकाग्रे वरं कृत्वा ब्राह्मणो ज्ञानदुर्बलः। विधवा जायते नारी निषेधस्तेन हेतुना॥

२. लाजानाज्यं स्रुवं कुम्भं द्विजमश्मानमेव च। एतान् हि बाह्यतः कृत्वा शेषाणां तु प्रदक्षिणम्॥

३. सव्येनादाय हस्तेन वधूपादं च दक्षिणाम्। शिलामारोहयेत्प्रागायतां दक्षिणपाणिना॥

४. स्वगोत्राद् भ्रंश्यते नारी विवाहात्सप्तमे पदे।
पतिगोत्रेण कर्त्तव्या तस्याः पिण्डोदकक्रिया॥

एकमिषे विष्णुस्त्वा नयतु। इति वरेणोक्ते द्वितीयपदे कन्यावाक्यम्- कुटुम्बं रक्षयिष्यामि सदा ते मञ्जुभाषिणी। दु:खे धीरा सुखे हृष्टा द्वितीये सा वदेद्वचः। ॐ द्वे ऊर्जे विष्णुस्त्वा नयतु इति वरेणोक्ते तृतीयपदे कन्यावाक्यम्- पतिभक्तिरता नित्यं क्रीडयिष्यामि त्वया सह। त्वदन्यं न वरं मन्ये तृतीयं साब्रवीद्वचः। ॐ त्रीणि रायस्पोषाय विष्णुस्त्वा नयतु इति वरेणोक्ते चतुर्थपदे कन्यावाक्यम्-लालयामि सुकेशांस्ते गन्धमाल्यानुलेपनैः। काञ्चनैर्भूषणैस्तुभ्यं तुरीये सा पदे वदेत्। ॐ चत्वारि मयोभुवाय विष्णुस्त्वा नयतु इति वरेणोक्ते पञ्चमपदे कन्यावाक्यम्- आर्त्ते आर्ता भविष्यामि सुखदु:ख- विभागिनी। तवाज्ञां पालयिष्यामि सत्यमेतद्ब्रवीम्यहम्॥ ॐ पञ्चपशुभ्यो विष्णुस्त्वा नयतु इति वरेणोक्ते षष्ठपदे कन्यावाक्यं- यज्ञे होमे च दानादौ भविष्यामि त्वया सह। धर्मार्थकामकार्येषु वधू षष्ठे पदे वदेत्। ॐ षड्ऋतुभ्यो विष्णुस्त्वा नयतु इति वरेणोक्ते सप्तपदे कन्यावाक्यम्- अत्रांशे साक्षिणो देवा मनोभावप्रबोधिनः। वञ्चनं न करिष्यामि सप्तमे सा पदे वदेत्। ॐ सखे सप्त पदा भव सा मामनुव्रता भव विष्णुस्त्वा नयतु इति वरकथनानन्तरं यथास्थानमागत्योपविश्य पुरुषस्कन्धस्थितदृढकुम्भादाम्रपल्लवेन दूर्वापुञ्जेन कुशपत्रैर्वा जलमानीय तेन वक्ष्यमाणमन्त्रं पठन् वरो वधूमूर्धन्यभिषिञ्चेत् - ॐ आपः शिवाः शिवतमाः शान्ताः शान्ततमास्तास्ते कृण्वन्तु भेषजम्। पुनस्तथै- वानीतजलेन वक्ष्यमाणमन्त्रैरासिञ्चेत्-ॐ आपोहिष्ठा मयोभुवस्तान ऊर्जे दधातन। महेरणाय चक्षसे। यो वः शिवतमोरसस्तस्य भाजयतेह नः उशतीरिव मातरः। तस्मा अरङ्गमाम वो यस्य क्षयाय जिन्वथ आपो जन यथा च नः॥ इति तिसृभिर्वधूमात्मानं चाभिषिञ्चति॥ अथ दिवा विवाहे वरः सुभगे सूर्यमुदीक्षस्वेति वधूं सम्बोधयेत्। ॐ तच्चक्षुर्देवहितं पुरस्ताच्छुक्रमुच्चरत् पश्येम शरदः शतं जीवेम शरदः शतꣳ शृणुयाम शरदः शतं प्रब्रवाम शरदः शतमदीनाःस्याम शरदः शतं भूयश्च शरदः शतात्॥ अनेन मन्त्रेण वधूः सूर्यं पश्यति। अस्तमिते रवौ ध्रुवमुदीक्षस्वेति वरेणोक्ते वधूर्ध्रुवं पश्येत् तत्र मन्त्रः पठितव्यः। ॐ ध्रुवमसि ध्रुवं त्वा पश्यामि ध्रुवैधि पोष्येमयि। मह्यं त्वादाद्

बृहस्पतिर्मया पत्या प्रजावती सञ्जीव शरदः शतम्॥ इति पठित्वा वधूं पृच्छेत्, **ध्रुवमुदीक्षितम्** इति। सा यदि न पश्यति, तदापि **पश्यामि** इति ब्रूयात्।

ततो वरो वध्वा दक्षिणांसस्योपरि स्वदक्षिणहस्तं नीत्वा तस्याः हृदयमालभेत्। तत्र मन्त्रः -**ॐ मम व्रते ते हृदयं दधामि मम चित्तमनुचित्तं तेऽस्तु। मम वाचमेकमना जुषस्व प्रजापतिष्ट्वा नियुनक्तु मह्यम्॥** ततो वधूं प्रति वरोक्तिः - **स्त्रीणां स्थितिर्वामपार्श्वे कथं त्वं दक्षिणे स्थिता। मया विवाहिता दत्ता तव पित्रा च बन्धुभिः। उत्तिष्ठ वामभागं मे पत्निभावं भज प्रिये। यत्किञ्चित्तव चित्तेऽस्ति तद्वदस्व ममाग्रतः।** कन्योवाच-**सन्ति मे सप्तवाक्यानि त्वया ग्राह्याणि सर्वदा। पालनीयानि यदि ते वामाङ्गं सम्भजाम्यहम्॥** लब्धोऽसि त्वं मया भर्तः **पुण्यैश्च विविधैः कृतैः। देवी संपूजिता नित्यं वन्दनीयोऽसि मे सदा॥ व्रतोद्यापनदानानि स्त्रीणां भावाः स्वभावजाः। कृत्यभङ्गो न ते कार्यस्तव सहयोगमालभे। तीर्थव्रतोद्यापनयज्ञदानं मया सह त्वं यदि कान्त कुर्याः। वामाङ्गमायामि तदा त्वदीयं नत्वन्यथा दक्षिणपार्श्वतोऽहम्॥** अथ कन्यावाक्यं द्वितीयम् -**भूषणानि विचित्राणि रत्नधातुमयानि च दद्यान्न प्रतिगृह्णीयात् सदैव प्रार्थना मम। हव्यप्रदानैरमरान् पितृंश्च कव्यप्रदानैर्यदिपूजयेथाः॥ वामाङ्गमायामि तदा त्वदीयं नत्वन्यथा दक्षिणपार्श्वतोऽहम्॥** अथ कन्यावाक्यं तृतीयम्-**कुटुम्बं पालनीयं च त्वया यौवनवार्द्धके। यद्यद्वाञ्छामि ते स्वामिन् तत्तद्देयं सदा मम॥ कुटुम्बरक्षाभरणे यदि त्वं कुर्याः पशूनां परिपालनञ्च। बामाङ्गमायामि तदा त्वदीयं नत्वन्यथा दक्षिणपार्श्वतोऽहम्॥** अथ कन्या वाक्यं चतुर्थम्-**सुखदुःखानि कर्माणि गृहस्थस्य भवन्ति हि। भव सौम्य सदैव त्वं धीरोवीरः प्रतापवान्॥ आयव्ययौ धान्यधनादिकानां दृष्ट्वा निवेशं च गृहे निदध्याः। बामाङ्गमायामि तदा त्वदीयं नत्वन्यथा दक्षिणपार्श्वतोऽहम्।** अथ कन्यावाक्यं **पञ्चमम्-गीतवादित्र-माङ्गल्यं बन्धूनां च गृहे सदा। अनाहूता गमिष्यामि यदा मां प्रतिपालयेत्॥ देवालयारामतडागकूपवापीविदध्याः यदि पूजयेथाः॥ वामाङ्गमायामि तदा त्वदीयं नत्वन्यथा दक्षिणपार्श्वतोऽहम्।** अथ कन्यावाक्यं षष्ठम्-**सर्वे बन्धुजनाः स्वामिन् भवतो दासता गताः। जलपात्रकङ्कणाभ्यां च दत्ताहं प्रेमपूर्वकम्॥**

त्वया कदापि नो वाच्यं किं दत्तं तव बन्धुभिः। अवश्यमेवं संवादात् कलहो जायते गृहे। दुरुक्तं भवता मे न कदापि धार्यतां हृदि। भृत्यापराधः क्षन्तव्यः स्वामिना ननु सर्वदा। देशान्तरे वा स्वपुरान्तरं वा यदा विदध्याः क्रयविक्रयौ त्वम्।। वामाङ्गमायामि तदा त्वदीयं नत्वन्यथा दक्षिणपार्श्वतोऽहम्। अथ कन्यावाक्यं सप्तमम्-होमे यज्ञे विवाहे च कन्यादाने तथा व्रते। अञ्चलग्रन्थिमादाय भवतश्च सहायिनी।। अर्द्धं पुण्यं ग्रहीष्यामि न त्वहं पापभागिनी। अर्द्धं पापं प्रदास्यामि चाङ्गीकार्यो यदि त्वया।। एवं यदि प्रमाणन्ते वामाङ्गं संभजाम्यहम्। परस्य कान्ता यदि कान्त मत्ता प्रौढा मनोज्ञा सुभगापि वा स्यात्। तां चेन्न सेवेत भवांस्तदाहं वामाङ्गमायामि सहर्षमेषा।। इह बह्निश्च नौ साक्षी मम त्वं भर्तृतां व्रज। ब्रह्मणा कृतपूर्वेण विधानेन कुलोत्तम।। अथ वरो वधूं ब्रूयात् - यद्यप्येतानि तव प्रार्थितानि सम्पाद्यानि तथापि मदीयचित्तानुगतं च चित्तं सदा मदाज्ञापरिपालनञ्च। पतिव्रता धर्मपरायणा त्वं कुर्याः सदा सर्वमिदं प्रयत्नम्।।

आदौ धर्मपरायणा कुटुम्बसुखदा तथ्यप्रिया भाषिणी। क्रोधालस्यविवर्जिता सुखकरी नित्यं वचः कारिणी।। पित्रोर्मेऽपचितौ रताथ भगिनी प्रेमार्द्रचित्ता तथा। इत्थं सर्वगुणालिभूषिततनुः पाल्या भवित्री मम।। उद्याने मद्यपस्थाने गमनं च परालये। परपुंसारतिर्गीतं हास्यं वर्ज्यं त्वया सदा।। अन्तर्गेहे स्थिता नित्यं सुखदुःखानुभोगिनी। यदा तिष्ठसि भद्रे त्वं पालनीया सदा मम।। द्वारोपवेशनं नित्यं गवाक्षेण निरीक्षणम्। असत्प्रलापो हास्यं च दूषणं कुलयोषिताम्। पानं दुर्जनसंसर्गः पत्या च विरहोऽटनम्। स्वप्नोऽन्यगेहे वासश्च नारी संदूषणानि षट्।। क्रीडाशरीरसंस्कारं समाजोत्सवदर्शनम्। हास्यं परगृहे यानं त्यजेत् प्रोषितभर्त्तृका। विष्णुर्वैश्वानर साक्षी ब्राह्मणाः ज्ञातिबान्धवाः। पञ्चमं ध्रुवमालोक्य ससाक्षित्वमुपागता।। विना पत्नी कथं धर्म आश्रमाणां प्रवर्त्तते। तस्मात्त्वं मम विश्वस्ता भव वामाङ्गगामिनी।। इति मिथः प्रतिज्ञां कुर्वीयाताम्। ततो वरस्य वामभागे ॐ मङ्गलं भगवान् विष्णुरितिमन्त्रेण वधूमुपवेश्याऽऽचार्यो वरवध्वोः शिरसी मिथः क्षणाय सम्मेलयेत्। एवं सप्तपदीविधानं विधातव्यम्।।

अथ सिन्दूरदानम्

ततो वरः शणः शङ्खशमीपुष्पार्द्राक्षतसुवर्णादिभिः सह वधूशिरसि सिन्दूरं[१] निक्षिप्य तामभिमन्त्रयेत् - **ॐ सुमङ्गलीरियं वधूरिमा ॆ समेत पश्यत। सौभाग्यमस्यै दत्त्वा याथास्तं विपरेत न।** ततः पुनः वरस्य दक्षिणभागे वधूमानीय तत्रैव पतिपुत्रान्विताः चतस्रः स्त्रियः सुभगास्तस्यै सिन्दूरेण सौभाग्यं[२] दद्युः। ताभिः वक्तव्यवाक्यं यथा **ॐ गौर्याः सावित्र्या अरुन्धत्यास्तव सौभाग्यं भवतु** इति वधूदक्षिणकर्णे कथनीयम्। अथ बलवान् कश्चिद् ब्राह्मणो वरो वा वधूमुत्थाप्य प्रागुदग्वानुगुप्तागारे प्रागग्रानुदगग्रान्वा कुशानास्तीर्य तदुपरि समुपवेशयेत्। तत्र मन्त्रः- **ओं इह गावो निषीदंत्विहाश्वा इह पूरुषाः इह सहस्रदक्षिणो यज्ञ इह पूषा निषीदतु।** ततः वधूवरौ तस्मात्स्थानादागत्य पूर्ववद् यथा स्थानमुपविशतः।

ततो ब्रह्मणान्वारब्धो वरः **ॐ अग्नये स्विष्टकृते स्वाहा इदमग्नये स्विष्टकृते न मम** इति स्विष्टकृद्होमं कुर्यात्। स्रुवाव-शिष्टाज्यं प्रोक्षणीपात्रे प्रक्षिप्य हस्तौ प्रक्षाल्याचमनं विधाय पूर्णपात्रं ब्रह्मणे दद्यात्। तत्र सङ्कल्पः **तत्सत् इत्यादिना देशकालादि- स्मृत्वामुकगोत्रोऽमुकशर्मा सवधूकोऽहं कृतैतद्विवाहहोमकर्म-प्रतिष्ठार्थमिदं पूर्णपात्रं प्रजापतिदैवत्यं सदक्षिणाकं अमुकगोत्रायामुकशर्मणे ब्राह्मणाय दक्षिणात्वेन तुभ्यमहं सम्प्रददे।** इति ब्रह्मणे दक्षिणां दद्यात्। **ॐ स्वस्तीति** ब्राह्मणः प्रतिवदेत्। एवमेव आचार्या-यान्येभ्यश्च यथाशक्ति दक्षिणां दद्यात्। ततो ब्रह्मग्रन्थिं विमोचयेत् **ॐ सुमित्रिया न आप ओषधयः सन्तु।** इति पवित्रं गृहीत्वा प्रणीताजलेन वधूवरयोर्दातुश्च शिरः संमृज्य **ॐ दुर्मित्रियास्तस्मै सन्तु**

---

१. वामे सिन्दूरदाने च वामे चैव द्विरागमे।
वामभागे च शय्यायां नामकर्म तथैव च॥
शान्तिकेषु च सर्वेषु प्रतिष्ठोद्यापनादिषु।
वामे त्युपविशेत् पत्नी व्याघ्रस्य वचनं यथा॥
वामे पत्नी त्रिषु स्थाने पितृणां पादशौचने।
रथारोहणकाले च ऋतुकाले सदा भवेत्॥

२. पतिपुत्रान्विता भव्याश्चतस्रः सुभगा अपि॥
सौभाग्यमस्यै दद्युस्तां मङ्गलाचारपूर्वकम्॥

योऽस्मान्द्वेष्टि यञ्च वयं द्विष्मः। इत्यैशान्यां प्रणीतां न्युब्जी-कुर्यात्। तत आस्तरणक्रमेण बर्हिरुत्थाप्य घृतेनाभिधार्य हस्तेनैव जुहुयात्। तत्र मन्त्रः - **ॐ देवा गातु विदोगातुवित्त्वा गातुमित। मनसस्पत इमं देवयज्ञ ँ स्वाहा वातेधाः स्वाहा इदं वाताय।** इति बर्हिहोमः। तत उपयमनकुशैर्मार्जनं कुर्यात्- **ॐ आपः शिवाः शिवतमाः शान्ताः शान्ततमास्तास्ते कृण्वन्तु भेषजम्।** तत्पश्चादुपयमनकुशानामग्नौ प्रक्षेपः कार्यः। ततः **'त्र्यायुषं जमदग्ने'** रित्यादिमन्त्रेण भस्मना त्र्यायुषकरणम्। बध्वपि वरत्र्यायुषकरणानुसारेणैव त्र्यायुषं कुर्यात् तत्र **'तन्नो'** इति स्थाने **'तत्ते'** इति वक्तव्यम्। तत आचार्यो दृढपुरुषस्कन्धस्थकलशवारिणा वरवध्वोरभिषेकं वैदिकैर्माङ्गलिकाभिषेकमन्त्रैर्वा कुर्यात्। इत्यभिषेकं कृत्वाऽऽचार्यः स्वस्ति वाचनपुरस्सरं वरमस्तके तिलकं विदध्यात्। ततो वरकन्याकर्तृकगणेशाम्बिकापूजनम् ग्राम[१]वचनादिकृत्यं च विधेयम्।

ततो वरः **'अद्य कृतैतद्विवाहकर्मणः साङ्गतासिद्ध्यर्थ-माचार्याय मनसोद्दिष्टां दक्षिणां तथा च तन्मध्ये न्यूनातिरिक्तदोष-परिहारार्थं च नानानामगोत्रेभ्यो ब्राह्मणेभ्यो भूयसीं दक्षिणां विभज्य दातुमहमुत्सृजे'** इति सङ्कल्प्य भूयसीदक्षिणामाचार्याय प्रयच्छेत्। ततो वरः **'प्रमादात् कुर्वतां कर्मेत्यादिना समुच्चार्य त्रिवारं 'ॐ विष्णवे नमः'** इति स्मृत्वा विष्णुं प्रार्थयेत् क्षमायाचनां च कृत्वा देवादीन् विसर्जयेत्। वधूवरौ संवत्सरं द्वादशरात्रं षड्रात्रं त्रिरात्रं वाऽक्षारालवणाशिनौ भूतले शायिनौ मैथुनरहितौ स्याताम्[२]।

॥ इति विवाहसंस्कारः ॥

अथ विवाहाङ्गभूतं चतुर्थीकर्मविधिः

ततश्चतुर्थ्यामपररात्रौ वरः स्नानादिकृत्यं विधाय वध्वा सार्द्धं शुभासने प्राङ्मुखमुपविश्याऽऽचम्य प्राणायामं कृत्वा **'ॐ अपवित्रः पवित्रो वा'**

---

१. ग्रामवचनं च कुर्युः विवाहश्मशानयोर्ग्रामं प्रविशतादिति वचनात्। (पारस्करगृह्यसूत्रे)

२. अक्षारलवणाहारौ भवेतां भूतले तथा।
शयीयातां समावेशं न कुर्यातां वधूवरौ॥ (शौनकः)

इति मन्त्रेणाऽऽत्मानं वधूं पूजासम्भारान् च सम्प्रोक्ष्य हस्ते गन्धाक्षतपुष्पाण्यादाय **''ॐ आ नो भद्रा''** इति स्वस्तिवचनं माङ्गलिकश्लोकांश्च पठित्वा हस्ते पुनः जलमादाय देशकालौ सङ्कीर्त्य **'अमुकगोत्रः, अमुकनामशर्माऽहं सपत्नीको मम अस्या भार्यायाः सोम गन्धर्वाग्न्युपभुक्तदोषपरिहारार्थं तत्पत्नीत्वभावसिद्ध्यर्थं च विवाहाङ्गभूतं चतुर्थीकर्माऽहं करिष्ये' तन्निर्विघ्नतासिद्ध्यर्थं च गणपत्यादिदेवतापूजनपुरस्सरं पञ्चभूसंस्कार-पूर्वकमग्निस्थापनं च करिष्ये''** इति सङ्कल्पं कुर्यात्।

ततो हस्तपरिमितां चतुरस्रां वेदीमुपकल्प्य कुशकण्डिका- विधानेन कुशैः परिसमूह्य, गोमयेनोपलिप्य स्फ्येनोल्लिख्याऽनामिकाऽङ्गुष्ठाभ्यां मृदमुद्धृत्य जलेनाभ्युक्ष्य **'ॐ अग्निं दूतं पुरोदधे हव्यवाहमुपब्रुवे। देवां २आसादयादिह।** इति मन्त्रेणाऽग्निमुपसमाधाय पुनश्च हस्ते वरो ग्रन्थिबन्धनयुतया भार्यया सह वरणसामग्रीं च गृहीत्वा जलमादाय **'देशकालौ'** सङ्कीर्त्य **अस्यां रात्रौ करिष्माणचतुर्थीहोमकर्मणि कृताऽकृताऽवेक्षणरूप-ब्रह्मकर्म अमुकगोत्रममुकशर्माणं ब्राह्मणमेभिः पुष्पचन्दनताम्बूलवा-सोभिर्ब्रह्मत्वेन त्वामहं वृणे।'** इत्युक्त्वा वरणसामग्रीं ब्रह्मणे दद्यात्। ब्रह्माऽपि **'वृतोऽस्मी'** ति ब्रूयात्। पुनर्वरो **'यथाविहितं कर्म कुरु'** इति वदेत्। ब्रह्माऽपि **'यथा ज्ञानं करवाणि'** इति वदेत्। ततो दक्षिणतो ब्रह्माणमुपवेश्यो-त्तरतः कलशं प्रतिष्ठापयेत्। ततश्च स्थालीपाकं श्रपयित्वा **'ॐ शिखिनामाग्नये नमः'** इति गन्धादिभिरग्निं पूजयित्वा ब्रह्मणाऽन्वारब्धं च विधायाऽऽज्यभागाविष्ट्वाऽऽज्याहुतीर्जुहोति। **ॐ प्रजापतये स्वाहा-इदं प्रजापतये** इति मनसा। **ॐ इन्द्राय स्वाहा इदमिन्द्राय** इत्याधारौ। **ॐ अग्नये स्वाहा इदमग्नये। ॐ सोमाय स्वाहा इदं सोमाय।** इत्याज्य भागौ। ततोऽनन्वारब्धे वरः पञ्चाज्याहुतीर्जुहुयात् प्रत्याहुत्यनन्तरं संस्रव प्रक्षेपः कार्यः। तन्मन्त्राः -

ॐ अग्ने प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथकाम उपधावामि यास्यै पतिघ्नी तनूस्तामस्यै नाशय स्वाहा। इदमग्नये न मम। उदपात्रे त्यागः। **ॐ वायो प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि**

ब्राह्मणस्त्वा नाथकाम उपधावामि याऽस्यै प्रजाघ्नी तनुस्तामस्यै नाशय स्वाहा। इदं वायवे न मम। उदपात्रे त्यागः। **ॐ सूर्य प्रायश्चित्ते त्वं देवानां प्रायश्यित्तिरसि ब्राह्मणस्त्वा नाथकाम उपधावामि याऽस्यै पशुघ्नी तनूस्तामस्यै नाशय स्वाहा। इदं सूर्याय न मम।** उदपात्रे त्यागः। **ॐ चन्द्र प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्मणस्वा नाथकाम उपधावामि यास्यै गृहघ्नी तनूस्तामस्यै नाशय स्वाहा। इदं चन्द्राय न मम।** उदपात्रे त्यागः। **ॐ गन्धर्व प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथकाम उपधावामि यास्यै यशोघ्नी तनुस्तामस्यै नाशय स्वाहा। इदं गन्धर्वाय न मम।** उदपात्रे त्यागः।

ततः स्थालीपाकेन जुहुयात्। **ॐ प्रजापतये स्वाहा इदं प्रजापतये न मम।** उदपात्रे त्यागः। अग्निमाहुतिदशके तत्तदाहुत्यनन्तरं हुतशेषस्य घृतस्य प्रोक्षणीपात्रे प्रक्षेपः। ततो ब्रह्मणाऽन्वारब्धेनाऽऽज्यस्थालीपाकाभ्यां '**ॐ अग्नये स्विष्टकृते स्वाहा**' इति स्विष्टकृद् होमो विधातव्यः। ततो ब्रूयात् ''**इदमग्नये स्विष्टकृते न मम।**''

ततो भूरादिनवाहुतीः प्रयच्छेत्। **ॐ भूः स्वाहा इदमग्नये न मम। ॐ भुवः स्वाहा इदं वायवे। ॐ स्वः स्वाहा इदं सूर्याय। ॐ त्वं नो०। इदमग्नीव०। ॐ सत्त्वन्नो० इदमग्नीव०। ॐ अयाश्चाग्ने० इदमग्नये। ॐ ये ते शतं वरुण०। इदं वरुणाय०। ॐ उदुत्तमं वरुण०। इदं वरुणायाऽऽदित्याय०। ॐ प्रजापतये स्वाहा इदं प्रजापतये न मम।** प्रोक्षणीपात्रे त्यागः। ततः संस्रवप्राशनं कुर्यात्। आचम्य पवित्राभ्यां मार्जयेत्। '**ॐ सुमित्रिया न आप ओषधयः सन्तु**' इति मन्त्रेणाऽग्नौ पवित्र-प्रतिपत्तिः।

पुनश्च हस्ते जलं गृहीत्वा '**अस्यां रात्रौ कृतैतच्चतुर्थीहोम कर्मणोऽङ्गतया विहितं पूर्णपात्रमिदं प्रजापतिदैवतममुकगोत्रायाऽमुकशर्मणे विप्राय तुभ्यमहं सम्प्रददे।** ततो ब्रह्मा '**स्वस्ति**' इति कथयित्वा गृह्णीयात्। **ॐ दुर्मित्रियास्तस्मै सन्तु योऽस्मान् द्वेष्टि यंश्च वयं द्विष्मः**' इति मन्त्रेणेशानकोणे प्रणीतान्युब्जीकरणम्।

तत उदकपात्रात् संस्रवमिश्रजलमादायाऽऽम्रपल्लवेन वरो वध्वा मूर्ध्नि अभिषिञ्चति। ''**ॐ या ते पतिघ्नी गृहघ्नी यशोघ्नी निन्दिता**

तनुर्जारघ्नीं तत एनां करोमि सा जीर्य्य त्वं मया सह।'' इति मन्त्रेण **'अमुकी देवी'**ति नामोच्चार्य अभिषेकं कुर्यात्।

ततो वरो मन्त्रचतुष्ट्येन वधूं स्थालीपाकं प्राशयेत्। तद् यथा- **ॐ प्राणैस्ते प्राणान् संदधामि। ॐ अस्थिभिस्तेऽस्थीनि सन्दधामि। ॐ मासैस्ते मांसानि संदधामि। ॐ त्वचा ते त्वचं सन्दधामि।**[१] मन्त्रान्तेऽन्नप्राशनम्। ततो वधूहृदयं स्पृष्ट्वा वरः पठति- **ॐ यत्ते सुषीमे हृदयं दिवि चन्द्रमसिश्रितं वेदाहं तन्मां तद् विद्यात्। पश्येम शरदः शतं जीवेम शरदः शतꣳ शृणुयाम शरदः शतम्।** ततोऽञ्चलग्रन्थि-विमोचनानन्तरं वरवध्वोः परस्परं कङ्कणमोचनं करणीयम्। तत्र मन्त्रं पठेत् - **ॐ कङ्कणं मोचयाम्यद्य रक्षां नैव कदाचन। मयि रक्षां स्थिरां कृत्वा स्वस्थानं गच्छ कङ्कण।** ततश्च वरो वधूदक्षिणहस्तस्पृष्टस्रुवेण घृतफलपुष्पसंयुतेन **'ॐ मूर्धानं'** इति मन्त्रेण पूर्णाहुतिं विधाय त्र्यायुषं कुर्यात्। ततो ब्राह्मणेभ्यो भूयसीं दक्षिणां दत्त्वा तैराशीर्वादान् गृहीत्वा **'प्रमादात्कुर्वतां कर्म'** इत्यादिना पठन् वरो विष्णुं स्मृत्वा क्षमायाचनां विदध्यात्।

॥ इति चतुर्थीकर्मविधिः ॥

विवाहादावाशीर्वादश्लोकाः

गायत्री च विधौ यद्वल्लक्ष्मी देवपतौ यथा।
उमा यथा महेशाने तथा त्वं भव भर्त्तरि॥१॥

सूर्यस्य तपती चैव वसुदेवस्य रौहिणी।
चन्द्रस्य रोहिणी यद्वत्तथा त्वं भव भर्त्तरि॥२॥

शन्तनोश्च यथा गङ्गा सुभद्रा ह्यर्जुनस्य च।
धृतराष्ट्रस्य गान्धारी तथा त्वं भव भर्त्तरि॥३॥

गौतमस्य यथाहल्या द्रौपदी पाण्डवे यथा।
वालिनश्च यथा तारा तथा त्वं भव भर्त्तरि॥४॥

---

१. चतुर्थीहोममन्त्रेण त्वङ्मांसहृदयेन्द्रियैः।
भर्त्रा संयुज्यते पत्नी तद् गोत्रा तेन सा भवेत्॥ (बृहस्पतिः)

मन्दोदरी रावणस्य राघवस्य च जानकी।
कुन्ती च पाण्डुराजस्य तथा त्वं भव भर्त्तरि॥५॥

अत्रेर्यथाऽनसूया च जमदग्नेश्च रेणुका।
कृष्णस्य रुक्मिणी यद्वत् तथा त्वं भव भर्त्तरि॥६॥

भास्करस्य प्रभा यद्वद् रोहिणी सिन्धुजस्य च।
कुजे तेजोमयी यद्वत्तथा त्वं भव भर्त्तरि॥७॥

यथा च बोधिनी सौम्ये भारती वाक्पतेर्यथा।
भार्गवे वलिनी यद्वत्तथा त्वं भव भर्त्तरि॥८॥

सूर्यपुत्रे यथा सौम्या तमसस्तामसी यथा।
केतौ भोगवती यद्वत्तथा त्वं भव भर्त्तरि॥९॥

वासवस्य यथेन्द्राणी काली वैश्वानरस्य च।
धर्मिणी धर्मराजस्य तथा त्वं भव भर्त्तरि॥१०॥

निर्ऋतेश्च धृतिर्यद्वद् वारुणी वरुणस्य च।
वायो वेगवती यद्वत्तथा त्वं भव भर्त्तरि॥११॥

यक्षिणी धनदे यद्वत्पार्वती शङ्करस्य च।
सावित्री वेधसो यद्वत्तथा त्वं भव भर्त्तरि॥१२॥

अनन्तस्य यथा लक्ष्मीर्वसुदेवस्य रोहिणी।
विश्वामित्रे च मेनका तथा त्वं भव भर्त्तरि॥१३॥

सुदक्षिणा दिलीपे च वसन्ते तु धृतिर्यथा।
अरुन्धती वसिष्ठे च तथा त्वं भव भर्त्तरि॥१४॥

राघवेन्द्रे यथा सीता उर्मिला लक्ष्मणे यथा।
पावके च यथा स्वाहा तथा त्वं भव भर्त्तरि॥१५॥

धनपुत्रवती साध्वी सततं भर्तृवत्सला।
मनोज्ञा ज्ञानसहिता तिष्ठ त्वं शरदां शतम्॥१६॥

आदित्योऽग्नियुतः शशी सवरुणो भौमः कुवेरान्वितः।
सौम्यो विश्वयुतो गुरुः समघवा देव्या युतो भार्गवः॥

सौरिः केतुयुतः सदा सुरवरो राहुर्भुजङ्गेश्वरो।
माङ्गल्यं सुखदुःखदाननिरताः कुर्वन्तु सर्वे ग्रहाः॥१७॥

आयुर्द्रोणसुते श्रियो दशरथे शत्रुक्षयो राघवे।
ऐश्वर्यं नहुषे गतिश्च पवने मानञ्च दुर्योधने॥
शौर्यं शान्तनवे बलं हलधरे सत्यं च कुन्तीसुते।
विज्ञानं विदुरे भवन्तु भवतः कीर्त्तिश्च नारायणे॥१८॥

आयुष्मान् भव पुत्रवान् भव सुखी श्रीमान् यशस्वी भव।
प्रज्ञावान् भव भूरिभूतिकरणे दानैकनिष्ठो भव॥
तेजस्वी भव वैरिदर्पदलने व्यापारदक्षो भव।
श्रीशम्भोर्भव पादपूजनरतः सर्वोपकारी भव॥१९॥

आयुर्बलं विपुलमस्तु सुखित्वमस्तु
सौभाग्यमस्तु विशदाभवकीर्त्तिरस्तु॥
श्रेयोऽस्तुधर्ममतिरस्तु रिपुक्षयोऽस्तु
सन्तानवृद्धिरस्तु वाञ्छितसिद्धिरस्तु॥२०॥

॥ इति माङ्गलिकश्लोकाः॥

अथ चौलादिसंस्कारत्रयाणां समनुक्रमणिका

चौलम्

चौलं स्यात् त्र्येकवर्षाद्युदितमथ कुलान्मातरो बाह्यशालां।
त्रीन् विप्रान् भोज्य हुत्वा मनुमितमुदकैश्चोदनं दक्षिणे प्राक्॥
त्र्येण्या शलल्या विनीय त्रिकुशतरुणकं धार्यं क्षुरैः सकेशाम्।
छित्वोक्ष्णो गोमये स्यादिति तदपरयोः केशमेवं नृपाद्वे॥

उपनयनम्

दत्त्वा प्रैषद्वयं प्राग् वसनरशने ब्रह्मसूत्राजिनस्थो।
दण्डः पूर्णाञ्जल्यर्घः प्रणतरविगुरोर्लम्भपृच्छाप्रदानम्॥
वह्निं चावृत्तशास्ते मनुमितहवनं स्वीयसावित्रिदानम्।
वह्नेः कार्यं स्वभिक्षा कथयति नियमं ब्रह्मचर्ये विकल्पः॥

पाणिग्रहणम्

साधुस्ततो विष्टरपाद्यविष्टरम्
अर्घाचमं वै मधुपर्क वाक् च मे।
उत्सृज तृणान्यत्त्वथ वेदिकर्म
स्यादग्निमभ्यर्चय कौतुकाद् वरः॥१॥

आनीय कन्यां वसनं वराय
ददाति दाता वरवस्त्रदानम्।
परस्परं दातृकग्रन्थिबन्धनं
सङ्कल्पकन्यावरणं च होमः॥२॥

लाजाहुतिर्ग्राम्यवचः सुमङ्गली
परिवर्त्ति वामे ग्रथनं विधत्ते।
स्विष्टाहुतिः स्यादभिषेकदानं
कृत्वा वरः कौतुकमन्दिरं ब्रजेत्॥३॥

॥ इति समनुक्रमणिका ॥

॥ इति कर्मकौमुद्यां संस्कारकर्माध्यायः ॥

गृह्यकर्माध्यायः

अथ भूमिपूजनशिलास्थापनविधिः

यजमानः आग्नेयदिशि खातभूमेः पश्चिमत उपविश्य आचम्य प्राणायामं च कृत्वा स्वस्तिवाचनं विधाय देशकालौ सङ्कीर्त्य **''अमुकगोत्रोऽमुकशर्माऽहं करिष्यमाणस्याऽस्य वास्तोःशुभत्वप्राप्तये निर्विघ्नतासिद्धये सुखायुरारोग्यैश्वर्यवृद्ध्यर्थं च वास्तोस्तस्य भूमिपूजनं शिलास्थापनं करिष्ये तद् सिद्ध्यर्थं गणेशमातृकाग्रहमण्डलदेवता-पूजनमहं करिष्ये।''** इति सङ्कल्पं विधाय यथोक्तदेवताः पूजयित्वा भूतोत्सारणमन्त्रमुच्चार्य श्वेतसर्षपान् विकिरेत्। ततोऽक्षतपुञ्जेषु अष्टौ नागान् आवाह्याऽनेन मन्त्रेण पूजयेत् **''ॐ वासुकिं धृतराष्ट्रं च कर्कोटकध नञ्जयौ। तक्षकैरावतौ चैव कालेयमणिभद्रकौ॥''** ततो यजमानः पञ्च शिला इष्टिका वाऽऽदाय शुद्धोदकेन प्रक्षाल्य गायत्र्या पञ्चगव्येन गङ्गाजलेन च प्रक्षालयेत्, तासु कुङ्कुमचन्दनाभ्यां स्वस्तिकाङ्कितं कृत्वा वस्त्रेणाऽऽच्छाद्य मन्त्रैरेतैः पूजयेत् **''ॐ नन्दायै नमः। ॐ भद्रायै नमः। ॐ जयायै नमः। ॐ रिक्तायै नमः। ॐ पूर्णायै नमः।''** ततः भूमिर्ध्यात्वा **''ॐ स्योना पृथिवी नो भवानृक्षरानिवेशनी यच्छा नः शर्मसप्रथा।''** इति खातभूमिमुपलिप्य भूमिमावाहयेत्। तत्र त्रिषु अक्षतपुञ्जेषु **''ॐ कूर्माय नमः। ॐ अनन्ताय नमः। ॐ वराहाय नमः।''** इति मन्त्रैः कूर्मानन्तवराहान् सम्पूज्य **''ॐ भूम्यै नमः''** मन्त्रेण भूमिं पूजयेत् ततः पलाशस्याऽऽग्रपत्रस्योपरि सदीपं घृतौदनं बलिं दत्वा प्रार्थयेत्- **''ॐ समुद्रमेखले देवि पर्वतस्तनमण्डले। विष्णुपत्नि। नमस्तुभ्यं शस्त्रपातं क्षमस्व मे। इष्टं मे त्वं प्रयच्छेष्टं त्वामहं शरणं गतः। पुत्रदारधनायुष्यधर्मवृद्धिकरी भव।''** इति मन्त्रेण सर्षपान् विकिरेत् पुनश्च भूतोत्सारणं कुर्यात्। तस्योपरि दधिमाष-भक्तवलिं दत्वा तस्योपरि सप्तताम्बूलपत्राणि निधाय द्वादशाङ्गुललौहशङ्कुं निखन्य मन्त्रं पठेत् **''ॐ विशन्तु भूतले नागा लोकपालाश्च सर्वतः।**

अस्मिन् स्थानेऽवतिष्ठन्तु आयुर्बलकराः सदा॥" एवं मन्त्रं पठित्वा चतुर्दिक्षु कीलकनिखननं कृत्वा मध्ये चतुर्दिक्षु च क्रमेण पञ्चकुम्भान् स्थापयेत्। स्वर्णनिर्मितं सर्पाकारं वास्तुदेवं **"ॐ वास्तोष्पते प्रतिजानीह्य॰"** मन्त्रेणाऽऽवाह्य षोडशोपचारेण पूजयित्वा मध्यकलशे स्थापयेत्। ततो यजमानः कुम्भान् यथासम्भवं मधुघृतपारदसुवर्णतीर्थोदकपञ्चरत्नगन्धादिना सम्पूर्य रक्तपीत- वस्त्रावेष्टितं कृत्वा सर्वौषधिपूगीफलानि च कलशस्थापनविधिना निक्षिप्य ततो नारिकेलफलयुक्तान् कृत्वा मध्यकलशे **"ॐ पद्माय नमः"** इति पद्मं पूजयित्वा ततः पूर्वादिक्रमेण कुम्भेषु **"ॐ महापद्माय नमः"** इति पद्मं, **"ॐ शङ्खाय नमः"** इति शङ्खं, **"ॐ मकराय नमः"** इति मकरं, **"ॐ समुद्राय नमः"** इति समुद्रं चाऽर्चयेत्। ततो घटसमां मृत्तिकां दत्त्वा अक्षतान् क्षिपेत्। ततो मध्ये तस्योपरि पूर्णाख्यशिलामिष्टकां वाऽनेन मन्त्रेण स्थापयेत्- **"ॐ पूर्णे त्वं सर्वदा भद्रे सर्वसन्दोहलक्षणे। सर्वं सम्पूर्णमेवाऽत्र कुरुष्वाङ्गिरसः सुते।"** एवं पूर्वस्यां नन्दां- **"ॐ नन्दे त्वं नन्दिनी पुंसां त्वामत्र स्थापयाम्यहम्। अस्मिन् रक्षा त्वया कार्या प्रासादे यत्नतो मम॥"** दक्षिणस्यां भद्रां -**"ॐ भद्रे त्वं सर्वदा भद्रं लोकानां कुरु काश्यपि। आयुर्दा कामदा देवि सुखदा च सदा भव॥"** प्रतीच्यां जयां -**"ॐ जये त्वं सर्वदा देवि तिष्ठ त्वं स्थापिता मया। नित्यं जयाय भूत्यै च स्वामिनी भव भार्गवि।"** उदीच्यां रिक्तां- **"ॐ रिक्ते त्वरिक्ते दोषघ्ने सिद्धिवृद्धिप्रदे शुभे। सर्वदा सर्वदोषघ्ने तिष्ठास्मिन् मम मन्दिरे॥"** तत एतासु शिलासु दिक्पालान् सम्पूज्य दधिमाषौदनबलिं दद्यात्। ततो **"ॐ विश्वकर्मणे नमः"** इति विश्वकर्मपूजनं विधाय प्रार्थयेत् - **"ॐ अज्ञानाज्ज्ञानतो वाऽपि दोषः स्युश्च यदुद्भवाः। नाशयन्त्वहितान्सर्वान् विश्वकर्मन् नमोऽस्तु ते॥"** **'ॐ खनित्रायुधाय नमः'** इति मन्त्रेण खनित्रं पूजयित्वा प्रार्थयेत्- **"ॐ त्वष्ट्रा त्वं निर्मितः पूर्वं लोकानां हितकाम्यया। पूजितोऽसि खनित्र त्वं सिद्धिदो भव नो ध्रुवम्॥"** ततो यथाशक्तिमृत्युञ्जयमन्त्रस्य जपं कुर्यात्। तत आचार्याय दक्षिणां दत्त्वा मिष्ठान्नं वितरेत्। शिलास्थापनकर्म च समापयेत्।

॥ इति भूमिपूजनशिलास्थापनविधिः ॥

अथ गृहप्रतिष्ठागृहप्रवेशविधिः

यजमानः पुण्येऽहनि चन्द्रतारानुकूले शुद्ध आचमनं कृत्वा स्वस्तिवाचनं कारयित्वा सङ्कल्पमेवं कुर्यात् देशकालौ सङ्कीर्त्य- **"अमुकगोत्राऽमुकशर्माऽहं सुखसौभाग्यायुरारोग्यवृद्धिपूर्वकसल्लक्ष्मीनिवासैश्वर्यधनसमृद्धिवृद्धिकामः नवीनगृहे प्रवेशकर्म करिष्ये तत् सकलबाधानाशार्थं गणेशमातृका-कलशादिपूजनमहं करिष्ये।"** इति सङ्कल्पं कृत्वा पूर्णकलशं सदीपकं सम्पूज्य तं सपत्नीकः सपुत्रादिपरिवारो यजमानो हस्ते निधाय द्वारोपरि गणेशं गौरीं चाऽर्चयित्वा द्वारमातृकापूजनं विधाय ब्राह्मणैः सह मङ्गलतूर्यवेद-घोषेण सह गृहप्रवेशं कुर्यात् आचार्या मन्त्रं पठेयुः **"ॐ धर्मस्थूणा राजꣳश्री स्तूयमहोरात्रे द्वारफलके इन्द्रस्य गृहावसमतो वरूथिनमहं प्रपद्ये सह प्रजया पशुभिः सह यन्मे किञ्चिदस्युपहतः सर्वगणः सखायः साधुसम्मतः तां त्वा शालेदिष्टपीठा गृहान्नः सन्तु सर्वतः।"** ततो यजमानः प्रविश्य गृहाङ्गणे पूर्वाभिमुखो भूत्वा पुनः सङ्कल्पं कुर्यात्- **"अमुकगोत्रोऽमुकशर्माहं श्रुतिस्मृतिपुराणोक्तफलप्राप्तिकामः आयुरारोग्ययशोधनपुत्रकलत्रगृह्यसुखलाभाय सकलदोषनिवृत्ति-करणतासिद्ध्ये गृह्यशालायां वरुणकलशमण्डलदेवतानवग्रहादीनां पूजनं वास्तोष्पतिचक्रे वास्तोष्पतिदेवतापूजनं निधिस्थापनं होमकर्माणि च करिष्ये।"**

ततो यजमानस्तं कलशमष्टदलेषु संस्थाप्य गौरीगणपतिपञ्चलोकपाल दिक्पालमातृकायोगिनीक्षेत्रपालानां पूजां विधाय भूतोत्सारणं च कुर्यात्। रक्षाविधानं कृत्वा वास्तोष्पतिचक्रेऽग्राङ्कित- मन्त्रैर्देवानावाह्य पूजयेत् - **ॐ ईशानाय नमः। ॐ पर्जन्याय नमः। ॐ जयन्ताय०। ॐ पीतध्वजाय०। ॐ इन्द्राय०। ॐ सूर्याय०। ॐ सत्याय०। ॐ भृशाय०। ॐ अन्तरिक्षाय०। ॐवायवे०। ॐ पूष्णे०। ॐ वितथाय०। ॐ गृहक्षेत्राय०। ॐ यमाय०। ॐ गन्धर्वाय०। ॐ भृङ्गराजाय०। ॐ मृगाय०। ॐ पितृगणाय० ॐ दौवारकाय०। ॐ सुग्रीवाय०। ॐ पुष्पदन्ताय०। ॐ वरुणाय०। ॐ असुराय०। ॐ शेषाय०। ॐ पापयक्ष्मणे०। ॐ रोगाय०। ॐ नागाय०। ॐ उरव्याय०। ॐ मल्लाटाय०। ॐ सोमाय०। ॐ भुजङ्गपतये०। ॐ**

अदितये०। ॐ दितये०। ॐ ब्रह्मणे०। ॐ अर्यम्णे०। ॐ विवस्वते०। ॐ मित्राय०। ॐ पृथ्वीधराय०। ॐ आपाय०। ॐ आपवत्साय०। ॐ सवित्रे०। ॐ सावित्राय०। ॐ जयन्ताय०। ॐ विबुधाधिपाय०। ॐ रुद्राय०। ॐ रुद्रदासाय०।'' एवं पूजनं कृत्वा ध्वजानां पूजनं कुर्यात्- **''ॐ केतुं कृण्व०''** इति मन्त्रेण। ततो गृहोपरि रक्तवर्णा पताका स्थापनीया। ततः पूर्वादिदिक्षु क्रमेण पीताः रक्ताः श्यामाः नीलाः शुक्लाः धूम्राः हरिताः पञ्चवर्णाः रक्ताः गौराश्च ध्वजाः स्थापनीयाः। ततो रक्षाविधानं कृत्वा क्षौमोर्णकार्पासतन्तुभिर्गृहं वेष्टयेत्। आम्राशोकपल्लवैः कृततोरणैर्गृहं वेष्टयेत्। ततो वास्तोष्पतिदेवतां प्रार्थयेत् **''ॐ पूजितोऽसि मया वास्तो हेमाद्यैरर्चनैः शुभैः। प्रसीद पाहि विश्वेश देहि मे गृहजं सुखम्।''** इति प्रार्थनां कृत्वा निधिशालायां गृहाभ्यन्तरे दक्षिणकोणे अपक्वमृत्तिकाकलशमादाय लक्ष्मीप्रतिमां स्वर्णमयीं श्रीयन्त्रं वाऽऽदाय श्रीसूक्त-मन्त्रैरर्चयेत्। ततः शैवालोपरि तत्प्रतिमां यन्त्रं वा धृत्वाऽपक्वमृण्मय- कलशे निधाय घृतमधुद्रव्ययुक्तं घृतदीपान्वितं कृत्वा दक्षिणकोणे खाते पवित्रीकरणं विधाय भूमिं सम्पूज्य स्थापयेत्। ततो गङ्गाजलेन तीर्थोदकेन सागरजलेन वा खातं पूरयित्वा मृत्तिकाभिराच्छादयेत्। ततो दध्योदनबलिं भूतेभ्यो दद्यात्। लक्ष्मीस्थापनमन्त्रः - **''ॐ स्थिरोभव वीड्वङ्ग आशुर्भव वाज्यर्वत् पृथुर्भव सुखदस्त्वमग्नेः पुरीषवाहनः।''**

ततः कुशकण्डिकां कृत्वाऽऽज्यभागौ हुत्वा प्रायश्चित्त-सञ्ज्ञकाहुतीर्दद्यात्। ततोऽर्चितदेवतानां मन्त्रैर्हवनं विधाय वास्तोष्पतिदेवतायै मन्त्रैरेतैर्जुहुयात्। **''ॐ वास्तोष्पते प्रतिजानीह्यस्मान् स्वावेशोऽनमीवो भवा नः यत्त्वेमहे प्रतितन्नो जुषस्व शन्नो भव द्विपदे शं चतुष्पदे स्वाहा। इदं वास्तोष्पतये। ॐ वास्तोष्पते प्रतिरणो न एधि गयस्फानो गोभिरश्वेभिरिन्दो। अजरासस्त्वे सखे स्वामपितेव पुत्रान् प्रति तन्नो जुषस्व स्वाहा। इदं वास्तोष्पतये। ॐ वास्तोष्पते शग्मयासं स गते सक्षीमहिरणवद्यागातु मत्वा। पाहि क्षेम उत योगे वरन्नो यूयं पात स्वस्तिभिः सदा नः स्वाहा। इदं वास्तोष्पतये। ॐ अमीवहा वास्तोष्पते विश्वारूपाण्याविश्च सखा सुशेवरग्धिनः स्वाहा। इदं वास्तोष्पतये।''**

ततो वास्तोष्पतिदेवतानामानि चतुर्थ्यन्तानि गृहीत्वा प्रणवाद्यैः स्वाहान्तैश्च हवनं कुर्यात्। ततः प्रजापतिदेवतायै हवनं विधाय संस्रवप्राशनं त्र्यायुषकरणं च कारयेत्। ततः सूत्रवेष्टितोदुम्बरपत्राणि सक्षीराणि दूर्वागोमूत्रदधिमधुघृतकुशान् यवांश्च कांस्यपात्रे निधाय गङ्गाजलमिश्रितं कृत्वा कुशपल्लवैरभिषेकं कुर्यात् पूर्वादिदिक्क्रमेण।

ततो गृहशेषवास्तुपूजां कुर्यात्। अनेन मन्त्रेण गन्धाक्षतपुष्पाणि क्षिप्त्वाऽभिषेकः करणीयः "**ॐ धात्रे नमः**" दक्षिणे द्वारे। "**ॐ विधात्रे नमः**" वामद्वारे। "**ॐ गणेशाय नमः ऊर्ध्वभागे**" **ॐ श्रियै नमः**- निधिशालायाम्। **ॐ पट्टशालायै नमः** - पट्टशालायाम्। "**ॐ मण्डपदेवताभ्यो नमः**" मण्डपे। ततश्चुह्लादिबलिदानमन्त्रं कथयित्वा माषौदनबलिं दद्यात् "**ॐ धर्माय नमः**। चूह्लादक्षिणे। "**ॐ धर्माय नमः**" चुह्लावामे। "**ॐ स्वरस्वरपरिवर्तनीयाय नमः**" धान्यादिभण्डेषु **ॐ जलामृताय वरुणाय नमः** - जलभाण्डेषु। **ॐ महाविघ्नराजाय नमः**। गृहप्रधानाधारे। "**ॐ महाशुभाङ्गाय नमः**"- पेषिण्याम्। "**ॐ रुद्रकोटिगिरिकायै नमः**" इत्युलूखले। "**ॐ बलभद्रप्रियाय प्रहरणाय नमः**।" इति मुशले। "**ॐ मृत्यवे देवीचोदिते नमः**" इति सम्मार्जन्याम्। "**ॐ कामार्थकुसुमायुधाय नमः**" इति शयनीयशिरसि। "**ॐ स्कन्दाय गृहाधिपतये नमः**" इति चतुष्पदशालायाम्।"

ततः पूजनाभिषेकादिकृत्यं कृत्वा यजमानो बद्धाञ्जलिः प्रार्थयेत् "**ॐ प्रार्थयामीत्यहं देवं शालायामधिपस्तु यः। प्रायश्चित्तप्रसङ्गेन गृहार्थे यन् मया कृतम्॥ मूलच्छेदं तृणच्छेदं कृमीणां च निपातनम्। हननं जलजीवानां भूमेः शस्त्रेण पातनम्। अनृतं भाषितं यच्च किञ्चिदर्थस्य पातनम्॥ तत्सर्वं हि क्षमस्व त्वं यन्मया दुष्कृतं कृतम्। गृहार्थे परकृतं पापमज्ञानेनाथ चेतसा। तत्सर्वं क्षम्यतां देवि शाले मम क्षमां कुरु॥**" एवं प्रार्थनां कृत्वा साङ्गतासिद्ध्यर्थं विप्रेभ्यो दक्षिणाद्रव्यं दद्यात्। ततः ब्राह्मणपुरस्सरं सपरिवारं यजमानो भोजयेत् कृत्यं च समापयेत्।

॥ इति गृहप्रतिष्ठागृहप्रवेशविधिः ॥

अथ पर्वपूजनविधि:

यजमान: सर्वप्रथममाचमनादिकं विधाय शुद्धासन उपविश्य हस्ते पुष्पाक्षतान् गृहीत्वा देशकालौ सङ्कीर्त्य **"अमुकगोत्रोऽमुकशर्माऽहं श्रुतिस्मृतिपुराणोक्तफलप्राप्त्यर्थमायुरारोग्ययशोधनलक्ष्मीर्वृद्धिपुरस्सरं सकलपापक्षयार्थं श्रीअमुकदेवताप्रीतयेऽमुकपर्वणि अमुकाऽमुकदेवतानां पूजनं करिष्ये।"** इति सङ्कल्पं विधाय गणेशं गौरीञ्च पूजयित्वा दीपं प्रज्वाल्य पूजनं कृत्वा पुङ्गीफलेषु तण्डुलपुञ्जेषु वा देवीमिन्द्रं कुबेरं लक्ष्मीं पर्वेष्टदेवतां चावाह्य यथालब्धोपचारै: पूजयेत्। तत: प्रार्थनां कुर्यात् -**"ॐ आहूताऽसि मया देवि पूजितासि यथाविधि। अद्य प्रभृति मातस्त्वं तिष्ठात्रैव यथारुचि॥ रूपं देहि यशो देहि भाग्यमायुर्ददस्व मे। पुत्रान् देहि धनं देहि सर्वान् कामांश्च देहि मे।"** इति कृत्वा विसर्जयेत्॥

॥ इति पर्वपूजनविधि: ॥

॥ इति कर्मकौमुद्यां गृह्यकर्माध्याय: ॥

पुराणादिपारायणव्रतादिकाम्यकर्माध्याय:

अथ श्रीमद्‌भागवतपारायणम्

शुभे मासे शुभेऽहनि यजमानो वक्ताऽऽचार्य: सम्यक् आचम्य त्रिवारं गायत्र्याऽभिमन्त्रितं पञ्चगव्यं गङ्गाजलं वा पिबेताम्। ततो मण्डपं कारयित्वा पताकावंशारोपणादिकृत्यं विधाय देशकालौ सङ्कीर्त्य **''श्रुतिस्मृतिपुराणागमोक्तमोक्षलक्षणनारायणोपासनादि भक्तिफल-प्राप्तये धनायुरारोग्यकीर्त्तिवृत्तिलाभाय चास्मत्कुलपूर्व-जातानां प्राप्ताप्राप्तशुभगतीनां बैकुण्ठपदप्राप्तये स्वस्य चान्ते विष्णुस्मृत्यर्थम् अन्यत्कामनार्थं वा श्रीमद्‌भागवतश्रवणं सप्ताहैरहं करिष्ये।'' तदङ्गत्वेन निर्विघ्नतासिद्ध्यर्थं गणपतिपूजनं** पुण्याहवाचनं मातृकापूजनं नान्दीश्राद्धं श्रीभागवतपूजनं श्रीलक्ष्मीनारायणपूजनं च करिष्ये। इति सङ्कल्प्य कलशं संस्थाप्य गणपत्यादिपूजनं विधाय **''ॐ गङ्गायै नम:''** इति गङ्गां **''ॐ यमुनायै नम:''** इति यमुनां **''ॐ सरस्वत्यै नम:''** इति सरस्वतीं पूजयित्वा **''ॐ व्यासाय नम:''** इति व्यासं **''ॐ शुकदेवाय नम:''** इति शुकदेवं च पूजयेत्। ततो वस्त्रादिभिर्वक्तारमुपवक्तारं पञ्च[१] ब्राह्मणान् च वृणुयात्। ततो भागवतं गन्धपुष्पाक्षतै: सम्पूज्य षोडशोपचारेण लक्ष्मीनारायणपूजनं कुर्यात्। नीराजनं कृत्वा प्रार्थयेत् –**''ॐ श्रीमद्‌भागवताख्यस्त्वं प्रत्यक्ष: कृष्ण एव हि। स्वीकृतोऽसि मया नाथ मुक्त्यर्थं भवसागरे। मनोरथो मदीयोऽयं सफल: सर्वथा त्वया। निर्विघ्नेनैव कर्त्तव्यो दासोऽहं तव केशव॥''**

तत: श्रोता यजमान: साक्षतहस्त: भगवच्चित्तो भूत्वा श्रीमद्‌भागवतं शृणुयात्। आचार्यो वाचक: श्रीभगवद्‌भक्तिपरायण: स्फुटाक्षरै: श्रीमद्‌भागवत-माहात्म्यपूर्वकं श्रीमद्‌भागवतं वाचयेत्। ततो वाचक: प्रत्येकाध्यायान्ते साक्षतजलमादाय **''ॐ कृतेनाऽनेन अमुकस्कन्धान्तर्गताऽमुकाध्यायपाठेन श्रीमन्नारायणप्रसादेन सत्या: सन्तु यजमानस्य कामा:।''** इति पठित्वोभावपि जलाक्षतान् क्षिपेताम्। उपवाचको विष्णुसहस्रनामपाठं कुर्यात्। पञ्चब्राह्मणा

---

१. इति सम्पूज्य वक्तारं वरयेत्पञ्च वाडवान्।
द्वादशाक्षरमन्त्रस्य जपार्थं मुनिसप्तम।

गायत्रीमन्त्रं द्वादशाक्षरमन्त्रमष्टाक्षरमन्त्रं वा जपेयुः। मध्याह्नकालं[१] वर्जयित्वा दिनं यावत्कथा वक्तव्या।

अथ सप्ताहपाठक्रमः

प्रथम दिने तृतीयस्कन्धस्योनविंशाध्यायान्तम्। द्वितीयदिने पञ्चम स्कन्धस्य पञ्चदशाध्यायान्तम्॥ तृतीयेदिनेऽष्टमस्कन्धस्य द्वादशाध्यायान्तम्। चतुर्थदिने दशमस्कन्धस्य तृतीयाध्यायान्तम्। पञ्चमदिने दशमस्कन्धस्योनषष्ट्यध्यायान्तम्। षष्ठदिने एकादशस्कन्धस्योनविंशाध्यायान्तम्। सप्तमदिने द्वादशस्कन्धान्तेन समाप्तिरध्यायाः पाठनीयाः। एवं प्रतिदिनं सङ्क्षेपेण गणेशकलशादीनां पूजनं कृत्वा भागवतं सम्पूज्य श्रीनारायणपूजनं च कुर्यात्। ततोऽर्चनसमाप्तौ होमविधिना स्वाहान्तैः प्रणवाद्यैर्दशमस्कन्धमन्त्रैर्गायत्र्या द्वादशाक्षरेणाऽष्टाक्षरेण वा मन्त्रेण वाऽष्टोत्तरसहस्रं जुहुयात्। श्रीसूक्तलक्ष्मीसूक्त पुरुषसूक्तमन्त्रैर्वा जुहुयात्। श्रीविष्णुसूक्तमन्त्रैर्विष्णुसहस्रनामभिर्वा हवनं कुर्यात्।

ततः श्रीमद्भागवतदानं सङ्कल्पपूर्वकं कुर्यात्। श्रीमद्भागवतपुस्तकं दत्त्वा प्रार्थयेत् – **"ॐ सर्वविद्याश्रयं ज्ञानं कारणं ललिताक्षरम्। पुस्तकं सम्प्रयच्छामि प्रीता भवतु भारती॥ सरस्वति जगन्मातः शब्दब्रह्माधिदेवते। अस्य प्रदानात्त्वं प्रीता कृष्णप्रीतिकरी भव।"**

ततः शङ्खभेरीमृदङ्गगीतादिना रथमारोप्य श्रीमद्भागवतं वाचकं च नगरयात्रां परिक्रमां वा कारयित्वा मण्डपमागत्य साक्षतभूरिदक्षिणाकरो यजमानः **"अमुकगोत्रायाऽमुकशर्मणे ब्राह्मणाय शुकरूपिणे वाचकाय तुभ्यमहं सम्प्रददे।"** इति पठित्वा दद्यात्। **"कृष्णाऽर्पणमस्तु"** इति वाचको ब्रूयात्। ततो यजमानः प्रार्थयेत् –**"व्यासप्रसादाद्भवतो मदीया मनोरथाः सन्तु फलाभियुक्ताः। अस्य प्रदानाच्च हरेः पदाप्तिः सत्पुस्तकस्याऽत्र नमोऽस्तु तुभ्यम्।** कृत्यं च समापयेत्। सुमङ्गलदिवसे मण्डपविसर्जनं कुर्यात्।

॥ इति श्रीमद्भागवतसप्ताहपारायणम् ॥

---

१. आसूर्योदयमारभ्य सार्द्धं त्रिप्रहरान्तकम्।
वाचनीया कथा सम्यक् धीरकण्ठं सुधीमता॥
कथाविरामः कर्त्तव्यो मध्याह्ने घटिकाद्वयम्।
कथावसाने कर्त्तव्यं कीर्त्तनं केशवस्य च॥

अथ हरिवंशपुराणपारायणम्

श्रीमद्भागवतपारायणे कथितप्रकारेण मण्डपं वंशारोपणं विधाय देशकालौ सङ्कीर्त्य "**अमुकगोत्रोऽमुक शर्माऽहं सपत्नीको ममानेकजन्मकृतपापत्वनिर्वृत्तये वन्ध्याभूतप्रेतादिजन्याऽनपत्यदोषक्षयार्थं बालहत्याब्रह्महत्याविप्रधनरत्नहरणादिजन्मदुरितसमूल नाशद्वारादीर्घायुष्यबहुपुत्रादिसन्ततिप्राप्तिकामो हरिवंशश्रवणमहं करिष्ये।**" इति सङ्कल्प्य पूर्ववद् गणेश मातृकाकलशसर्वतोभद्रनान्दीश्राद्धादिकृत्यं कर्त्तव्यम्। पार्थिवशिवलिङ्गपूजनं रुद्रत्र्यम्बकमन्त्रजपं सन्तानगोपालस्तोत्रमन्त्रजपं च कुर्यात्। द्वादशाक्षरमन्त्रमपि जपेत्। एतत्कृत्यार्थं पञ्चब्राह्मणान्[१] वृणुयात्। श्रोता प्रतिदिनं शालग्रामप्रतिमादौ श्रीनारायणं बालकृष्णत्वेन ध्यात्वा षोडशोपचारैः पुरुषसूक्तमन्त्रैः पूजयेत्। सप्तदिनात्मकं नवदिनात्मकमेकविंशतिदिनात्मकं वाऽनुष्ठानं विधेयम्। दम्पती नारायणं ध्यायन्तौ कथाश्शृणुयाताम्। यथाविधि हरिवंशोत्थैः श्लोकमन्त्रैः त्र्यम्बकमन्त्रैः सन्तानगोपालमन्त्रैः पुरुषसूक्तैर्द्वादशाक्षरविद्यया वाऽयुतमष्टोत्तरसहस्रं वा तिलमधुमिश्रितैः पायसैर्घृतेन जुहुयात्। ततो ग्रन्थदानं कृत्वा पूर्वोक्तविधिना समापयेत्।

अनुष्ठानसमाप्तिपूर्वमेव मङ्गलकलशैर्दम्पतीभ्यां स्नानं कर्त्तव्यम्। विप्रेभ्यो हिरण्यमयीं दक्षिणां दत्वा गोदानं कुर्यात्। यथाशक्ति रुद्राभिषेककर्म विधाय ब्राह्मणेभ्यो भोजनं दद्यात्। अनेनाऽपत्यलाभो ध्रुवं भवति॥

॥ इति हरिवंशपुराणपारायणम् ॥

अथ श्रीबाल्मीकिरामायणपारायणम्

पाठक आचम्य प्राणायामं कृत्वा गणेशादीन् सम्पूज्य हनुमत्सुग्रीवभरतसीतादिसपरिच्छदं श्रीरामचन्द्रं यथोपलब्धैरुपचारैः षोडशोपचारैर्वा पूजयेत् ततो वाचकः ससङ्कल्पं बाल्मीकिरामायणपाठस्य विनियोगमेवं कुर्यात् "**ॐ अस्य श्रीवाल्मीकिरामायणमहामन्त्रस्य वाल्मीकिर्भगवान् ऋषिः**

---

१. वरणं पञ्च विप्राणां कथाभङ्गनिवृत्तये। कर्त्तव्यं तैर्हरेर्जाप्यं द्वादशाक्षरविद्यया॥
सन्तानगोपालमन्त्रो महारुद्रजपस्तथा। पूजनं पार्थिवस्यैव गणनाथमनुं जपन्॥
नवरात्रं यथाशक्त्या उपोष्य शृणुयात्तदा॥

प्रायेणाऽनुष्टुप् छन्द: श्रीराम: परमात्मा देवताऽभयं सर्वभूतेभ्य इति बीजम् अङ्गुल्यग्रेण तान् हन्यामिति शक्ति: एतदस्त्रबलं दिव्यमिति कीलकं भगवान् नारायणो देव: इति तत्त्वं धर्मात्मा सत्यसन्धश्चेत्यस्त्रम् पाठे विनियोग:।'' जलं निक्षिपेत्। ततो न्यास: कर्त्तव्य: -

''ॐ श्रीं रां आपदामपहर्तारम् इति अङ्गुष्ठाभ्यां नम:। ॐ ह्रीं रीं दातारं तर्जनीभ्यां नम:। ॐ रौं रुं सर्वसम्पदाम् इति 'मध्यमाभ्यां नम:। ॐ श्रीं रैं लोकाभिरामम् इत्यनामिकाभ्यां नम:। ॐ श्रीं रैं श्रीरामम् इति कनिष्ठिकाभ्यां नम:। ॐ रौं र: भूयो भूयो नमाम्यहम् इति करतलकरपृष्ठाभ्यां नम:॥ एवमेव हृदयादिन्यासं कृत्वा मानसोपचारै: सम्पूज्य **''ॐ आपदामपहर्तारं दातारं सर्वसम्पदाम्। लोकाभिरामं श्रीरामं भूयो भूयो नमाम्यहम्।''** इति सम्पुटितं रामायणं पठेत्।

अत्र वाल्मीकिमुनेरपि **''ॐ वाल्मीक्यै नम:''** मन्त्रेण पूजनं कर्त्तव्यम् तुलसीवृक्षरामहनुमत्प्रतिमासमीपे रामायणं पठेत्। नवरात्रेण एकविंशदिनैश्चत्वारिंशद्दिनैर्वा पाठ: समाप्तव्य:। प्रत्येककाण्डस्य विनियोगन्यासौ वाल्मीकिरामायणोपोद्घाते यथाविधि द्रष्टव्यौ। प्रत्येककाण्डस्य [१]फलमपि पृथगुदाहृतम्। पाठसमाप्तौ मूलरामायणश्लोकै: सुन्दरकाण्डश्लोकैरथवा सम्पुटितश्लोकमन्त्रै: पञ्चखाद्यपायसैर्घृतेन च हवनं विधेयम्। इति **वाल्मीकिरामायणपारायणम्।**

अथ शिवपुराणपारायणम्

पूर्वोक्तविधिना मण्डपं विरच्य श्रोताऽऽचार्यश्चाऽऽचम्य देशकालौ सङ्कीर्त्य **''अमुकगोत्रोऽमुकशर्माऽहं श्रुतिस्मृतिपुराणोक्तफलप्राप्तिकाम:**

---

१. अनावृष्टिर्महापीडा ग्रहपीडाप्रपीडिता। आदिकाण्डं पठेयुर्ये ते मुच्यन्ते ततो भयात्॥
पुत्रजन्मविवाहादौ गुरुदर्शन एव च। पठेच्चश्रृणुयाच्चैव द्वितीयं काण्डमुत्तमम्॥
वने राजकुले वह्निजलपीडायुतो नर:। पठेदारण्यकं काण्डं शृणुयाद्वा स मङ्गली॥
मित्रलाभे तथा नष्टद्रव्यस्य च गवेषणे। श्रुत्वा पठित्वा कैष्किन्ध्यं काण्डं तत्फलं लभेत्॥
श्राद्धेषु देवकार्येषु पठेत्सुन्दरकाण्डकम्। शत्रोर्जये समुत्साहे जनवादे विगर्हिते॥
लङ्काकाण्डं पठेत् किं वाश्रृणुयात्स सुखी भवेत्। य: पठेच्छ्रृणुयाद् वापि काण्डमभ्युदयोत्तरम्॥
आनन्दकार्ये यात्रायां स जयी परतोऽत्र च॥ (बृहद्धर्मपुराणे पूर्वखण्डे २६.९.१४)

आयुरारोग्यश्रीपुत्रकलत्रसुखशान्तिलाभाय ग्रहकृतलोककृतारिष्टशमनार्थं रुद्राभिषेककर्मपुरस्सरं श्रीशिवमहापुराणश्रवणं करिष्ये। तदङ्गत्वेनाऽत्र कलशस्थापनमातृकागौरीपूजनं पुण्याहवाचनमेकादशरुद्रपूजनं सर्वतो-भद्रमण्डलपूजनं नान्दीमुखश्राद्धं पार्थिवशिवलिङ्गार्चनं षोडशोपचारैः करिष्ये।'' इति सङ्कल्पं विधाय रुद्राभिषेकविधिना सम्पूज्य देवान् सर्वान् शिवपुराणं च प्रपूजयेत्। रुद्राभिषेकः करणीयः। ततो वक्तारं पञ्चब्राह्मणान् च वृणुयात्। वक्ता पुराणं श्रीमद्भागवतपारायणविधिना वाचयेत्। सप्तदिनैर्नवदिनैरेकादशदिनैरेकविंशतिदिनैर्वा अनुष्ठानं करणीयम्। रुद्राष्टाध्या-यीपाठं त्र्यम्बकमन्त्रजपं रुद्राभिषेककर्म च पञ्चब्राह्मणाः कुर्युः। एवं पाठे समाप्ते सति त्र्यम्बकमन्त्रेण शिवमहापुराणश्लोकमन्त्रै रुद्राध्यायीमन्त्रैश्च होमो यथाविधि कर्त्तव्यः। शिवपुराणदानं विधाय ब्राह्मणेभ्यो भूयसीं दक्षिणां दत्वा तान् सुभोजयेत्। **इति शिवपुराणपारायणम्॥**

अथ दुर्गासप्तशतीपारायणम्

पूर्वोक्तनवचण्डीशतचण्डीविधिना देवीं सम्पूज्य विनियोग-न्यासध्यानसहितं कवचार्गलाकीलकरात्रिसूक्तशापोद्धारपुरस्सरं दुर्गासप्तशत्या-श्चरित्रत्रयं पठेत्। ततो देवीसूक्तरहस्यत्रयशापोद्धारादिकं कुर्यात्। आदावन्ते च नवार्णमन्त्रं जपेत्। यथोक्तविधिना होमोविधातव्यः। चरित्रार्द्धं कदापि न जपेत्। प्रतिलोममन्त्रैर्दुर्गासप्तशतीपाठः क्षिप्रसिद्धिकरो भवति तद् ग्रन्थान्तरेषु द्रष्टव्यम्। दुर्गासप्तशतीश्लोका मन्त्रा एव तैस्तिलपायसघृतैः होमः कर्त्तव्यः। अभीष्टफललाभाय मन्त्रसम्पुटिता दुर्गासप्तशती पठितव्या। **इति दुर्गासप्तशतीपारायणम्॥**

अथ गरुडपुराणपारायणम्

मृतकस्याऽस्थिसञ्चयाद् दशाहपर्यन्तं गरुडमहापुराणस्य प्रेतखण्डः श्रोतव्यः। यजमान आचमनं कृत्वा शुद्धासन उपविश्य मृतकमृत्युस्थाने दीपं धान्योपरि संस्थाप्य देशकालौ सङ्कीर्त्य **''अमुकगोत्रोऽमुकशर्माऽहं श्रुतिस्मृतिपुराणोक्तफलप्राप्तिकामः अमुकगोत्रोत्पन्नस्याऽमुकनामधेयस्य मृतकस्य स्वर्गलाभाय श्रीनारायणप्रीतये श्रीगदाधरप्रसादतो मृतकस्य**

मुक्तिप्राप्त्यै च श्रीगरुडमहापुराणस्य प्रेतखण्डस्य श्रवणमहं करिष्ये।" तदङ्गत्वेन गणेशस्मरणपुरस्सरं यमराजगदाधरपूजनं गयास्वरूपिण्यामस्यां भूमौ श्राद्धपिण्डादिदानं मृतकस्य नरकादियातनानिवृत्त्यर्थमहं करिष्ये।"

इति सङ्कल्पं कृत्वा "**ॐ गणपतये नमः**" इति गणेशं स्मृत्वा "**ॐ यमराजाय धर्माय नमः**" "**ॐगदाधराय नमः**" इति मन्त्राभ्यां क्रमेण यमराजं विष्णुं च गन्धपुष्पाक्षतैः पूजयित्वा "**ॐ गयायै नमः**" इति भूमिमर्चयित्वा श्राद्धादिपिण्डदानं कृत्वा श्रीविष्णुं गदाधरं ध्यायन् गरुडपुराणस्य प्रेतखण्डं शृणुयात्। एवं प्रतिदिनं कृत्यं विधाय प्रेतखण्डं शृणुयात्। एकादशाहे त्रयोदशाहे वा कुलरीत्या ग्रामवचनेन सर्वमौर्ध्वकृत्यं कृत्वा गरुडपुराणमन्त्रैर्जुहुयात्। ततो वाचकाय दक्षिणां दत्त्वा गरुडमहापुराणस्य ससङ्कल्पं दानं कुर्यात्। **इति गरुडमहापुराणपारायणम्॥**

अथ देवीभागवतपारायणम्

श्रीमदभागवतविधिना मण्डपादीनि कृत्यानि विधाय गणेशादिपूजनं कृत्वा शतचण्डीविधानेन देवीमर्चयित्वाऽऽचार्यो देवीभागवतं वाचयेत्। पञ्चब्राह्मणा गायत्रीमन्त्रं नवार्णमन्त्रं दुर्गासप्तशतीपाठं च कुर्युः। सप्तदिवसैः कथा समापनीया। ततो देवीभागवतमन्त्रैर्नवार्णमन्त्रैर्दुर्गासप्तशतीमन्त्रैर्वाऽष्टोत्तर-सहस्रं घृतपायसैर्जुहुयात्। ततो दक्षिणां पुस्तकं च दत्वा कृत्यं समापयेत्। अत्र श्रीमद्भागवतविधिरेव प्राधान्येन स्वीकरणीयः। विष्णुस्थाने भगवत्या दुर्गायाः पूजां कुर्यात्। ब्रह्माविष्णुरुद्रादिदेवानपि पूजयेत्। कलशादिकं स्थापयेच्च। एवं कृत्वा देवीमखं महत्फलं प्राप्नोति यजमान इति॥ **इति देवीभागवत-पारायणम्।**

व्रतादिकाम्यकर्माणि

अथ श्रीसत्यनारायणव्रतकथाविधिः

यजमानो निशामुखे पौर्णमास्यां सङ्क्रान्तौ वा यस्मिन् कस्मिन् वा दिने नारायणे धृतचित्तव्रतः सपत्नीक आचम्य प्राणायामं च विधाय देशकालौ सङ्कीर्त्य "**अमुकगोत्रोऽमुकशर्माऽहं सपत्नीकः श्रुतिस्मृतिपुराणोक्तफल-प्राप्तिकामः सुखैश्वर्यधनपुत्रवृद्धिलाभाय श्रीसत्यनारायणप्रीतये सोपवासो**

गणपतिगौरीनवग्रहपूजनपुरस्सरं श्रीलक्ष्मीनारायणपूजनं पुरुषसूक्तश्रीसूक्तमन्त्रैर्हवनं ततः स्कन्दमहापुराणस्थरेवाखण्डीयश्रीसत्यनारायणव्रतकथाश्रवणमहं करिष्ये।'' इति सङ्कल्पं विधाय पूर्वोक्तप्रकारेण सङ्क्षेपेण दीपं प्रज्वाल्य कलशस्थापनपूजनं कृत्वा गणेशगौरीनवग्रहपूजनं तत्तन्मन्त्रैः कुर्यात्। ततो यजमानः षोडशोपचारेण लक्ष्मीनारायणपूजनं शालिग्रामशिलादौ कृत्वा पञ्चामृतं पञ्चखाद्ययुक्तैः शर्करायुतैः घृतमिश्रितैसुपक्वगोधूमचूर्णैर्नैवेद्यं सपादं विष्णवे समर्प्य पूर्वोक्तं हवनं कुर्यात्। घण्टाशङ्खभेरीगीतैर्नीराजनं विधाय यजमानोऽक्षतपुष्पाणि गृहीत्वा श्रीसत्यनारायणकथां शृणुयात्। प्रत्यध्यायसमाप्ते पुष्पाक्षतान् क्षिप्त्वा शङ्खघण्टादीन् वादयेत्। एवं समाप्तौ रक्षाबन्धनं विधाया- ऽऽशीर्वादं दत्वाऽऽचार्यः साङ्गतासिद्ध्यर्थं दक्षिणाद्रव्यं प्रतिगृह्णीयात्। ततो नैवेद्यं सर्वेभ्यो जनेभ्यो दत्त्वाऽनुष्ठानं विसर्जयेत्।

।। इति श्रीसत्यनारायणव्रतकथाविधिः।।

अथैकादशीव्रतविधिः

प्रतिमासमेकादशीद्वयं भवति कृष्णपक्षीया शुक्लपक्षीया च। यजमानेनोभेअप्येकादशीव्रते कर्त्तव्ये। हरिवासर[१] नाम्नाऽपि तिथिरियं पुराणेषु प्रसिद्धाऽस्ति। एकादश्यां तिथौ सर्वाणि पापानि वसन्त्यन्ने तस्माद् व्रतं कृत्वाऽन्नं प्रवर्जयेत्। अष्टवर्षाधिको बालोऽपि व्रतमेतद् कर्तुं शक्नोति

अष्टवर्षाधिको मर्त्यो ह्यशीतेर्न्यूनवत्सरः।
एकादश्यामुपवसेत् पक्षयोरुभयोरपि॥

एकादशीव्रतं कर्तुमिच्छन्नरो दशमीतोऽधोलिखितद्रव्याणि त्यजेत्

कांस्यं मांसं मसूरान्नं चणकं कोद्रवं तथा।
शाकं मधु परान्नं च पुनर्भोजनमैथुनम्।।

सम्प्राप्ते चैकादशीतिथिकाले व्रती सङ्कल्पं कृत्वा भगवतो विष्णोरुभयोः

---

१. यानि कानि च पापानि ब्रह्महत्यासमानि च। अन्नमाश्रित्य तिष्ठन्ति सम्प्राप्ते हरिवासरे॥ तानि पापान्यवाप्नोति भुञ्जानो हरिवासरे। रटन्तीह पुराणानि भूयो भूयो वरानने॥ न भोक्तव्यं न भोक्तव्यं सम्प्राप्ते हरिवासरे॥

सन्ध्ययोः पूजां कुर्यात्। द्वादशाक्षरमन्त्रमष्टाक्षरमन्त्रं वा जपेत्। तुलसीदलमिश्रितं गङ्गाजलयुक्तं सूक्ष्मफलादिकं भक्षयेत्। एकादश्यां व्रती नासत्यभाषणं कुर्यात् नाऽपवित्रं स्पृशेत् सद् धर्ममाचरेच्च एकादशीमाहात्म्यं च शृणुयात्।

अथैकादशीनामानि - चैत्रमासे कृष्णपक्षे पापमोचनी शुक्ले- कामदा वैशाखे कृष्णे वरूथिनी, शुक्ले-मोहिनी। ज्येष्ठे कृष्णेऽपरा, शुक्ले निर्जला। आषाढे कृष्णे-योगिनी, शुक्ले-शयनी। श्रावणे कृष्णे-कामदा, शुक्ले-पुत्रदा। भाद्रपदे कृष्णेऽजा, शुक्ले-परिवर्तिनी। आश्विने कृष्णे-इन्दिरा, शुक्ले-पापाङ्कुशा। कार्त्तिके कृष्णे-रमा, शुक्ले-प्रबोधिनी। मार्गशीर्षे कृष्णे-उत्पत्तिः, शुक्ले-मोक्षदा। पौषे कृष्णे-सफला, शुक्ले-पुत्रदा माघे कृष्णे षट्तिला, शुक्ले-जया॥ फाल्गुने कृष्णे-विजया, शुक्ले-आमलकी। अधिमासे- कमला कामदा च सञ्ज्ञा वर्तेते।

ततो व्रती द्वादश्यां पारणां कुर्यात् त्रयोदशीपारणं वर्जयेत्। द्वादश्यां विष्णुपूजनं कृत्वैव पारणाविधेया। द्वितीयदिने द्वादश्या संयुक्ता चेदेकादशी तर्हि त्रयोदश्यामेव पारणा कर्त्तव्या। **इत्येकादशीव्रतविधिः।**

अथ प्रदोषव्रतकथाविधिः

सन्ध्याकाले यदा त्रयोदशी भवेत्तदा प्रदोषव्रतमनुष्ठेयम्। एकस्मिन् मासे द्वे प्रदोषव्रते भवतः। एवं वर्षे चतुर्विंशतिप्रदोषव्रतानिव्रतिभिरनुष्ठेयानि। व्रती त्रयोदश्यां शिवपूजायाः प्रदोषव्रतस्य च सङ्कल्पं विधाय प्रातःकाले प्रदोषवेलायां च भगवन्तं शिवं षोडशोपचारेण सम्पूजयेत्। दिनं यावन्निर्जल-व्रतं कृत्वा प्रदोषकाले[१] शिवमर्चयित्वा तस्मिन्नेव काले पारणा सूक्ष्माहारेण कर्त्तव्या। शनिवासरे यः प्रदोषः सर्वोत्तमः। उक्तं यथा -

मन्दवारे प्रदोषोऽयं दुर्लभः सर्वदेहिनाम्।
तत्रापि दुर्लभस्तत्र कृष्णपक्षे समागतः॥

शुक्लपक्षस्य शनिप्रदोषः सन्ततिलाभाय भवति -

---

१. त्रिमुहूर्त्तः प्रदोषः स्याद् भानावस्तं गते सति।

यदा त्रयोदशी शुक्ला मन्दवारेण संयुता।
आरभेद् व्रतं तत्र सन्तानफलसिद्धये॥

प्रदोषेऽपि न कर्त्तव्यान्युपवासनिषिद्ध[१] कर्माणि। श्रावणे कृष्णपक्षे त्रयोदश्यां प्रदोषे रुद्राभिषेककर्म यथाविधि कारयेत्। व्रती प्रदोषकाले स्कन्दमहापुराणगतां प्रदोषव्रतकथांश्रृणुयात्। **इति प्रदोषव्रतविधिः।**

अथ हरितालिकाव्रतकथाविधिः

हरि[२]तालिकाव्रतं नारीणां सौभाग्यवृद्धये समुच्यते। भाद्रपदमासे शुक्लपक्षे तृतीयायां हस्तभे[३] प्रतिवर्षं हरितालिकाव्रतमनुष्ठीयते नारीभिः। व्रतार्हा नारी तस्मिन् दिने देशकालौ सङ्कीर्त्य "**मम समस्तपापक्षयपूर्वकं सप्तजन्मराज्याखण्डितसौभाग्यादिवृद्धये पार्वतीपरमेश्वरप्रीत्यर्थं तुरीय-सन्ध्यासु पार्वतीशङ्करपूजनपुरस्सरं बालुकालिङ्गपूजनं हरितालिकाव्रत-कथाश्रवणं यथोक्तविधिना च हरितालिकाव्रतमहं करिष्ये।**" इति सङ्कल्पं विधाय नारी प्रातः काले शिवं पार्वतीं च पूजयेत् प्रदोषबेलायां गणेशपार्वतीस्कन्दानां मृण्मयविग्रहान् सम्पूज्य ततो पार्थिवशिवलिङ्गस्य षोडशोपचारेण पूजनं कुर्यात्। लिङ्गपुराणगतां हरितालिकाव्रतकथां श्रृणुयात्। अनेन मन्त्रेण शिवस्य पार्वत्याः पूजनं कुर्यात्।

"**ॐ नमः शिवाय शान्ताय पञ्चवक्त्राय शूलिने। नन्दिभृङ्गि-महाव्यालगणयुक्ताय शम्भवे॥ शिवायै हरकान्तायै प्रकृत्यै सृष्टिहेतवे। नमस्ते ब्रह्मचारिण्यै जगद्धात्र्यै नमो नमः। संसारभयसंतापात्पाहि मां सिंहवाहिनि। येन कामेन देवि त्वं पूजितासि महेश्वरि। राज्य-सौभाग्यसम्पत्तिं देहि मामम्ब पार्वति। पुत्रान् देहि धनं देहि सौभाग्यं देहि सुव्रते॥**"

---

१. असकृज्जलपानेन सकृत्ताम्बूलचर्वणात्।
उपवासः प्रणश्येद् दिवास्वापाच्च मैथुनात्॥

२. अलिभिर्हरिता यस्मात्तस्मात्सा हरितालिका॥

३. भाद्रे मासि सिते पक्षे तृतीया हस्तसंयुते। तदनुष्ठानमात्रेण सर्वपापैः प्रमुच्यते॥

ततो ब्राह्मणाय वस्त्रफलान्नदक्षिणादानं कृत्वा निशीथे भगवन्तमुमापतिं यथालब्धोपचारैः पूजयेत्। ततः सूर्योदयात्पूर्वं फलादिभिः पार्वतीपरमेश्वरं सम्पूजयेत्। एतस्मिन् व्रते किञ्चिदपि न भक्षणं कुर्यात्। निर्जलं व्रतं कृत्वा रात्रौ जागरणं कुर्यात्। चतुर्थ्यां पारणां कृत्वा व्रतं समापयेत्। व्रतमिदं व्रतराजनाम्ना पुराणेषु प्रथितमस्ति। नारीणां कृतेऽत्युत्तमं व्रतमिदं कथितम्। **इति हरितालिकाव्रतकथाविधिः॥**

अथ ऋषिपञ्चमीव्रतकथाविधिः

स्त्रीणां रजस्वला[१] जन्यदोषं दूरीकरणार्थमृषिपञ्चमीव्रतमनुष्ठेयम्। अस्य व्रतस्याचरणं दम्पती कुर्याताम्, स्त्री स्वयं वा कुर्यात्। भाद्रपदमासे शुक्लपक्षस्य पञ्चम्यां व्रतमिदं कर्त्तव्यम्। व्रती पुरुषः स्त्री वा नद्यां तडागे वा स्नात्वा गृहमागत्य आचमनं कृत्वा देशकालौ सङ्कीर्त्य **"अहं ज्ञानतोऽज्ञानतो वा रजस्वलावस्थायां कृतसम्पर्कजनितदोषपरिहारार्थमृषिपञ्चमीव्रतं करिष्ये।" तदादौ गणेशपूजनपुरस्सरमरुन्धतीसहितं सप्तर्षिपूजनमहं करिष्ये।"** इति सङ्कल्पं कृत्वा गणेशस्य पूजनं विधाय अरुन्धती सहितसप्तर्षीणां पूजनं कर्त्तव्यम्। अरुन्धत्या सह सप्तर्षीणां स्वर्णमयी रजतमयी वा प्रतिमां निर्माय षोडशोपचारेण पूजयेत्। मन्त्रेणाऽनेन सप्तर्षिभ्योऽर्घ्यं दद्यात् **"ॐ कश्यपात्रिर्भरद्वाजो विश्वामित्रोऽथ गौतमः॥ जमदग्नि- र्वसिष्ठश्च सप्तैते ऋषयः स्मृताः। गृह्णन्त्वर्घ्यं मया दत्तं तुष्टा भवत मे सदा।"** अनेन मन्त्रेणाऽरुन्धत्यै दद्यादर्घ्यम् **"ॐ अत्रेर्यथानसूया स्याद् वसिष्ठस्याप्यरुन्धती। कौशिकस्य यथा सती तथा त्वमपि भर्त्तरि॥"** ततो यजमानो व्रती सपत्नीकः ससङ्कल्पं प्रतिमादानं कुर्यात्। वस्त्राभरणैः सह विप्राय दक्षिणां दद्यात्। अस्मिन् व्रते पुरुषसूक्तेन रुद्रसूक्तेन वा सप्तर्षिनामभिः

---

१. प्रथमे दिने चाण्डाली द्वितीये ब्रह्मघातिनी।
तृतीये रजकी प्रोक्ता चतुर्थेऽहनि शुद्ध्यति।।

प्रणवाद्यैः स्वाहान्तैश्च हवनं विधेयम्। अस्मिन् व्रते व्रती हलकृष्टरहितं फलं नीवारान्नं वा भक्षयेत्। षष्ठ्यामस्य पारणा विधेया। ततोऽर्चनान्ते भविष्योत्तरपुराणस्था ब्रह्माण्डपुराणस्था वा ऋषिपञ्चमी कथा श्रोतव्या। **इति ऋषिपञ्चमीव्रतकथाविधिः।**

अथ गणेशचतुर्थीव्रतकथाविधिः

प्रतिमासस्य कृष्णपक्षे शुक्लपक्षे च चतुर्थ्यां तिथौ गणेश- चतुर्थीव्रतं भवति। सौभाग्यपुत्रादिकामेच्छया नारीभिर्व्रतमिदमनुष्ठेयम्। रात्रौ चन्द्रोदयकाले यदा चतुर्थी स्यात्तदा गणेशचतुर्थीव्रतं विधेयम्। शुक्लपक्षीया गणेशचतुर्थी वैनायकी चतुर्थीति नाम्ना प्रसिद्धा। कृष्णपक्षीया गणेशचतुर्थी सङ्कष्टी'ति नाम्नाऽभिधीयते। एष भाद्रपदस्य कृष्णपक्षीया बहुला चतुर्थी (सङ्कष्टी), कार्त्तिककृष्णपक्षे करकचतुर्थी माघकृष्णपक्षे च सङ्कष्टचतुर्थीति नाम्ना प्रथिता महत्त्वपूर्णा चाऽस्ति। भाद्रकृष्णपक्षीया चतुर्थी चेद् रविभौमवाराभ्यां संयुक्ता तर्हि महती चतुर्थीति नाम्ना निगद्यते। अस्मिन् व्रते दिनं यावन्निर्जला भूत्वा स्त्रियो रात्रौ चन्द्रोदये सति षोडशोपचारेण गणेशस्य पूजनं कुर्वन्ति। देश कालर्त्वनुसारमेकविंशतिदूर्वाङ्कुरानुशीरपुष्पाणि पुष्पफलानि वाऽऽदाय द्वे-द्वे दूर्वादलेऽधोलिखितमन्त्रैर्गणेशाय निवेदयेत् "**ॐ गणाधिपाय नमः। ॐ उमापुत्राय नमः। ॐ अघनाशनाय नमः। ॐ विनायकाय नमः। ॐ ईशपुत्राय नमः। ॐ सर्वसिद्धयै नमः। ॐ एकदन्ताय नमः। ॐ इभवक्त्राय नमः। ॐ मूषकवाहनाय नमः। ॐ कुमारगुरवे नमः।**" एवं विंशतिदूर्वादलादीन् समर्प्य पुनः सर्वनामानि पठित्वा समर्पयेदेकदूर्वादलम्। करकचतुर्थ्यां कुम्भयोः पूजा भवति, माघचतुर्थ्यां (कृष्णीया) तिलैर्गणेशस्य पूजा क्रियते। शकटारोहणं च गणेशस्य विधीयते। गणेशस्याऽनेन मन्त्रेण ध्यानं तत्र कर्त्तव्यम्।

ॐ एकदन्तं शूर्पकर्णं नागयज्ञोपवीतिनम्।
पाशाङ्कुशधरं देवं ध्यायेत्सिद्धिविनायकम्॥

भाद्रपदस्य कृष्णपक्षे बहुला[1] चतुर्थ्यां बहुलागाथा श्रोतव्याऽनाथरक्षणं च पालनीयम्। कृष्णपक्षे गणेशचतुर्थीव्रते गणेशस्य पूजनं विधाय चन्द्रायाऽर्घ्यो दीयते। चन्द्रार्घ्यदानमनेन मन्त्रेण कर्त्तव्यम् "**ॐ क्षीरोदार्णवसम्भूत अत्रिगोत्र-समुद्भव। गृहाणार्घ्यं शशाङ्केदं रोहिणीसहितो मम॥ ज्योत्स्नानां पतये तुभ्यं ज्योतिषां पतये नमः। नमस्ते रोहिणीकान्त सुधावास नमोऽस्तु ते॥ नभोमण्डलदीपाय शिरोरत्नाय धूर्जटेः॥ कलाभिवर्द्धमानाय नमश्चन्द्राय चारवे॥**" गन्धपुष्पाक्षतजलदुग्धमिश्रितमर्घ्यं दद्यात्। शुक्लपक्षीयां वैनायिकीगणेशचतुर्थ्यां चन्द्रायाऽर्घ्यं न दद्यात्। केवलं श्रीगणेशं प्रपूजयेत्। गणेशचतुर्थीपारणाऽर्घ्यान्ते पूजनान्ते वा विधेया। गणेशचतुर्थ्यां स्कन्दपुराणगतां गणेशचतुर्थीव्रतकथां शृणुयात्। **इति गणेशचतुर्थीव्रतकथाविधिः।**

अथ नवरात्रव्रतविधिः

"कालिरात्रिर्महारात्रिर्मोहरात्रिश्च दारुणा" इति भेदाच्चतुर्धा नवरात्रव्रतं विभज्यते आश्विनशुक्लपक्षस्य प्रतिपदातो नवमीतिथिं यावत्कालरात्रसञ्ज्ञकं नवरात्रं माघशुक्लप्रतिपदातः पूर्णिमांयावन्महारात्रसञ्ज्ञकं नवरात्रं, चैत्रशुक्ल-प्रतिपदातो नवमीतिथिं यावन्मोहरात्रसञ्ज्ञकं नवरात्रव्रतं च कथ्यते। आषाढशुक्लपक्षीयप्रतिपदातो नवमीतिथिं यावद् दारुणारात्रसञ्ज्ञकं नवरात्रव्रतं भवति। किन्तु एष्वाश्विनशुक्लपक्षीयं शारदीयनवरात्रमतिमहत्त्वपूर्णं तथा च चैत्रमासीयं वासन्तीयनवरात्रं लोके प्रसिद्धे स्तः। शाक्तागमपुराणेषु नवरात्रव्रत[2]स्याऽतिमहत्त्वं वर्णितमस्ति। व्रती नवरात्रे कलशं संस्थाप्य सात्त्विको भूत्वा दुर्गार्चनं कुर्वन् फलाहारं कुर्यात्। ब्रह्मचर्यादिव्रतनियमानि व्रतेऽस्मिन्नपि पालनीयानि। नखकेशादिवपनं न कारयेत्। नवचण्डीशतचण्डीविधिना देवीं सम्पूज्य दुर्गासप्तशतीपारायणं देवीभागवतस्य देवीपुराणस्य वा पारायणं कर्त्तव्यम्।

---

१. श्रोतव्या बहुला गाथा स्त्रीभिश्च पुरुषैस्तथा।
मातॄणां सुतवात्सल्यं सत्यस्य महिमापरः॥

२. महासिद्धिप्रदं धन्यं सर्वशत्रुनिवर्हणम्। सर्वलोकोपकारार्थं विशेषादतिवृष्टिषु।
क्रत्वर्थं ब्राह्मणाद्यैश्च क्षत्रियैर्भूमिपालने। गोधनार्थं विशा वत्स शूद्रैः पुत्रसुखार्थिभिः॥
सौभाग्यार्थं स्त्रिया कार्यमाढ्यैश्च धनकाङ्क्षिभिः। महाव्रतं महापुण्यं शङ्कराद्यैरनुष्ठितम्।

नवरात्रव्रताशक्तौ षष्ठीतः सप्तमीतो वा नवमीपर्यन्तं व्रतमनुष्ठेयम्। अथवाऽष्टम्यां नवम्यां वा केवलमेकदिनमेव व्रतं कर्त्तव्यम्। अष्टम्यां नवम्यां वा होमो विधातव्यः। तान्त्रिकमतेन नवम्यां[१] स्मार्त्तमतेन[२] च दशम्यां नवरात्रस्य पारणा कर्त्तव्या। **इति नवरात्रव्रतविधिः॥**

अथ जयन्तीव्रतविधिः

जयन्तीव्रतं कृष्णजन्माष्टमीव्रतनाम्नाऽप्युच्यते। भाद्रपदमासे कृष्णपक्षेऽष्टम्यां यदि निशीथकाले रोहिणीनक्षत्रं स्यात्तर्हि जयन्तीव्रतं कथ्यते। उक्तं यथा–

प्राजापत्येन संयुक्ता कृष्णा नभसि चाष्टमी।
जयन्ती नाम सा प्रोक्ता सा ह्युपोष्या महाफला॥

रोहिणी चेदष्टम्यां न स्यात्तर्हि केचित्कथयन्ति यदा रोहिणी भवेत्तदोपवासः कर्त्तव्यः। केषांश्चिन्मतेन चाऽष्टम्यैवोपास्येति नानाविप्रतिपत्तयो ग्रन्थेषु दरीदृश्यन्ते। तासामत्र न चर्चा विधीयते विस्तरत्वात्। व्रती स्नात्वा व्रतस्याऽस्य सङ्कल्पं कृत्वा कृष्णस्य पूजां षोडशोपचारैः कुर्यात्। रात्रौ श्रीकृष्णस्य जन्म प्रतीकात्मत्वेन मन्यते। तत्र सूर्यसोमयमकालादीना-मावाहनमनेन मन्त्रेण कृत्वा पूजयेत् "**ॐ सूर्यः सोमो यमः कालः सन्ध्ये भूतान्यहः क्षपा। पवनो दिक्पतिर्भूमिराकाशं खचरामराः। ब्राह्मं शासनमास्थाय कल्पध्वमिह सन्निधिम्॥**" एतेषां पूजनं विधाय वसुदेव-देवकीयशोदादीनामपि पूजनं ततो बालश्रीकृष्णस्याऽर्चा कर्त्तव्या। शङ्खपात्रेण रोहिणीयुक्ताय चन्द्रायाऽर्घ्यमपि दद्यात्। ततः भगवन्तं श्रीकृष्णमनेन मन्त्रेण वन्देत "**ॐ यं देवं देवकी देवी वसुदेवादजीजनत्। भौमस्य ब्रह्मणो गुप्त्यै तस्मै ब्रह्मात्मने नमः। सुजन्म वासुदेवाय गोब्राह्मणहिताय च। जगद्हिताय कृष्णाय गोविन्दाय नमो नमः॥ शरणं तु प्रपद्येऽहं**

---

१. नवम्यां पारिता देवी कुलवृद्धिं करोति वै। दशम्यां पारिता देवी कुलनाशं करोतिह॥
२. नवरात्रव्रतपारणा सा च दशम्यां कार्या। (निर्णयसिन्धौ)

सर्वकामार्थसिद्धये। प्रणमामि सदा देवं वासुदेवं जगत्पतिम्॥'' ततो रात्रौ जागरणं कृत्वा गीतवादित्रैर्मङ्गलानुशासनं कुर्यात्। स्तोत्रपुराणादीनि पठेत्। द्वितीयदिने नवम्यां पारणं कृत्वा व्रतं समापयेत्। केचन श्रीकृष्णजन्मानन्तरमेव निशीथे पारणां कुर्वन्ति। लोके पारणाविषये विप्रतिपत्तिं दृष्ट्वा देशकालानुसारं विधेयम्। **इति जयन्तीव्रतविधिः॥**

अथ शिवरात्रिव्रतविधिः

प्रतिमासं कृष्णचतुर्दशी शिवरात्रिनाम्नाऽभिधीयते। किन्तु फाल्गुनकृष्ण पक्षस्य चतुर्दशी महाशिवरात्रिनामधेयेन प्रसिद्धा महत्त्वपूर्णा चाऽस्ति। गरुडपुराणे कथैकाऽऽगता यस्यां चतुर्दश्यामेकेन निषाद[१] राजेनाऽज्ञातावस्थायां शिवपूजनं विधाय शिवलोकमलेभि। प्रदोष[२] व्यापिनी रात्रौ चतुर्दशी स्याच्चेत्तर्हि सोत्तमा शिवरात्रिः कथ्यते। शिवरात्र्युपासकः शिवरात्रिव्रतसङ्कल्पं विधाय रुद्राभिषेकविधिना पार्थिवचतुर्दशशिवलिङ्गानां षोडशोपचारेण पूजनं कुर्यात्। षडक्षरमन्त्रं त्र्यम्बकमन्त्रं वा जपेत्। ततो रात्रौ चतुर्थप्रहरेषु चतुर्वारं शिव लिङ्गमग्राङ्कितमन्त्रैरर्चयेत् प्रथमप्रहरे **''ह्रीं ईशानाय नमः''** इति मन्त्रेण पयसा, द्वितीय प्रहरे **''ह्रीं अघोराय नमः''** इति मन्त्रेण दध्ना, तृतीय प्रहरे **''ह्रीं वामदेवाय नमः''** इति मन्त्रेण घृतेन चतुर्थप्रहरे च **''ह्रीं सद्योजाताय नमः''** मन्त्रेण मधुना शिवलिङ्गं यथोक्तप्रकारेण विल्वपत्रादिभिः षोडशोपचारैः पूजयेत्। तिलभक्तघृतैरूपासको रूद्राष्टाध्यायीमन्त्रैर्महामृत्युञ्जयमन्त्रैर्जुहुयात्। रात्रौ जागरणं कृत्वा शिवपुराणादीनि पठेत्। अस्य व्रतस्य महत्त्वं पुराणेषु बहुचर्चितम्–

एवं द्वादशवर्षाणि शिवरात्रिमुपोषकः।
यो मां जागरयते रात्रिं मनुजः स्वर्गमारुहेत्॥
शिवं च पूजयित्वा यो जागर्ति च चतुर्दशीम्।
मातुः पयोधररसं न पिबेत्स कदाचन॥

एवं व्रतं विधायाऽमावास्यायां पारणा कर्त्तव्या। ब्राह्मणाय

---

१. स्वयम्भूलिङ्गमभ्यर्च्य सोपवासः सजागरः। अजानन्नपि निष्पापो निषादो गणतां गत।
२. प्रदोषव्यापिनी ग्राह्या शिवरात्रिचतुदर्शी। रात्रौ जागरणं यस्मात्तस्मात्तां समुपोषयेत्।

वस्त्रान्नदक्षिणां च दद्यात्। ततो व्रतं समापयेत्। **इति शिवरात्रिव्रतविधिः॥**

इति कर्मकौमुद्यां पुराणपारायणव्रतादिकाम्यकर्माध्यायः।

दृष्ट्वा स्वकर्मसु जनानलसानबोधान्।
शास्त्रानभिज्ञपुरुषांश्च सुकर्मकाण्डे॥
तेषाङ्कृतेऽल्पमतिमान् हि बृजेशशुक्लः।
सत्कौमुदीं रचितवान् खलु कर्मपूर्वाम्॥

॥ इति बृजेशकुमारशुक्लरचिता कर्मकौमुदी समाप्ता॥

अथ परिशिष्टम्

अथ पञ्चाङ्गावलोकनविधिः

तिथिवारनक्षत्रयोगकरणानां पञ्चाङ्गानां यत्र ज्ञानं वरीवर्ति तत्पञ्चाङ्गमिति नाम्नाऽभिधीयते। पञ्चाङ्गे तिथिनक्षत्रयोगकरणानां मानं सूर्योदयात्प्रायः घटीपलेषु दीयते। आवश्यकतानुसारं घटीपलानि सार्द्धद्वयसङ्ख्यया विभज्यन्ते तर्हि सूर्योदयाद्होरादिकालो भवति। एतदतिरिक्तं पञ्चाङ्गे दिनमानतारिकासूर्योदयास्तचन्द्रोदयादयो दैनिकं लिख्यन्ते। तिथ्यादीनां स्थानीयमानज्ञानार्थं चरसारणीतः पलान्यादायाऽक्षांशक्रान्त्यंशद्वारेण तत्र संस्कारो यथोक्तरीत्या कर्त्तव्यः। भारतीयज्योतिषशास्त्रे वारस्य मानं सूर्योदयादपरसूर्योदयं यावद् षष्टिघट्यात्मकं भवति। प्रतिमासं त्रिंशत्तिथयो भवन्ति तासां प्रसिद्धत्वादत्र नोच्यते, सोमवारादयः सप्तदिनान्येव वारसञ्ज्ञकानि ज्योतिषशास्त्रे कथ्यन्ते। एतत्सर्वं पञ्चाङ्गादेवाऽवगन्तव्यम्।

नक्षत्रनामानि– अश्विनी, भरणी, कृत्तिका, रोहिणी, मृगशिरा, आर्द्रा, पुनर्वसुः पुष्यः आश्लेषा, मघा, पूर्वाफाल्गुनी, उत्तराफाल्गुनी, हस्तः, चित्रा, स्वाती, विशाखा, अनुराधा, ज्येष्ठा, मूलः, पूर्वाषाढः, उत्तराषाढः, श्रवणः, धनिष्ठा, शतभिषा, पूर्वाभाद्रपदः, उत्तराभाद्रपदः, रेवती चेति सप्तविंशतिनक्षत्राणि। अभिजिन्नामधेयमिति भवत्यष्टाविंशतितमं नक्षत्रमपि।

योगनामानिः–विष्कुम्भः, प्रीतिमान्, आयुष्मान्, सौभाग्यः, शोभनः अतिगण्डः, सुकर्म, धृतिः,शूलः, गण्डः, वृद्धिः, ध्रुवः, व्याघातः, हर्षणः, वज्रः सिद्धिः, व्यतीपातः, वरीयान् परिघः, शिवः, सिद्धः, साध्यः, शुभः, शुक्लः, ब्रह्म, ऐन्द्रः वैधृतिश्चेति सप्तविंशतियोगाः समाख्याताः प्रायो नामसदृशमेव योगानां फलं जातकग्रन्थेषु निगदितम्।

करणनामानिः-तिथ्यर्द्धभागं दैवज्ञाः करणं ब्रुवन्ति। तेषां नामानि लिख्यन्तेऽत्र-बवः, बालवः, कौलवः, तैतिलः, गरः, वणिजः, विष्टिः,

शकुनिः, चतुष्पदः, नागः, किंस्तुध्नश्चेति करणान्येकादश समाख्यातानि।

यदा सूर्याचन्द्रमसोरन्तरं द्वादशांशात्मकं भवति तदा तिथिरेका जायते। उभयोरन्तरम् १३.२० अंशादि स्यात्तर्हि अश्विन्यादि नक्षत्रमेकं भवति। यदा चोभयोर्योगः १३.२० अंशादि दृश्यते तर्हि विष्कुम्भादियोग एको जायते। उभयोः षडंशात्मकेऽन्तरे करणमेकं भवति। स्थानीयमानस्यानयनायाऽक्षांश-देशान्तर-पलभा- सारणीभ्यो यथविधि ,कथितप्रकारेण संस्कारः कर्त्तव्यः। एतज्ज्ञानाय विश्वपञ्चाङ्गं कृष्णामूर्त्तिपञ्चाङ्गं वा द्रष्टव्यमथवाऽन्यवि शुद्धपञ्चाङ्गाज्ज्ञातव्यम्।

अथ होराचक्रविवाहमेलापकश्च

होराचक्रं राशिनक्षत्राणां वर्णादीनां च ज्ञानाय कल्पते। सर्वेषु पञ्चाङ्गेषु चक्रमेतद् दीयते। प्रतिनक्षत्रं चतुर्धा भिद्यते। तदेक- भागः पादश्चरणो वा कथ्यते। प्रत्येकनक्षत्रे चतुश्चरणानुसारमक्षरचतुष्टयं वर्तते। यस्य जातकस्य जन्म यस्मिन् नक्षत्रे यस्मिन् चरणे च भवति तदनुसारं राशिनामधेयस्य व्यवस्था क्रियते। तत्क्रमेणैव राशिगणवर्णयोनिनाडी वश्यादीनामपि व्यवस्था भवति।

पञ्चाङ्गे 'गणनागुणैक्यबोधकचक्रे' कन्यावरयोर्नक्षत्रानुसारं क्रमेणैव यद्योगो लभ्यते ते एव भकूटगुणा भवन्ति। गुणानां सङ्ख्याविषये निगदितं तेन विवाहस्योत्तमाधमत्वं दरीदृश्यते-

गुणैः षोडशभिर्निन्द्यं मध्यमा विंशतिस्तथा।
श्रेष्ठं त्रिंशद्गुणं यावत्परतस्तूत्तमोत्तमः॥

अथ जन्माङ्के मङ्गलीयोगविचारः

मङ्गली चेत्कन्या तर्हि वरोऽपि मङ्गली भवेत्। मङ्गलीदोष- ज्ञानार्थं श्लोकोऽयं स्मर्यते- **लग्ने व्यये च पाताले जामित्रे चाऽष्टमे कुजे।**

कन्या भर्तुर्विनाशाय भर्त्ता पत्नीविनाशकृत्॥

मङ्गलीदोषस्य परिहारो लिख्यते-

जामित्रे च यदा सौरिर्लग्ने वा हिबुकेऽथवा।
अष्टमे द्वादशे वापि भौमदोषविनाशकृत्॥

शनिर्भौमोऽथवा कश्चित्पापो वा तादृशो भवेत्।
तेष्वेव भवनेष्वेव भौमदोषविनाशकृत्॥

एवमेवाऽन्यदप्यूह्यम्। एते विषया अधोलिखितेषु ग्रन्थेषु विस्तरेण चर्चिताः। विस्तरेण ज्ञानाय ग्रन्था एतेऽवलोकनीयाः

(१) शीघ्रबोधः

(२) विवाहवृन्दावनम्

(३) मुहूर्त्तचिन्तामणिः (पीयूषधाराटीका)

(४) वृहज्ज्योतिषसारः।

संवत्सरादि ग्रहगोचरत्वञ्च

पञ्चाङ्गेष्वेव संवत्सरादिविषयकचर्चा विस्तरेण प्राप्यते। तत्सर्वं पञ्चाङ्गेभ्योऽवलोकनीयम्। षष्टिसंवत्सरा भवन्ति। प्रतिवर्षं संवत्सरफलाधिपा दीनां विचारः पञ्चाङ्गे लिख्यते। एवमेव पञ्चाङ्गे प्रत्येकमासस्य पक्षानुसारं सप्ताहानुसारं दैनिकं वा ग्रहस्पष्टं विलिख्यते। इष्टराशिलग्नाभ्यां यस्मिन् भावे यो ग्रहस्तस्मिन् तस्य ग्रहस्य गोचरत्वं मन्यते। प्रायः सर्वे ग्रहाः ४,६,८,१२ भावेषु गोचराः स्युश्चेत् तर्हि मन्यन्तेऽरिष्टकारिणः। विभिन्नग्रन्थेषु गोचरफलमवलोकनीयम्।

अथ मुहूर्त्ताः

कस्मिंश्चित्कार्ये केषांश्चित्तिथिवारनक्षत्रलग्नादीनां श्रेष्ठत्वं ज्योतिष-शास्त्रे मन्यते। एतदेवाऽभीष्टकार्ये तदभीष्टतिथिवारनक्षत्रलग्नादीनां प्राप्तिर्मुहूर्त्त इत्युच्यते। मुहूर्त्तपल्लीपतनादिशकुनज्ञानायाऽ-धोलिखिता ग्रन्था अवलोकनीयाः

(क) मुहूर्त्तचिन्तामणिः (पीयूषधाराटीकायुता)

(ख) मुहूर्त्तगणपतिः

(ग) मुहूर्त्तमार्त्तण्डः

(घ) अद्भुतसागरः

(ङ) वसन्तराजशाकुनम्

(च) नारदसंहिता।

अथ जन्माङ्कज्ञानम्

अथेष्टकालसाधनम्

सूर्योदयादभीष्टकालं यावद् गणनां कृत्वा यद् होरादिकं भवेत्तत् सार्द्धद्विसङ्ख्यया गुणनं विधाय यत् सङ्ख्या प्राप्यते तदेव घट्यादिकं सूर्योदयादिष्टं भवति। देशान्तरवेलान्तरानुसारमिष्टसमये तत्तत्संस्कारान् विधाय स्थानीयसमयानुसारमेव सूर्योदयादिष्टसाधनं कर्त्तव्यम्।

भभोगः—चन्द्रनक्षत्रस्याऽभीष्टकालात्मकस्य सर्वभुक्तिमानं घट्यादिकं 'भभोग' इति सञ्ज्ञयाऽभिधीयते। 'सर्वर्क्ष' मित्यपर- नाम्नापि स भभोग उच्यते ज्योतिषशास्त्रे। **भयातम्**:—अभीष्टकालं यावच्चन्द्रनक्षत्रस्य यद् घट्यादिकं भुक्तिमानं व्यतीतं तदेव 'भयात' मिति 'गतर्क्ष' वेति कथ्यते।

अथ लग्नानयनम्

लग्नानयनस्य गणितीयविधिर्विस्तृतः प्रामाणिकश्चाऽस्ति। नात्रोच्यते स विधिस्तस्य विस्तरत्वात्। अभीष्टस्थानस्याक्षांशानुसारं निकटतमाऽक्षांशानुक्रमेणाऽभीष्टस्पष्टार्कगतं घट्यादिकमादाय सूर्योदयादिष्टे तद् घट्यादिकं योजयेत्। लग्नसारिण्यां तद्योगो यत्र प्राप्यते, तदेव लग्नं स्थूलमंशादिकमुपलभ्यते। पञ्चाङ्गे दैनिकलग्नसारिण्यां वा वादनानुसारं लग्नं समुल्लिख्यते। ततो लग्नं निश्चेतव्यम्। लग्नस्य कृते मेषादिक्रमेणैवं सङ्ख्या जन्मकुण्डल्यां लिख्यते- मेषः१, वृषः२, मिथुनः३, कर्कः४, सिंहः५, कन्याः६, तुला७, वृश्चिकः८, धनुः९, मकरः१०, कुम्भः११, मीनः१२, चेति॥

अथ जन्मपत्रीरचना

द्वादशकोष्ठात्मकं चक्रं विधायाऽभीष्टकाले यल्लग्नं तदूर्ध्वकोष्ठके विधाय क्रमेण द्वादशकोष्ठकेषु लग्नानुसारं सङ्ख्यां विन्यसेत्। ततस्तस्मिन्नभीष्टकाले ये ग्रहा यत्र यत्र राशिषु वर्तन्ते तेषां ग्रहाणां विन्यासस्तत्तद्

राशिषु करणीयः। चन्द्रमा यत्र वर्तते जन्मराशिस्तत्रैव मन्यते। एवं जन्माङ्कस्य रचना विधातव्या।

अथ विंशोत्तरीमहादशा योगिनीमहादशा च।

जन्मनक्षत्रानुसारमत्र विंशोत्तरी योगिनी चेत्युभे अपि दशे समुल्लिख्येते। दशाया भोग्यवर्षादिकं भयातभभोगानुसारमवगन्तव्यम्। एतद्विधिर्वा ग्रन्थान्तरेषु द्रष्टव्यः

॥ अथ विंशोत्तरीक्रमः ॥

दशाः	सूर्यः	चन्द्रः	भौमः	राहुः	गुरुः	शनिः	बुधः	केतुः	शुक्रः
वर्षाणि	०६	१०	०७	१८	१६	१९	१७	०७	२०
जन्म-नक्षत्राणि	कृ० उ०फा० उ०षा०	रोहिणी हस्तः श्रवणः	मृगशिरा चित्रा धनिष्ठा	आर्द्रा स्वाती शतभिषा	पुनर्वसु विशाखा पू०भा०	पुष्यः अनु० उ०भा०	आश्लेषा ज्येष्ठा रेवती	मघा मूलः अश्विनी	पू०फा० पू०षा० भरणी

॥ अथ योगिनीक्रमः ॥

दशाः	मङ्गला	पिङ्गला	धान्या	भ्रामरी	भद्रिका	उल्का	सिद्धा	सङ्कटा
वर्षाणि	०१	०२	०३	०४	०५	०६	०७	०८
जन्म-नक्षत्राणि	श्रवणः आर्द्रा चित्रा	धनिष्ठा पुनर्वसुः स्वाती	शतभिषा पुष्यः विशाखा	अश्विनी आश्लेषा अनुराधा पू०भा०	भरणी मघा ज्येष्ठा उ०भा०	कृत्तिका पू०फा० मूलः रेवती	रोहिणी उ०फा० पू०षा०	मृगशिरा हस्तः उ०षा०

अथ वर्षाङ्करचना मुद्दादशा च

गताब्दानुसारं वर्षप्रवेशसारणीतो वारघट्यादिकमादाय जन्मकालिक-वारेष्टघट्यादिषु योजयेत्। तद्योगो घट्यादिकं वर्षेष्टं भवति वारो य आयाति स वर्ष प्रवेशवारोऽभिधीयते। वर्षेष्टानुसारं पूर्ववल्लग्नानयनं कुर्यात्। द्वादशकोष्ठकचक्रेषु तल्लग्नमूर्ध्वकोष्ठके निधाय क्रमेण लग्नानुसारं कोष्ठकेषु सङ्ख्यां लिखेत्। ततो ये ग्रहा यद्यद्राशिषु वर्तन्ते तत्तद् राशिषु ते ग्रहाः

स्थापनीयाः। एवं वर्षाङ्कचक्रं निर्मीयते। विंशोत्तरीदशानुसारमेव वर्षे मुद्दादशा लिख्यते एतद्दशा पञ्चाङ्गादिभ्यो ज्ञातव्या। गताब्दप्रमाणे जन्मलग्नं संयोज्य द्वादश सङ्ख्याभिर्विभक्ते यच्छिष्यते, तत्सङ्ख्यकराशौ वर्षाङ्कचक्रे मुन्था स्थापनीया। जातकताजिकफलादेशज्ञानाय ज्योतिषशास्त्रस्य विस्तृताध्ययनाय च निम्नलिखिता ग्रन्था द्रष्टव्याः –

(अ) बृहज्जातकम् (ऊ) ताजिकनीलकण्ठी
(आ) मानसागरी (ऋ) सारावली
(इ) फलदीपिका (लृ) भावकुतूहलम्
(ई) जातकपारिजातः (ए) लघुपाराशरी
(उ) जातकाभरणम् (ऐ) हायनभास्करः

।। इति ज्योतिषपरिशिष्टम्।।

।। बलिहरणमण्डलम् ।।


पूर्वा
जलपात्रे
अन्नपात्रम्
ॐ प्राच्यै नमः ७
ॐ विधात्रे नमः २ ॐ वायवे नमः ३ ॐ धात्रे नमः १
ॐ भूतानां पतये नमः १७
ॐ उषसे नमः १६
ॐ विश्वेभ्यो भूतेभ्यो नमः १५
ॐ विश्वेभ्यो देवेभ्यो नमः१४
ॐ सूर्याय नमः १३
ॐ अंतरिक्षाय नमः १२
ॐ ब्रह्मणे नमः ११
ॐ अवाच्यै नमः ८
ॐ वायवे नमः ४
ॐ पितृभ्यः स्वधा नमः १८
ॐ उदीच्यै नमः १०
ॐ वायवे नमः ६
उत्तरा
दक्षिणा
मणिक्
३ पृथि०
३ अद्भ्यो
१ पर्ज०
ॐ हन्त ते० २०
ॐ यक्ष्म० नमः १९
ॐ वायवे नमः ५
ॐ प्रतीच्यै नमः ९
पश्चिमा

।। अथ पञ्चायतनदेवतास्थापनम्।।

(१) श्रीशिवपञ्चायतनम्		
विष्णु		सूर्य
	शिव	
देवी		गणेश

(२) श्रीविष्णुपञ्चायतनम्		
शिव		गणेश
	विष्णु	
देवी		सूर्य

(३) श्रीसूर्यपञ्चायतनम्		
शिव		गणेश
	सूर्य	
देवी		विष्णु

(४) श्रीदेवीपञ्चायतनम्		
विष्णु		शिव
	देवी	
सूर्य		गणेश

(५) श्रीगणेशपञ्चायतनम्		
विष्णु		शिव
	गणेश	
देवी		सूर्य

।। गणपतिसहितं - वा० यो० नवग्रहाणां मण्डलम्।।



।। नवग्रहमण्डलम्।।



।। सर्वतोभद्रचक्रम्।।



।। पञ्चलोकपालमण्डलम्।।



।। दशदिक्पालमण्डलम्।।



।। षोडशमातृकामण्डलम्।।

पूर्वा

उत्तरा

गौरी	पद्मा	शची	मेधा
सावित्री	विजया	जया	देवसेना
स्वधा	स्वाहा	मातरः	लोकमातरः
हृष्टिः	पुष्टिः	तुष्टिः	आत्मकुलदेवी

दक्षिणा

पश्चिमा

।। वसोर्धारामण्डलम् ।।



।। पञ्चाशत्क्षेत्रपालमण्डलम्।।



।। चतुष्षष्टिपदे चतुर्भुजे देवानां न्यासक्रमः।।

पूर्वा

उत्तरा | दक्षिणा

शिखी / दितिः	पर्जन्यः	जयन्तः	इन्द्रः	सूर्यः	सत्यः	भृशः	आकाशः / अनिलः
अदितिः	पर्जन्यः / अदितिः	जयन्तः	इन्द्रः	सूर्यः	सत्यः	भृशः / पूषा	पूषा
भुजगः	भुजगः	आपवत्सः / आपः	अर्यमा	अर्यमा	सविता / सावित्रः	वितथः	वितथः
सोमः	सोमः	पृथ्वीधरः	ब्रह्मा	ब्रह्मा	विवस्वान्	गृहक्षतः	गृहक्षतः
भल्लाटः	भल्लाटः	पृथ्वीधरः	ब्रह्मा	ब्रह्मा	विवस्वान्	यमः	यमः
मुख्यः	मुख्यः	रुद्रः / रुद्रदासः	मित्रः	मित्रः	इन्द्रः / जयः	गन्धर्वः	गन्धर्वः
नागः	नागः / शोषः	असुरः	वरुणः	कुसुम दन्तः	सुग्रीवः	भृङ्गराजः / दौवारिकः	भृङ्गराजः
रोगः / पापयक्ष्मा	शोषः	असुरः	वरुणः	कुसुम दन्तः	सुग्रीवः	दौवारिकः	मृगः / पिता

पश्चिमा

।। एकाशीतिपदे चतुर्भुजे वास्तौ देवानां न्यासक्रमः।।

पूर्वा

उत्तर (left side) — दक्षिणा (right side)

शिखी	पर्जन्यः	जयन्तः	इन्द्रः	सूर्यः	सत्यः	भृशः	अन्तरिक्षः	अनिलः अनलो वा
दितिः	आपः	जयन्तः	इन्द्रः	सूर्यः	सत्यः	भृशः	सविता	पूषाः
अदितिः	अदितिः	आप- वत्सः	अर्यमा	अर्यमा	अर्यमा	सविता	वितथः	वितथः
भुजगः	भुजगः	पृथ्वी- धरः	ब्रह्मा	ब्रह्मा	ब्रह्मा	विव- स्वान्	गृहक्षतः	गृहक्षतः
सोमः	सोमः	पृथ्वी- धरः	ब्रह्मा	ब्रह्मा	ब्रह्मा	विव- स्वान्	यमः	यमः
भल्लाटः	भल्लाटः	पृथ्वी- धरः	ब्रह्मा	ब्रह्मा	ब्रह्मा	विव- स्वान्	गन्धर्वः	गन्धर्वः
मुख्यः	मुख्यः	राज- यक्ष्मा	मित्रः	मित्रः	मित्रः	इन्द्रः	भृङ्गराजः	भृङ्गराजः
नागः	रुद्रः	शोषः	असुरः	वरुणः	कुसुम दन्तः	सुग्रीवः	जयः	मृगः
रोगः	पाप- यक्ष्मा	शोषः	असुरः	वरुणः	कुसुम दन्तः	सुग्रीवः	दौवा- रिकः	पिता

पश्चिमा

।। चतुष्षष्टिपदे वृत्ते वास्तौ देवानां न्यासक्रमः।।



।। एकाशीतिपदे वृत्ते वास्तौ देवानां न्यासक्रमः।।



।। एकाशीतिपदे त्रिभुजे वास्तौ देवानां न्यासक्रमः।।



।। चतुष्षष्टियोगिनीमण्डलम्।।

पूर्वा

उत्तरा



दक्षिणा

पश्चिमा

120.00
316pp Kuber Purana
100.00
na

ALL MAHAPURANAS

Text with Shloka Index & Introduction

Agni Mahapurana
664 pp 450.00

Bhagavata Mahapurana-
4vols 2304 pp Set 1500.00

Bhavishya Mahapurana
3vols 1400 pp Set 1200.00

Brahma Mahapurana
728 pp 450.00

Devi Bhagavata Mahapurana
1154 pp 800.00

Ganesha Purana
832 pp 1993 450.00

Garuda Mahapurana
668 pp 400.00

Harivansha Purana
मूल, हिन्दी अनुवाद तथा श्लोकानुक्रमणी सहित
1802 pp 2vols set 900.00

Kurma Mahapuran
298 pp 300.00

Linga Mahapurana
774 pp 400.00

Markandeya Mahapurana
मूल, हिन्दी अनुवाद तथा श्लोकानुक्रमणी सहित
828 pp 450.00

Narada Mahapurana
932 pp 600.00

Padma Mahapurana
2381pp 4vols set 1600.00

Shiva Mahapurana
1504 pp 2vols set 900.00

Shiva Mahapurana (Small Type)
412 pp 400.00

Skanda Mahapurana
5600 pp 8 vols set 4000.00

Skanda Mahapurana (small type)
1452 pp 3vols set 1500.00

Vamana Mahapurana
472 pp 400.00

Vayu Mahapurana
540 pp 400.00

Vishnudharmottara Mahapurana
1246 pp 900.00

Vishnu Mahapurana-with two commentaries
680 pp 500.00

विष्णुमहापुराण
मूल, हिन्दी अनुवाद तथा श्लोकानुक्रमणी सहित
—डा० श्रद्धा शुक्ला
pp. 1000 2 vols Rs. 225.00

मत्स्य पुराण
मूल, हिन्दी अनुवाद तथा श्लोकानुक्रमणी सहित
—डॉ० श्रद्धा शुक्ला
Demy 1/8 2 vols set Press

Ekamara Purana
490 pp 150.00

Kalki Purana
316pp 120.00

Kuber Purana
(Text With Study) Press

Narasimha Purana
380 pp 100.00

Saura Purana
290 pp 100.00

Srimadbhargavopapuranam
—Brijesh Kumar Shukla
pp 348 Rs. 124.00

Vasuki Purana
260 pp 100.00

Ashtadasha Purana Darpana
Contents of 18 Puranas
432 pp 180.00

PURANAS WITH TEXT, TRANS & NOTES IN ENGLISH VERSWISE

Vishnu Purana – *H.H. Wilson*
1065 pp 2 vols Set 500.00

Matsya Purana – *N.S. Singh*
1252 pp 2 vols 500.00

Narasimha Purana –*Dr.S.Jena*
750 pp 400.00

Kalika Purana
Prof. Biswanarayan Shastri
1770 pp 3vols set 900.00

Shiva Purana (Uttara Khanda)
(Text with Eng. Trs. & Introduction)
Demy 1/8 Press

NAG PUBLISHERS
11/A (UA) Jawahar Nagar, Delhi - 110007 (INDIA)